दुकेति॥क्षीणश्चासाविंदुः क्षीणेंदुः कृष्णाष्टम्यर्द्धाच्छुक्लाष्टम्यर्द्धं यावत् क्षीणश्चंद्रः पर
तः पूर्णः॥आयुर्द्दायविधौ कृष्णपक्षत्रयोदश्यां तावत्प्रभृति यावदमावास्यां ते सूर्य
मंडलान्तोद्गतस्तावत् क्षीण इति॥यवनेश्वरः॥चंद्रस्य पापत्वं न कदाचिदपीच्छति॥तदु
क्तं॥मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्वे शशी मध्यबलो दशाहे॥श्रेष्ठो द्वितीयेल्पबलस्तृती
ये सौम्यस्तु दृष्टो बलवान्सदैव॥तथोच॥क्रूरग्रहोर्कः कुजसूर्यजौ तु पापौ शुभाः शुक्र
शशांकजीवाः॥सौम्यश्च सौम्यो व्यतिमिश्रितोन्यैर्वर्गैस्तु तु प्रकृतित्वमेतीति॥तस्मा

दे तावत॥क्षीणइति॥आदित्यः॥महीसुतोंगारकः॥अर्कतनयःसौरः॥एतेसदैवपापाः॥
बुधस्तैर्युतस्तेषांमेकतमेयुक्तः पापएव॥सौम्याःशेषाः॥शुक्लपक्षाष्टम्यर्द्धात्कृष्णप
क्षाष्टम्यर्द्धं यावच्चंद्रः॥सौम्योबुधः॥पापवियुतःसौम्यएव॥जीवशुक्रौसदैवसौम्याइ
ति॥प्रयोजनं॥पापसौम्यग्रहबलाज्जातःपापात्मकःसौम्यस्वभावश्चभवति॥८॥
अधुनाग्रहणांप्रकृतिविभागंमहाभूताधिपत्यंश्चोदकेनाह॥बुधसूर्यसुतौनपुंसका
ख्यौशशिशुक्रौयुवतीनराश्चशेषाः॥शिखिभूखपयोमरुद्‍गणानांवशिनोभूमिसुतादि
यःक्रमेण॥९॥बुधसूर्यसु॥ताविति॥बुधश्चार्कि॥सूर्यसुतःशनिः॥एतौनपुंसकाख्यौ
नपुंसकनामानौ॥शशीचंद्रःशुक्रौभार्गवः॥एतौयुवतीसंज्ञौ॥शेषारविजीवभौमा
नराः॥पुरुषसंज्ञाःपुरुषनामानः॥प्रयोजनं॥जन्मनिचिंतायांहतनष्टादिषुबल

वंतः स्वस्वरूपमेव कुर्वंति॥ तेषामुपतापे तदाश्रितानामुतापः॥ शिखिभूखपयोमरु
द्गणानामिति॥ शिखादीनां पंचानां महाभूतानां पंच ग्रहा भूमिसुतादयः॥ क्रमेण वशि
नः॥ तद्यथा॥ शिखिनोग्नेर्भूमिसुतोंगारको वशी भौमस्याग्नेः स्वा स्वामित्यर्थः॥ एवं भूमे
बुधः॥ स्वस्याकाशस्य जीवः॥ पयसोंभसः शुक्रः॥ मरुतो वायोः शनैश्चरः॥ गणग्रहण
मत्र वृत्तसपूरणार्थं॥ नन्वादित्यचंद्रयोः कस्मान्नोक्तमित्यत्रोच्यते॥ तयोः पूर्वमेवोक्तं॥
वन्ह्यं चिंतितो ववप्रसिद्धौ॥ प्रयोजनं॥ स्वदशायां महाभूतरूतोच्छायां व्यंजयंति॥ व
क्ष्यति च॥ छायां महाभूतकृतां च सर्वे इति॥ अधुना ग्रहाणां ब्रह्मणादिवर्णाधिपत्वं गुण
विभागं चोपजातिकयाह॥ विप्रादितः शुक्रगुरू कुजार्कौ शशीबुधश्चेत्यसितोंतराणां॥
चंद्रार्कजीवा ज्ञसितौ कुजार्की यथाक्रमं सत्वरजस्तमांसि॥ ७॥ विप्रादितो ब्राह्मणा

देवगणचतुष्टयस्वामिनो ग्रहा अधिपतयः॥ शुक्रो भार्गवः गुरुर्बृहस्पतिरेतौ ब्राह्म
णानामधिपती॥ कुजो भौमः॥ अर्क आदित्यः॥ एतौ क्षत्रियाणां॥ शशी चंद्रो वैश्यानां॥
शुद्राणां बुधः॥ असितः शनैश्चराणां वर्णप्रतिलोमभावानां चांडालमागधनिषा
दादीनां॥ प्रयोजनं॥ हतनष्टादिषु ग्रहबलाच्चौरादीनां ग्रहोत्थवर्णभावः॥ एषामुप
पद्यते तद्वर्णोपघातः॥ तथा च सत्यः गुरुसुक्रौ रविरक्तौ चंद्रः सौम्यः शनैश्चरश्चे
ति॥ विप्रक्षत्रियविट्शूद्रशंकराणां प्रस्तकराः॥ अजये जये थ तुष्टावशीतौ वित्तना
शे नेलाभे॥ तेभ्यस्तेभ्यः कुर्यगुणोश्चदोषोश्च पक्षाणां॥ चंद्रार्कजीवा रत्यादि॥ चंद्रः श
शी अर्क आदित्य जीवो बृहस्पती एते सत्यसंज्ञाः ज्ञो बुधः सितः शुक्रः एतौ रजःसंज्ञौ॥
कुजोगारकः आर्किः सौर एतौ तमःसंज्ञौ॥ एते यथाक्रमं सत्वादिगुणाधिपतयो ग्र

हाः॥ प्रयोजनं॥ सत्वरजस्तमो वा त्रिंशांशे यस्य भास्करस्तादृगितिस्वजातके॥ अन्येपु

नः ग्रहगृहवलाद्वर्णयंतितथाच श्रीदेवकीर्तिः॥ बलवद्भिः स्तद्गुणो भवेज्जातइति॥

अत्राचार्यस्य यवनेश्वरेण सह निजमते भेदः॥ तन्ये भौमस्य सात्विकउक्तः॥ तथा

च मद्वाक्यं॥ सत्वधिका भास्कर भौमजीवा भृग्वात्मको राजसिकः शशीच॥ शनैश्चर

स्तामसिको बुधस्तु संयोगतोन्यां लभते विशेषात्॥ आचार्यस्य सत्यवचनमभिमतं॥

तथाच सत्यः॥ तामसिकौ कुजसौरौ राजसिकौ भार्गवः शशिसुतश्च जीवशशि भास्क

राः सात्विका ग्रह प्रकृतितान्दर्शीणां॥ एवं मत्र यत्राचार्यस्य यवनेश्वरेण सह मतभे

दस्तत्र सत्यमतमपि॥ अथ पूर्वमभिहितं॥ सत्वं कुतः स्तश्चंद्रार्कजीवाः पुनः कि

मित्युक्तं॥ उच्यते॥ इह गुणवचनात् सत्वशब्दतत्रांशो यपर्यायः॥ कार्याकार्यप्रव

71

वृ०
३९

जा०

तीनां सिंहादीनामप्यस्ति॥ एनस एकाकिनो पि वनवासिना॥ तथाच॥ एकाकिनि वनवासिन्यराजलक्ष्यणा नीतिशास्त्रज्ञे॥ सत्वोछ्रिते मृगपतौ राजेति गिरः परिणमंति॥ अथ गुणस्वरूपं॥ यः सात्विकस्तस्य दयास्थिरत्वं सत्वार्ज्जवं ब्राह्मणदेवभक्तिः॥ रजोधिकः काव्यकलादतस्त्रीसंसक्तसितः॥ पुरुषोतिशूरः॥ तमोधिको वंचयिता परेषां मूर्खोलसः क्रोधपरोतिनिद्र इति॥ ७॥ अथ चंद्रार्कयोः श्लोकेनाह॥ मधुपिंगलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः॥ तनुवृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक्शुभदृक्॥ ८॥ मधुपिंगलदृगिति॥ मधुवत्पिंगला दृष्टिर्यस्य॥ इषल्लोतराक्षः॥ चतुरस्रतनुः प्रशस्ति भुजद्वयप्रमाणसमो द्व्यायः॥ पित्तप्रकृतिः पित्ताधिकः॥ अल्पकचे विरलकेशः॥ एवंविधः सविता आदित्यः तनुवृत्ततनुरिसादि॥ तन्वी चासौ

तु

३९

72

वृत्ता च तनुर्वृत्ता तादृशी तनुर्यस्य स तनुवृत्ततनुः॥ कृशा वर्तुलं इत्यर्थः॥ बहुवातक
फः॥ प्रभूतमारुतश्लेष्मा॥ प्राज्ञो मेधावी॥ मृदुवाक्कोमलभाषी॥ शुभदृक् दर्शनीया
क्षः॥ एवंविधः शशी चंद्रः॥ ५॥ अथांगारकबुधयोः स्वरूपं स्वांगातयोह॥ क्रूरदृक्तरु
णमूर्तिरुदारः पैत्तिकः सुचलः कृशमध्यः॥ श्लिष्टवाक्ततहास्यरुचिर्ज्ञः पित्तमारुत
कफप्रकृतिश्च॥ ६॥ क्रूरा दुष्टा दृष्टिर्यस्य स क्रूरदृगंगारकः॥ स च तरुणमूर्तिः नित्यं
यौवनोपेताकारविग्रहः॥ उदारो दाता॥ पैत्तिकः पित्तबहुलः॥ सुचपलोतीवास्थिरचि
त्तः॥ कृशमध्यस्तनूदरः॥ एवंविधोंगारकः भौमः॥ श्लिष्टवाग्मित्यादि॥ केनष्टवागाहु
दभाषी सततहास्यरुचिः॥ नित्यं परिहासशीलः॥ पित्तमारुतकफप्रकृतिर्दोषत्रयो
ल्बणस्वभावः॥ एवंविधो ज्ञो बुधः॥ अथ जीवशुक्रयोः स्वरूपं वंशस्थेनाह॥ वृह

तनुः पिंगलईक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः॥ भृगुः सुखी कांतवपुः सु
लोचनः कफानिलात्मासिततवक्रमूर्द्धजः॥१०॥ बृहत्तनुः स्थूलशरीरः॥ मूर्द्धजाः के
शाईक्षणेचनयने पिंगले यस्य कपिलकेशः कातराक्ष इत्यर्थः॥ श्रेष्ठमतिर्धर्मानु
गः प्राज्ञः॥ कफात्मकः॥ कफाधिकशरीरः॥ श्लेष्मात्मा॥ एवंविधो बृहस्पतिः॥ भृगु
रित्यादि॥ सुखी नित्यं सुखासक्तः॥ कांतवपुर्दर्शनीयशरीर इत्यर्थः॥ सुलोचनः शो
भनाक्षः॥ कफानिलात्मा श्लेष्ममारुतप्रकृतिः असिततवक्रमूर्द्धजः असिताः कृष्णा
वक्राः कुटिलाः मूर्द्धजाः केशा यस्य॥ कृष्णकुंचितकेश इत्यर्थः एवंविधो भृगुः शुक्रः॥
अधुना शनैश्चरस्वरूपं स्ताद्यदि सारत्वं च महाभ्ययं वसंततिलकेनाह॥ मंदोलसः
कपिलदृक्कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचोनिलात्मा॥ स्नाय्वस्थ्यस्र

त्वगसृगस्थिशुक्रवसाः समज्जा मंदार्कचंद्रबुधशुक्रसुरेज्यभौमाः ॥११॥ अलसः क्रियासु पंगुः ॥ कपिलदृष्टिः कातरासक्षगात्रं दुर्बलं दीर्घमुच्चतरं गात्रं यस्य ॥ गात्राणि वा सदुर्बलो-
च्चदेहः ॥ स्थूलद्विजो दृढदंतः ॥ परुषरोमचयैः ॥ रूक्षतनुरुहकेशः ॥ अनिलात्मा वातप्रकृ-
तिः ॥ एवंविधो मंदः शनैश्चरः ॥ स्नाय्वस्थीत्यादि ॥ मंदादीनां ग्रहाणां स्नाय्वादिसारत्वं ॥ स्ना-
य्वास्थिनी सिद्धे ॥ तदेहवतां शनैश्चरादिषु ॥ स्नायुर्मंदः ॥ शनैश्चरः न सासारः ॥ अस्थि
न्यर्क आदित्यः अस्थिसारः ॥ असृक् रुधिरं तच्चंद्रमाः ॥ त्वक्कर्म तद्बुधः ॥ अयशब्द आ-
नंतर्यार्थे ॥ शुक्रं रेतः तच्छुक्रः ॥ वसा मेदस्तत्सुरेज्यो गुरुः ॥ मज्जा अस्थ्यंतरंग-
तो धातुविशेषः ॥ स भौमः ॥ ग्रहाणां स्वरूपज्ञानप्रयोजनं ॥ लग्ननवांशतुल्यतनुः
स्यादित्यत्रोपयुज्यते ॥ जन्मकाले यो ग्रहो बलवान् तत्सदृतस्वरूपतत्कालजातो भव

ति॥ तद्वातु सारस्य॥ हतनशदिग्रस्मिकालेप्येवं विधातुः रूपाश्चौरादयः व्यधितः अस्मे
यल्लग्नं यच्चलग्नेन वांशको वर्त्तते तत्स्वामिनो बलवशादभिहितदोषेणवापीडा॥ अथु
नां ग्रहाणां२ स्थानवस्तद्व्यं तत्र प्रभुत्वं शार्दूलविक्रीडितेनाह॥ देवांबग्निविहारको
शाशयनक्षितिसुत्करेशाः क्रमादस्त्रस्थूलमभुक्तमग्निकहतमधंरंठंफाटितं॥ तांम्रंसा
म्रणिहेमयुक्तिरजतान्यर्कोच्च मुक्तायसीद्रव्याणी शिशिरादयः शशुरचशंग्वादिषुद्य
सुना॥१२॥ अर्कोलमृति तदादीनां ग्रहाणां क्रमाद्देवादीनि स्थानानि॥ तत्र देवस्थानमा
दित्यस्य॥ अंबुस्थानं चंद्रमसः॥ अग्निस्थानं भौमस्य॥ विहारस्थानं॥ क्रीडास्थानबुध
स्य॥ कोशो भांडागारस्तत्स्थानं बृहस्पतेः॥ शयनस्थानं शुक्रस्य॥ क्षितिसुत्करः आकर
राशितत्स्थानं शनैश्चरस्य॥ एतेषां स्थानानां एते स्वामिनः॥ प्रयोजनं॥ बलवति ग्रहेय

रो क्रूरस्थाने प्रसव ज्ञानं॥ हृत नष्टादेश्चौरादेः॥ तैर्देवस्थानेद्रव्यस्य च॥ वस्त्र मित्यादि॥ अर्का दि सर्वत्रानुवृत्तिः॥ तत्र स्थूलं ततु कृतमादित्यस्य वस्त्रं॥ अभुक्तं नवं चंद्रस्य॥ अग्निनाह तमेकदेशदग्धं भौमस्य॥ केनापि नाहतं क्लिन्नं बुधस्य॥ मध्यं नातिनवं नातिजीर्णं बृह स्पतेः॥ दृढं कालांतरस्थायि शुक्रस्य॥ स्फाटितं जीर्णं शनैश्चरस्य॥ प्रयोजनं॥ सूतिकाव स्त्र ज्ञानं॥ हृत नष्टादि चिंतायां॥ चौरादेर्बलवद्ग्रहवशाद्वस्त्र ज्ञानं॥ तांम्रं स्यादित्यादि॥ तांम्र मादित्यस्य॥ चंद्रस्य मणयः॥ भौमस्य हेमं सुवर्णं॥ बुधस्य युक्तिः॥ युज्यत इति युक्तिः॥ रीरीकांस्यादि॥ रजतं रौप्यं बृहस्पतेः॥ स्वस्थानस्थस्य तस्यैव सुवर्णमपि॥ मुक्ता शुक्रस्य॥ अयः कृष्णलोहं॥ सीसत्रपुणी शनैश्चरस्य॥ तथा चानेनैव सूक्ष्मजातके उक्तं॥ अर्का दीनां ताम्र मणि हेम युक्तिरजतानि मौक्तिक लोहं। बलवद्भिः॥ स्वस्थानं हेमाजे वोपि॥

बृ०
३१ जा०

तथाचबादरायणः॥ अर्कस्यतांम्रंमणयोहिमांशोर्भौमस्यतेमेंदुसुतःस्ययुक्तिः॥
जिवस्यरूप्यंस्वगृहेस्थितस्यतस्यैवहेमोशनसश्चमुक्ता॥ तीक्ष्णंतुदेहप्रवभवस्यसी
संहत्स्यायसंचप्रवदंतितज्ज्ञाः॥ प्रयोजनं॥ सूतिकागृहेबलेः[illegible]ऊहस्यद्रव्यसतार्हेनष्ट च
दिचिंतायांचतद्द्रव्यनाशादिपरिज्ञानेतच्छुभदशायांतस्मिन्नुपचयेस्थेतदाप्तिः॥ उक्त
विपरीतेहानिः॥ द्रेष्काणैरितित्यादि॥ अत्रशाकारादिभिर्गुरुपर्यंतैर्वर्णैः सज्ञाद्यैः श
नैश्चरप्रभृतीनांगुर्वंतानांरुतानुरोधान्निर्देशाःकृतः॥ शनैश्चरशुक्ररुधिरचंद्रबु
धगुरुषुद्यत्सुलग्नगतेषुशिशिरादयः॥ षड्ऋतयोज्ञेयः॥ तत्रशाकारोपलक्षितः॥
शनैश्चरः॥ तस्मिन्नुदयतिलग्नस्थेशिशिरऋतुर्विज्ञेयः॥ शुकारोपलक्षितः॥ शुक्रः
तस्मिंश्चवसंतः॥ रुकारोपलक्षितोरुधिरः॥ भौमस्तस्मिन्ग्रीष्मः॥ चकारोपलक्षितश्चं

३१

78

द्रः तस्मिन्वर्षा ज्ञो बुधस्तस्मिन्शरत्॥ गुकारोपलक्षितो गुरुस्तस्मिन्हेमंतः॥ आदि
त्य एवुद्यति ग्रीष्मः॥ तथा च बादरायणः॥ ग्रीष्ममथ प्ररंति कुजार्कविति॥ द्रेष्काणैरित्य
स्य॥ वा इत्यनेन व्यवहितेन संबंधः॥ द्रेष्काणैश्चोदन्निः शनैश्चरादिसंबंधिभिः शशिराद
यो ज्ञेयः॥ एतदुक्तं भवति॥ लग्ने ग्रहासंभवे शनैश्चरद्रेष्काणे लग्नगते शशिरः एवं शु
क्रद्रेष्काणे वसंतः॥ भौमद्रेष्काणे ग्रीष्मः॥ रविद्रेष्काणे च ग्रीष्म एव॥ चंद्रद्रेष्काणे वर्षा
व॥ बुधद्रेष्काणे शरत्॥ जीवद्रेष्काणे हेमंतः॥ अत्र च मुख्यग्रहोदयेनर्तुर्निर्देशः क
र्तव्यः॥ तदभावे द्रेष्काणेन॥ बन्हीनामुदयेपि द्रेष्काणेनैव॥ केचिद्बलिनामुदये बलव
द्ग्रहेणेति व्याचक्षते॥ तथा च माणित्थः॥ व्याद्यैर्लग्नोपगतैर्यो बलवांस्तद्वशात्तु निर्देश
इति॥ तत्रैव तज्जातं॥ लग्ने यो ग्रहः स्थितस्तदुक्त ऋतुर्वाच्यः॥ बहुषु लग्नगतेषु यो ब

लवान्ग्रहाभावेद्रेष्कोणपतेऋतुर्निर्दिष्टाः॥प्रयोजनं नष्टजातके ऋतुः निर्दिष्टाः॥इत
नष्टादिचिंतायांनेति॥अथाचार्येणग्रहाणां शाखाधिपत्वं नोक्तं॥उक्तंच स्वल्पजातके॥
ऋगथर्वसामयजुषामधिपगुरुसौम्यभौमसिताः॥ऋग्वेदाधिपतिर्गुरुः॥अथर्ववेद
दाधिपतिःसौम्यबुधः॥सामवेदाधिपतिर्भौमः॥यजुर्वेदाधिपतिःशुक्रः॥प्रयोजनं॥
बलवति शाखाधिपे ब्राह्मणादेस्तच्छाखापाठको भवति॥ब्राह्मणे चौरे ज्ञाते शाखादि ज्ञा
नं॥अनिष्टस्थानस्थे ग्रहे नेनं मंत्रै शांतिरिति॥अथ ग्रहाणां दृष्टिस्थानानि निसर्गदृष्टि
फलानि च प्रदर्शयत्याह॥त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयंति चरणाभिवृ
द्धितः॥रविजामरेज्यरुधिराः परे च ये क्रमशो भवंति किलवीक्षणेऽधिकाः॥१३॥यस्मि
न्स्थाने ग्रहाः स्थितास्तस्मात् त्रीदशादीनि स्थानानि चरणाभिवृद्धितपादवृद्ध्यावलोकयं

ति॥ ग्रहो यस्मिन् राशौ व्यवस्थितः तस्माद्यत्तृतीयगो ग्रहो दशमायगो तश्च तथा तृतीयदशम
स्थौ राशिगतौ पादेन चतुर्भागदृष्ट्यावलोकयंति॥ एवं त्रिकोणस्थौ नवपंचमस्थौ नगतावर्द्ध
दृष्ट्या॥ चतुरस्रेष्टमचतुर्थे॥ अष्टमचतुर्थस्थानस्थौ पादहीनदृष्ट्या॥ सप्तमगसमग्र
पूर्णदृष्ट्या॥ चरणाभिवृद्धित्तरति॥ अभिन्नाब्दोवीक्ष्याद्योतरति॥ चरणवृद्ध्या पादवृद्ध्येत्य
र्थः॥ यावत्सा दृष्ट्या पश्यंति॥ तावत्फलं प्रयच्छंति॥ तथा च स्वल्पजातके॥ दशमतृतीये न
व पंचमे चतुर्थाष्टमे कलत्रे च॥ पश्यंति पादवृद्ध्या फलानि चैवं प्रयच्छंति॥ अयादेवग्र
होनुक्तस्थानानि न पश्यंतीति॥ तथा च सारावल्यां॥ सव्यं पश्यंति सरा ग्रहाश्चरणवृद्धि
तः सर्वे॥ त्रिदशत्रिकोणचतुरस्रसप्तगतान्फलक्रमेणैव॥ पूर्णं पश्यति रविजस्तृती
यदशमे त्रिकोणमपि जिवः॥ चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च॥२॥

रु
११

तथाचयवनेश्वरः॥ द्वौपश्चिमेषष्टमथद्वितीयंस्थानंराशेःपरिहृत्यराशिं॥ शेषान्ग्रहाः
पश्यतिसर्वकालमिष्टेषुचैषांविहिताहगिरा॥ जग्मित्रभेदृष्टिफलंसमग्रंस्वपादहीनंच
तुस्त्रयोश्च॥ त्रिकोणयोर्दृष्टिफलार्द्धमाहुर्वृश्चिकंसंज्ञेदशायेचपादं॥ रविजामरेज्यरुधि
राइति॥ किलेत्यागमसूचने॥ चरणाभिवृद्धितस्त्वनुवर्तते॥ रातेरविजादयश्चरणाभि
वृद्धितःपादोपचया। द्वीक्षणेदर्शनेक्रमशोधिकफलप्रदाभवंति॥ रजःसौरःसदर्शने वि
नपादफलप्रदा॥ आमेरज्योबृहस्पतिरर्द्धफलप्रदा॥ रुधिरोगारकःसपादहीनफलप्रदः॥
अपरेर्कचंद्रबुधशुक्रास्तेवीक्षणेसमग्रफलप्रदाः॥ एतन्नैसर्गिकंग्रहाणांदृष्टिफलं॥ स्था
नवशादेतेषांयथास्वदृष्टिफलंमूलं॥ एवमेकेव्याचक्षते॥ अपरेतुआहुः॥ स्थानफलमे
तत्॥ तेनत्रिदशादिस्थानगतान्ग्रहराशीनपश्यंते॥ रविजादयोर्दर्शनेधिकफलप्रदाभ

वंति॥ तद्यथा॥ तृतीयदशमस्थानान् ग्रहान् शनीन्वा शनैश्चरः पश्यन्नन्येभ्यो ग्रहेभ्योधि
कफलप्रदो भवति॥ परिपूर्णपश्यतीत्यर्थः॥ एवं त्रिकोणस्थान् जीवः॥ चतुरस्रगान् भौमः॥
सप्तमस्थानेस्सूर्यचंद्रबुधशुक्राः॥ एतच्च बहुतराणां आचार्याणां मतं॥ तथा च भगवान्
गार्गिः॥ दुश्चिक्यखगतान् सौरस्त्रिकोणस्थान् बृहस्पतिः॥ चतुर्थाष्टमगान् भौमः शेषाः
सप्तमसंस्थेतान्॥ भवंति वीक्षणानित्यमुक्ताधिकफलाग्रहाः इति॥ अधुनाग्रहाणां का
लनिर्देशं रसनिर्देशं च वैतालीयेनाह॥ अयनक्षणवासरर्तवो मासोर्द्धं च समाश्च भास्क
रात्॥ कटुलवणतिक्तमिश्रिता मधुराम्लौ च कषाय इत्यपि॥१४॥ भास्करादादित्यात्य
यनादिः कालनिर्देशः॥ तत्रायननिर्देशो भास्करात्सूर्यात्॥१४॥ क्षणो मुहूर्तस्तस्मिन् नि
र्देशश्चंद्रात्॥ वासरो दिवसस्तन्निर्देशो [illegible] भौमात् ऋतुमासद्वयात्मकस्तन्निर्देशो बुधात्॥

९
४२

जा०

मासनिर्द्देशो जीवात्॥ मासार्द्धपक्षनिर्देशः शुक्रात्॥ समः संवत्सरः स्तन्निर्देशः शौरात्॥ प्रयोजनं॥ प्रश्नलग्ने यस्य ग्रहस्य नवांशकोदयः स ग्रहस्तस्मान्नवांशकाद्यावत्संख्ये नवांके भवति॥ तावत्संख्योऽयनादिको ग्रहोपलक्षितः कालः शुभाशुभफलपंक्तौ वाच्यः॥ अन्येत्वेवं व्याचक्षते॥ लग्ने यावत्संख्या नवांशकोदितस्तावत्संख्योऽयनादिकालोंऽशपतिवशाद्वक्तव्यः॥ तथा च मणित्थः॥ लग्नोंऽशकपतितुल्यः कालो लग्नोदितांशसमतुल्यः॥ वक्तव्यो रिपुविजये गर्भाधाने कार्यसंयोगे॥ कटुकलवणेत्यादि॥ भास्करादित्यादि॥ कटुकादिरसनिर्देशः॥ तत्रादित्यात्सूर्यात्॥ कटुकरसस्य निर्देशः॥ चंद्रात्॥ लवणस्य॥ भौमात्तिक्तस्य तिक्तमरिचादि॥ बुधात् मिश्रस्य॥ षड्रसस्य॥ जीवान्मधुरस्य मिष्टस्य॥ शुक्रादाम्लस्य॥ सौरात्कषायस्य॥ प्रयोजनं॥ आधानकाले यो बल

४२

वांस्तदुत्कटरसस्य दोहदो गर्भिण्यां भवति॥ तथा च सारावल्यां॥ मासतृतीये स्त्रीणां दोहदः को जायते वश्यं॥ मासाधिपस्य भावैर्लग्नपयोगादिभिर्विद्यं॥ भोजनाश्च च प्रश्ने ग्रहोदये तन्न वांशकोदये वा॥ तदुत्कटरसान्वितं भोजनं ज्ञानमिति॥ अथ नामित्रामित्रविधिः शार्दूलविक्रीडितेनाह॥ जीवो जीवबुधौ सितेंदुतनयौ व्यर्का विभौमाः क्रमाद्वीद्वर्का विकुजेंदिनाश्च सुहृदः केशांचिदेवं मतं॥ सत्योक्ते सुहृदः त्रिकोणभवनात्स्वात्स्वांत्यधीधर्मपाः स्वोच्चायुःसुखपाः स्वलक्षणविधेर्नान्यैर्विरोधादिति॥ १५॥ सूर्यादीनां ग्रहाणां क्रमाज्जीवादयः सुहृदः॥ तत्रादित्यस्य जीवो बृहस्पतिः सुहृन्मित्रं॥ जीवबुधौ चंद्रस्य॥ शुक्रबुधौ भौमस्य॥ विगतोर्कः सूर्यो येभ्यो ग्रहेभ्यस्ते सूर्यवर्जिताः सर्व एव बुधस्य॥ विकुजा विगतांगारकः सर्वा एव बृहस्पतेः॥ वींद्वर्का विगतश्चंद्रार्कौ येभ्यस्ते सर्व एव शुक्रस्य॥

विकुजेंद्विनाः कुजो भौम ईंदुश्चंद्र इनः सूर्यः एते विकुजेंद्विनाः सर्वत एव सौरस्य॥ एवं कं
षांचिन्मतं न बहूनां॥ अत्र च तेषां शत्रुमित्रस्य व्यवहार तस्मान्मित्रेभ्यो न्यान्यमित्राणी
ति॥ केचिद्यवनेश्वरादयः॥ तथा च॥ रवेर्गुरु मित्रम् अतोन्यथान्ये गुरोस्तु भौमं परिहृ
त्य सर्वे॥ चंद्रेन कों भृगुनंदनस्य वैरं रवेः सुहृदः परिष्टाः॥ भौमस्य शुक्रः शशिजश्च
मित्रं मिंदोर्बुधं॥ देवगुरुं च विद्यात्॥ सौरस्य मित्राण्य कुजेंदुसूर्याः शेषा नृरिपून्विद्वि
न्मणां च तद्वत्॥ सत्योक्तइति॥ सत्योक्ते होराशास्त्रे स्वात्त्रिकोणभवनादात्मीयमूलत्रि
कोणराशेः स्वांत्य धी धर्मपाः स्वाच्चायुःसुखपाश्च ते ग्रहाः सुहृदो भवंति॥ तत्र त्रिकोणं
स्व त्रिकोणं तस्मात्स्वयो द्वितीयराश्याधिपः तस्मादेवांत्ययो द्वादशस्थानाधिपाः॥ धी
पंचमस्याधिपः धर्मपो नवमाधिपः स्वोच्चयोग्रहोच्चस्थस्वामी आयुषोष्टमस्थनाधि

पः धर्मपो तवमाधिपः सुखपश्च तुर्थस्थानाधिपतिः॥ अहो मित्रं भवति॥ स्वलक्षणविधे
र्विरोधादन्यैरपि वितस्यानाधिपतिभिर्ग्रहैः सह नायं मित्रामित्रविभागः कल्पनीयः॥
विरोधादसुहृत्त्वं॥ स्वंच तल्लक्षणं॥ स्वलक्षणं॥ स्वलक्षणे विधिः स्वलक्षणविधिस्तेन
विरोधस्तस्मात्॥ एतदुक्तं भवति॥ यो यं स्वत्रिधैः मित्रत्वलक्षणो विधिस्तेन विभागः प्र
दर्शितः॥ अतोन्यस्थानाधिपा ये ग्रहास्ते ग्रहस्य सुहृदो न भवंति॥ तथा च सत्यः॥ सुहृ
दस्त्रिकोणभवनाद्ग्रहस्य सुतभे व्यये थ धन भवने॥ स्वजने निधने धर्मे स्वोच्चे च भवंति
नो शेषाः॥ स्वजनसंज्ञं चतुर्थस्थानं॥ तत्र द्विराश्य॥ धिपो मित्रसंज्ञः॥ एकराश्याधिपो म
ध्यमः॥ अनुक्तराश्याधिपः शत्रुः॥ वक्ष्यतीच॥ ध्येकानुक्तभपान् सुहृत्सम रिपून् संचिंत्य
नैसर्गिकानिति॥ एकराश्याधिपो मध्यस्थ इति॥ यदुक्तं तथा चेन्द्रार्कावेकराश्याधिपा

२०
११

जा०

वपि मित्रसंज्ञौ भवतः॥ तयोर्द्विराशिद्वयस्याधिपत्याभावात्॥ राशिद्वयस्य योधिपतिर्ग्रहः
स एव यद्युच्चराश्याधिपत्वात्त्रिभपत्वं प्राप्नोति॥ तथापि द्विभप एव ज्ञातव्यः॥ तस्य स्वरा
शिव्यतिरेकात्॥ एतन्मंदबुद्धिव्युत्पादनार्थं स्पष्टतरं व्याख्यायते॥ तथादित्यस्य सिंहः त्रि
कोणः तस्माद्द्वादशस्थानस्य कर्कटस्य चंद्रमा अधिपतिः स एकराश्याधिपोपि स द्वितीयस्य
राश्यधिपत्यस्याभावादादित्यस्य मित्रं॥ सिंहाच्चतुर्थो वृश्चिकः नवमो मेषः तयोर्भौमाधिप
तिः॥ आदित्यस्य स्वो मेषः तस्याधिपो भौमः मेषस्य सिंहनवमत्वादादित्यस्य स्वोच्चत्वादेक
राशित्वं मेषस्यैकत्वाद्वृश्चिकस्य द्वितीयत्वाद्भौमः द्विराश्यधिपो जातः॥ तेनादित्यस्य मि
त्रं॥ सिंहात्पंचमाष्टमौ धन्विमीनौ॥ तयोरधिपतिर्जीवः॥ स चोक्तस्थानद्वयस्याधिप
तित्वादादित्यस्य मित्रं॥ सिंहात् द्वितीयैकादशौ कन्यामिथुनौ तयोर्बुधः स्वास्वामी॥ तत्र

११

द्वितीयस्थानस्योक्तत्वादेकादशस्थानस्यानुक्तत्वात्सदितैकराश्यधिपत्वाद्बुधो रवेर्मध्यमः॥
सिंहात्सप्तसमस्थाने मकरकुंभौ नौ तयो राश्यधिपत्यादादित्यस्य शनैश्चरः शत्रुः॥
सिंहाद्दशमतृतीये वृषतुले तयोरनुक्तयो राश्यधिपत्वाच्छुक्रः आदित्यस्य शत्रुः॥ एवं रवेः॥
अथ चंद्रस्य॥ तथा चंद्रस्य वृषस्त्रिकोणस्तस्माच्चतुर्थस्थानं सिंहस्तस्याधिपः सूर्यः स
एकराश्याधिपोपि स द्वितीयस्य राशे राधिपत्यस्याभावाच्चंद्रस्य मित्रं॥ वृषात् द्वितीयो मि
थुनः पंचमः कन्या तयोर्बुधोधिपतिः सचोक्तस्थानद्वयस्याधिपत्वाच्चंद्रस्य मित्रं॥ वृषा
त्सप्तमद्वादशौ वृश्चिकमेषौ तयोर्भौमः स्वामी॥ तत्र द्वादशस्योक्तत्वात्सप्तमस्यानुक्त
त्वात्पदितैकराश्यधिपत्वाद्भौमश्चंद्रस्य मध्यमस्थः॥ वृषादष्टमैकादशौ धनुर्मी
नौ तयोर्गुरुः स्वामी॥ तत्रैकादशस्थानस्यानुक्तत्वात्॥ अष्टमस्योक्तत्वात्पदितैकरा

स्याधिपत्वाज्जीवश्चंद्रस्य मध्यस्थः॥ चंद्रस्य वृषउच्चः॥ वृषात्सप्तमस्तुलस्तस्य शुक्रो
धिपतिस्तत्र वृषस्योच्चत्वात्सहितैकराश्याधिपत्याच्चंद्रशुक्रो मध्यस्थः॥ वृषान्नवमदशमौ
मकरकुंभौ तयोः सौरोधिपतिः तत्र नवमस्योक्तत्वाद्दशमस्यानुक्तत्वाद्दशमस्यानुक्तत्वा
त्सौरः चंद्रस्य मध्यस्थः॥ एवं चंद्रस्य॥ अथ भौमस्य॥ भौमस्य मेषस्त्रिकोणं॥ मेषाच्च
तुर्थस्थानस्य कर्कटस्याधिपश्चंद्रः स एकराश्यधिपोपि सद्वितीयस्य राशेराधिपत्या
भावाद्भौमस्य मित्रं॥ मेषात्पंचमस्य सिंहस्याधिपः सूर्यः स एकराश्याधिपोपि स
द्वितीयराशेराधिपत्याभावाद्भौमस्य मित्रं॥ भौमान्नवमद्वादशौ धन्विमीनौ तयो
र्जीवोधिपतिः स चोक्तस्थानद्वयस्याधिपत्याद्भौमस्य जीवो मित्रं॥ मेषात्तृतीयष
ष्ठौ मिथुनकन्ये तयोरपठितत्वात् तयोर्बुधस्याधिपत्वाद्भौमस्य बुधः शत्रुः॥ मेषा

द्वितीयसप्तमौ वृषतुले तयोः शुक्रः स्वामी ॥ तत्र द्वितीयोक्तत्वात्सप्तमस्यानुक्तत्वात्तत्परि
तैकराश्यधिपत्वात् बुधोक्तो भौमस्य मध्यस्थः ॥ मेषादशमेकादशौ मकरकुंभौ सौरोधि
पतिः ॥ भौमस्य मकर उच्चस्तस्योक्तत्वादेकराश्यानुक्तत्वात्स द्वितैकराश्यधिपत्वात्सौरो भौ
मस्य स्थानस्य सिंहस्याधिपतिः सूर्यस एकराश्याधिपोपि स द्वितीयराश्यधिपत्वाभा
वाद्बुधस्य मित्रं ॥ कन्यायाः द्वितीयानवष्टमौ तुलवृषौ तयोः शुक्रोधिपतिः स चोक्तस्था
नद्वयस्याधिपत्वाद्बुधस्य मित्रं ॥ कन्यायाः एकादशस्थानस्य कर्कटस्याधिपतिश्चंद्रस्त
स्यानुक्तत्वाद्बुधस्य चंद्रः शत्रुः ॥ कन्यायास्तृतीयाष्टमौ वृश्चिकमेषौ तयोर्भौमोधिपतिः ॥
तत्राष्टमस्योक्तत्वात्तृतीयस्यानुक्तत्वात्स द्वितैकराश्यधिपत्वाद्भौमो बुधस्य मध्यस्थः ॥
कन्यायाश्चतुर्थसप्तमौ धन्विमीनौ तयोर्गुरुर्वाधिपतिस्तत्र चतुर्थस्योक्तत्वात्सप्त

श्री

स

नुक्तत्वात्सदितैकराश्यधिपत्वाज्जीवोबुधमध्यस्थः॥ कन्यायाःपंचमषष्ठौमकरकुंभौ
तयोःसौरोधिपतिस्तत्रपंचमस्योक्तत्वात्षष्ठस्यानुक्तत्वात्सदितैकराश्यधिपत्वाज्जीवो
बुधेमध्यस्थः॥ कन्यायांसौरोबुधस्यमध्यस्थः॥ एवंबुधस्य॥ अथगुरोः॥ जीवस्यधन्वीत्रि
कोणं॥ तस्माद्दशमस्थानस्यकर्कटस्याधिपतिश्चंद्रः॥ सएकराश्याधिपोपिसद्द्विती
यस्यराशेराधिपत्याभावाज्जीवस्यमित्रं॥ धनुषःपंचमद्वादशौमेषवृश्चिकौतयोर्भौ
मोधिपतिःसचोक्तस्थानद्वयस्याधिपतित्वाज्जीवस्यमित्रं॥ धनुषोनवमस्यसिंहस्या
धिपतिःसूर्यःसएकराश्याधिपोपिसन्द्वितीयस्यराशेराधिपत्याभावाज्जीवस्यमि
त्रं॥ धनुषोद्वितीयतृतीयौमकरकुंभौतयोःसौरोधिपतिस्तत्रद्वितीयस्योक्तत्वात्तृती
यस्यानुक्तत्वात्सदितैकराश्यधिपत्वात्सौरोजीवस्यमध्यस्थः॥ धनुषःषष्ठैकादशौस्था

नेवृषतुलयोः शुक्रोधिपतिः स्थानद्वयस्यानुक्तत्वाच्छुक्रो गुरोः शत्रुः॥ धनुषः सप्तमद
शा मीथुनकन्यं तयोर्बुधोधिपतिः स्थानद्वयस्यानुक्तत्वात् गुरोर्बुधः शत्रुः॥ एवं जीव
स्य॥ अथ शुक्रस्य॥ शुक्रस्य तुला त्रिकोणं॥ तस्मान्नवमद्वादशस्थाने मिथुनकन्ये तयोर्बु
धोधिपतिः स चोक्तस्थानद्वयस्याधिपत्वाच्छुक्रस्य मित्रं॥ तुलाच्चतुर्थपंचमौ मकरकुं
भौ तयोरधिपतिः सौरः स चोक्तस्थानद्वयस्याऽधिपत्वाच्छुक्रस्य मित्रं॥ तुलात् द्वितीय
सप्तमौ वृश्चिकमेषौ तयोर्भौमोधिपतिः तत्र द्वितीयस्योक्तत्वात्सप्तमस्यानुक्तत्वात्स
सदैतैकराश्यधिपत्वात् भौमः शुक्रस्य मध्यस्थः॥ तुलात् तृतीयषष्ठौ धन्विमीनौ तयोर्जी
वोधिपतिः॥ मीनः शुक्रस्योच्चस्तस्योक्तत्वाद्धनुषोनुक्तत्वात्सदैतैकराश्यधिपत्वाज्जी
वः शुक्रस्य मध्यस्थः॥ तुलाद्दशमः कर्कटस्तस्यानुक्तत्वाच्छुक्रस्य चंद्रः शत्रुः॥ तुलाद्वे

कादशः सिंहस्तस्याधिपः सूर्यस्तस्यस्थानस्यानुक्तत्वाच्छुक्रस्यार्कः शत्रुः॥ एवंशुक्र
स्य॥ अथसौरस्य॥ सौरस्यकुंभत्रिकोणं॥ तस्मात्संचमाष्टौमिथुनकन्ये॥ तयोर्बुधोधिप
तिः सचानुक्तस्थानस्याधिपतित्वात्सौरस्यबुधोमित्रं॥ सौरस्योच्चतुलः कुंभाच्चतुर्थनवमौ
वृषतुलौतयोःशुक्रोधिपतिः सचोक्तस्थानद्वयस्याधिपतित्वात्सौरस्यशुक्रोमित्रं॥ कुंभो
द्वितीयैकादशौमीनधन्विनौतयोर्जीवोधिपतिः तस्यद्वितीयस्योक्तत्वादेकादशस्यानु
क्तत्वात्सद्वितैकराश्यधिपत्वात्सौरस्यजीवोमध्यस्थः॥ कुंभात्षष्ठः कर्कटस्तस्याधिपश्चंद्र
स्तस्यानुक्तत्वात्सौरस्यजीवोध्यचंद्रः शत्रुः॥ कुंभात्सप्तमः सिंहस्तस्याधिपतिः सूर्य
स्तस्यानुक्तत्वात्सौरस्यसूर्यःशत्रुः॥ कुंभात्तृतीयदशमौमेषवृश्चिकौतयोर्भौमोधिप
तिस्तयोरनुक्तत्वाद्भौमः सौरस्यशत्रुरिति॥ छा अधुनासत्योक्तेनैवहेकानुक्तभयान्

ग्रहस्य सुहृन्मध्यस्थशत्रूंश्चाह ल्लविक्रीडितहेनाह ॥ पठंति ॥ शत्रू मंदसितौ समश्च श
शिजो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ॥ जीवें
दूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्कीः समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः स
माश्चापरे ॥१६॥ शत्रु मंदसितादिति ॥ रवेरादित्यस्य मंदः सौरः सितः शुक्रः एतो शत्रू रिपु ॥
शशिजो बुधः समो मध्यस्थः ॥ न शत्रुर्न मित्रमुदासिन इत्यर्थः ॥ शेषाः ग्रहाश्चंद्रागार
कगुरवो मित्राणीति ॥ तीक्ष्णांशुरित्यादि ॥ शीतगोश्चंद्रमसः तीक्ष्णांशुः सूर्यो हिमरा
शिजो बुधः एतौ सुहृदौ मित्रे ॥ शेषाः सर्व एव भौमजीवशुक्रसौराः समा मध्यस्था उदा
सीनः ॥ जीवेंदूष्णकरा इति ॥ कुजस्य भौमस्य जीवो बृहस्पतिः इंदुश्चंद्रः उष्णकरः सू
र्यः सुहृदो मित्राणि ॥ ज्ञो बुधः शत्रुः ॥ सितार्की ॥ शुक्रसौरौ समौ मध्यस्थाविति ॥ मित्रे

सूर्यसितावितिः॥ सूर्योरविः सितः शुक्रः एतौ बुधस्य मित्रे सुहृदौ॥ हिमगुश्चंद्रमाः
शत्रुररिः॥ अपरे ऽन्ये भौमगुरुसौराः समा मध्यस्थाः इति॥ १७॥ सूरे सौम्यसितावरी र
विसुतौ मध्यो परे त्वन्यथा सौम्याकः सुहृदौ समो कुजगुरु शुक्रस्य शेषावरी॥ शुक्रज्ञौ सु
हृदौ समः सुरगुरुः सौरस्य चान्ये रयो ये प्रोक्ताः स्वत्रिकोणभादिषु पुनस्ते मी या कीर्तिता॥ १७
सूरेरित्यादि॥ सूरेर्बृहस्पतेः सौम्य बुधः सितः शुक्रः एतावरी शत्रू॥ रविसुतः सौरो मध्य
स्थः॥ अपरे अन्ये रविचंद्रभौमाः अन्यथा ... मीत्यर्थः॥ सौम्याकस्त्यादिर्थः॥ शुक्रस्य
सौम्यार्कौ बुधसौरौ सुहृदौ मित्रे॥ कुजो भौमः गुरुर्जीवः एतौ समौ मध्यस्थौ॥ शेषावादि
त्यचंद्रावरी शत्रू॥ शुक्रज्ञावित्यादि॥ सौरस्य शनैः शुक्रज्ञौ सितबुधौ सुहृदौ मित्रे॥ सुरगु
रुर्जीवः समा मध्यमः॥ अन्ये अपरे रविशशिभौमाः अरयः शत्रवः॥ ये प्रोक्ता इत्यादि॥

येमयास्यत्रिकोणभादिषुपूर्वंत्रिकोणभवनात्स्वांसधीधर्मपाइत्यादिग्रंथेनोक्तास्तएवेह
प्रविभज्यपुनर्भूयःप्रकीर्तिताउदाहरणत्वेनप्रदर्शिताइति॥एवंनैसर्गिकमित्रामित्रमध्य
स्थविभागःशार्दूलविक्रीडितेनाह॥अन्योन्यस्यधनव्ययायसहजव्यापारबंधुस्थितास्त
त्कालेसुहृदःस्वतुंगभवनेप्येकेरयस्त्वन्यथा॥द्व्येकानुक्तान्भपान्सुहृत्समरिपून्संचिंत्यनै
सर्गिकान्तत्कालेचपुनस्तुतानधिसुहृन्मित्रादिभिःकल्पयेत्॥१८॥अन्योन्यस्यपरस्प
रमेतेषुधनादिषुस्थानेषुग्रहस्यग्रहाव्यवस्थितास्तत्कालेजन्मनियात्रायांविवाहेप्रश्ने
वातस्मयेसुहृदोमित्राणिभवंति॥धनस्थानंद्वितीयव्ययस्थानंद्वादशमायस्थानमे
कादशसहजस्थानंतृतीयव्यापारस्थानंकर्माख्यंदशमंबंधुस्थानंचतुर्थं॥एतेषुस्था
नेषुयोग्रहस्थितःसयस्मात्ग्रहात्व्यवस्थितस्तस्यसुहृन्मित्रंभवति॥सचतस्या

वृ०
४१

पि भवति॥ यत उक्तं मन्योन्यस्य ति॥ स्वतुंग भवनेप्येकइति॥ एके न्य पुनराचार्याः ग्रहस्य यस्योच्चयो ग्रहः स्थितः स यस्योच्चे स्थितस्तस्य तात्कालिकं मित्रमिच्छंति ते च यवनेश्वरा दयः॥ तथा च तद्वाक्यं॥ मूलत्रिकोणाद्दन धर्म्मबंधुपुत्रव्ययस्थानगतग ताग्रहेन्द्राः॥ तत्का ल मे ते सुहृदो भवंति स्वोच्चे च ये यस्य विहृष्टवीर्या इति॥ एतदप्याचार्यस्य नाभिप्रेतं॥ य स्मादनेनैव स्वल्पजातके उक्तं॥ तत्काले च दशाम बंधु सहज स्वांत्येषु मित्रं स्थिता इति॥ अपरं पतन्यथेति॥ अन्यथा अन्येन प्रकारेण ग्रहस्य ग्रहव्यवस्थितास्तत्कालेऽरयः शत्रवो भवंति॥ अन्योन्यमिति॥ तद्यथा॥ एकराशिगतः पंचम षष्ठः सप्तमाष्टम नवमस्थानस्थ त त्कालं शत्रुर्ग्रहस्य ग्रहो भवति॥ द्व्येकानुक्तान्नपानिति॥ पूर्वं सेवदर्शितान् द्वितीयत्र पाने कत्रपानतुक्तत्रपांश्च मित्र मध्यस्थ शत्रून्नैसर्गिकांश्छत्रूमंदसिताविद्यादिना

जा०

ग्रंथे नोक्तास्तान्संचिंत्य विज्ञाय तत्काले जन्मादौ तानेवाधिसुहृन्मित्रादिभिरुपलक्षिता
न्कल्पयेत्॥ तत्र धनादीनि मित्रस्थानानि तेषु नैसर्गिकसुहृत् स्थितोऽधिमित्रं भवति॥
मध्यस्थो मित्रं॥ शत्रुर्मध्यस्थ इति॥ धनादिवर्जितेष्वन्येषु स्थितो निसर्गसुहृन्मध्यस्थो
भवति॥ मध्यस्थः शत्रुः शत्रुरधिशत्रुरिति॥ अत्र ग्रहाणां चतुर्विधं बलं स्थानदिक्[illegible]चेष्टाकाल
बलाख्यं॥ तत्र तावत्स्थानदिग्बलं दोधकेनाह॥ स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्व
गृहोपगतैश्च॥ दिक्षु बुधांगिरसौ रविभौमौ सूर्यसुतः शितशितकरौ च॥१९॥ स्वग्रहाणां
प्रत्येकमभिसंबध्यते॥ तत्र स्वोच्चे स्थितो ग्रहो बलवान् भवति॥ तात्कालिकस्य सुहृदो मि
त्रस्य क्षेत्रे स्थितो बलवानेव॥ स्वत्रिकोणे आत्मीयमूलत्रिकोणे स्थितः स्वनवांशे स्थि
तः स्वगृहे स्वराशावुपागतः प्राप्तो बलवानेव॥ एतेषामन्यतमेष्ववस्थितो ग्रहः स्थ

२०
१०

जो०

नबलयुतो भवति॥ तत्रार्कस्य सिंहः त्रिकोणं॥ तदेव स्वगृहमन्यत्र॥ चंद्रस्य वृषउच्चः स एव त्रिकोणं॥ भौमस्य मेषस्त्रिकोणं॥ तदेव स्वमन्यत्र॥ शुक्रस्य तुला त्रिकोणं तदेव स्वमन्यत्र॥ सौरस्य कुंभस्त्रिकोणं तदेव स्वमन्यत्रं॥ एतेषामाचार्यस्य विशेषो नोक्तः॥ अस्माभिरन्यहोराशास्त्रादेशेनीय शिष्यहिताये हलिख्यते॥ तथा च सारावल्यां॥ विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य॥ उच्चभागत्रितयं वृषइंदोः स्यात्त्रिकोणमपरेंशाः॥ द्वादशभागा मेषे त्रिकोणमपरे स्वभं तु भौमस्य॥ उच्चफलं कन्यायां बुधस्यातुंगांशकैः सदा चिंत्यं॥ परतस्त्रिकोणजातः पंचभिरंशैः स्वराशिजं परतः॥ दशभिर्भागैर्जीवस्य त्रिकोणफलं स्वभे परं चापे॥ शुक्रस्य तु तिथयोंशास्त्रिकोणमपरे घटे ७ स्वराशिश्च॥ कुंभे त्रिकोण निजते रविजस्य रवेर्यथा सिंहे॥ एतदार्याचतुष्टयं॥ दिमुबु

१०

धांगिरसा वित्यादि॥ प्राच्याद्यासु चतसृषु दिक्षु क्रमाद्बुधादयो बलिनो वर्तंते॥ तत्र पूर्वस्यां
बुधांगिरसौ ज्ञजीवौ बलिनौ भवतः॥ लग्नस्था वित्यर्थः॥ दक्षिणस्यां रविभौमौ सूर्यां
गारकौ दशमस्था वित्यर्थः॥ पश्चिमायां सूर्यसुतः शनिः सप्तमस्थ इत्यर्थः॥ उत्तरस्यां सि
तशीतकरौ शुक्रचंद्रौ चतुर्थस्था वित्यर्थः॥ यो ग्रहो यत्र बली स तस्मात्सप्तमस्थानस्थो
विबलो भवति॥ मध्ये त्वनुपाततुल्यमिति॥ सर्वं चेयं परिभाषा ग्रहणामुच्चनीचप्रविभा
गे राशीनां दिग्बलप्रविभागेपि॥ तथा च यवनेश्वरः॥ गुर्वैंदवौ पूर्वविलग्नसंस्थौ नभ
स्तलस्थौ च दिवाकरारौ॥ सौरोस्तगः शुक्रनिशाकरौ तु जलेस्थितौ तौ सबलौ भवेता
मिति॥ अन्यबलेग्रहणांतरेनुपातत एव युक्तः॥ एतद्ग्रहाणां दिग्बलमुच्यते॥ अधु
नाचेष्टाबलं दोधकेनाह॥ उदयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः॥

ग
६०

ज्यो॰
५१

विपुलकरा युधि चोत्तरसंस्था स्निग्धा(?) ह्यतिवीर्ययुताः परिकल्प्याः॥२०॥ उदगयनेति॥ मक

रादिषड्राशिषुत्तरमयनं॥ कर्कटादिराशिषट्के दक्षिणमयनमिति॥ उदगयने उत्त

रायणे रविशीतमयूखौ सूर्यचंद्रमसौ बलिनौ भवतः॥ परिशेषाः भौमबुधगुरुसित

सौराः वक्रगा विपरीतगतयो बलिनो भवंति॥ तथा च॥ समागमगताश्चंद्रेण सहिताः

बलिन एव॥ चंद्रेण सह संयोगो ग्रहाणां समागमशब्दो वाच्यः॥ रविणा सहास्तमयो

भौमादीनां परस्परं युद्धं॥ उक्तं चाचार्यविष्णुचंद्रेण॥ दिवसकरेणास्तमयः समागमः

शीतरश्मिसहितानां॥ कुसुतादीनां युद्धं निगद्यते सोन्ययुक्तानामिति॥ विपुलकरा

इति॥ विपुलाः करा येषां ते विस्तीर्णरश्मयो बलिनो भवंति॥ शीघ्रकेंद्रे द्वितीयत्रितीय

परस्य ग्रहस्य विपुलकरत्वं प्रायः संभवति॥ वक्रासन्नत्वात् युधि संग्रामे चोत्तर

संस्थाबलिनएव॥कुसुतादीनां युद्धमित्युक्तं॥ तत्र यदुत्तर दिग्भागसंस्थितो जयस च बल

वान्॥उत्तरसंस्थत्वमत्रोपलक्षणार्थं॥यस्तत्र जयीस एव बलवान्॥ तत्रैतज्जयलक्षणं॥

दक्षिणादिक्स्थः परुषो वेपथुरप्राप्य सन्निवृत्तेनुः॥अधिरूढो विकृतो निःप्रभो विवर्ण

श्च यः स जितः उक्तविपरीतलक्षणसंपन्नो जयगतो विनिर्दिष्टः॥ विपुलः स्निग्धो द्युति

मान् दक्षिणदिक्स्थोपि जययुक्त इति॥ एतच्च शुक्रस्य प्रायः संभवति॥ यस्माद्युलिशाचा

र्यैः॥ सर्वजयिनउदक्स्थाद्दक्षिणदिक्स्थो जयी शुक्र इति॥ एतच्चेष्टाबलं॥ एषामन्यतमे

न संयुक्तश्चेष्टाबलयुक्तो भवति॥५॥ अधुना ग्रहाणां कालबलं नैसर्गिकबलं चमालि

न्याह॥ निशि शशिकुजसौराः सर्वदा ज्ञो न्हि चान्ये बहुलसितगताः स्युः क्रूरसौम्याः क्रमे

ण॥ अयनदिवसहोरामासपैः कालवीर्यं न रुबुगुरुशुचसाद्यावृद्धितो वीर्यवंतः॥२१॥

निशीति॥शशिकुजसौराः चंद्रभौमशनैः यनिशिरात्रौवीर्यवंतौबलिनः॥ज्ञोबुधः सर्व
दासर्वस्मिन्काले निशिदिनेचबली॥अन्येऽपरेरविगुरसिताः अन्हिदिनेक्रूराः पापग्र
हाः प्रागुक्ताबहुलेकृष्णपक्षेबलिनः॥सौम्याः शुभग्रहाः सितगताः शुक्लपक्षेबलिनः॥
कृष्णपक्षेचंद्रमाक्रूरोपिबलवान्नभवति॥यस्माद्यवनेश्वरः॥मासेतुशुक्लप्रतिपत्प्र
वृत्तिः पूर्वेरात्रीमध्यबलोदशाहे॥श्रेष्ठो द्वितीयेऽल्पबलस्तृतीयेसौम्यस्तुदृष्टोबल
वानसदैव॥अयनेति॥ह्रेअयनेगमणयस्यततदयनंनर्पः॥स्ववर्षेआत्मीयवर्ष
योग्रहोयत्रवर्षेधिपतिः सतत्रबलवान्॥स्वदिवसेआत्मीयवासरे॥स्वहोरायांका
लहोरायां॥तथास्वमासेयस्मिन्मासेयोधिपतिः सतत्रबलि॥अयनदिनहोरामास
नांयोधिपतयस्तैर्ग्रहैः कालवीर्यमुपलक्षणीयंते॥कालबलापेताः स्वर्थः केचिद्य

येन दिवसहोरामासपैरितिपठंति॥ अन्येस्य दिवससमहोमासपैरिति पठेत्येषु सापराधः
पाठः॥ एतेषु कालेषु सर्व एव बलिनो भवति॥ एतद्ग्रहाणां कालवीर्यं॥ एतेषामन्यतमेन सं
युक्तो ग्रहो कालसंपन्नो भवति॥ आरबुगुशुचस एते वर्णा आद्या एषां॥ आकाराद्यः आने
श्चरः॥ सर्वेभ्यो हीनबलः॥ रकारो रधिरः स तस्मात् आनेश्चरात् बलवान्॥ उकाराद्यो
बुधः॥ स भौमाबलवान्॥ गुकाराद्यो जीवः स बुधाद्बलवान्॥ शुकाराद्यः शुक्रः स गुरो
र्बलवान्॥ चकाराद्यश्चंद्रः स शुक्राद्बलवान् सकाराद्यः सविता स चंद्राद्बलवान् भवति॥
एतद्ग्रहाणां नैसर्गिकं बलं॥ यस्मादनेनैव स्वल्पजातके उक्तं॥ मंदारसौम्यवाक्पतिसि
तचंद्रार्का यथोत्तरं बलिनः नैसर्गिकबलमेतद्बलसाम्येस्मादधिकं चिंताइति॥ यत्र ग
हयोर्ग्रहाणां वा बलसाम्ये भवति॥ तत्रास्माद्बलाधिकवीर्यता ज्ञेयेति॥ अत्राचार्ये

णां चतुःप्रकारस्य ग्रहाणां बलस्य फलं नोक्तं तच्चास्माभिरन्यशास्त्राल्लिख्यते॥ तथा च
सारावल्यां॥ उच्चबलेन समेतः परां विभूतिं ग्रहः प्रसाधयति॥ स्वत्रिकोणबलः पुंसां
संचिंत्यं बलतिलं च॥ स्वर्क्षबलेन च सहितः प्रमुदितधनधान्यसंपदाक्रांत॥ मित्र
भ बलेन संयुक्तो जनयति कीर्त्यान्वितं पुरुषं॥ तेजस्विनमितिसुखिनं सुस्थिरविभ
वं नृपाच्चलब्धधनं॥ स्वनवांशबलयुक्तः करोति पुरुषं प्रसिद्धं च॥ सूक्ष्मजातके उक्तं॥
बलवान्मित्रस्वगृहोच्चनवांशकेष्वंक्षितः शुभैश्चापि॥ चंद्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रे
पुगाः शेषाः इति॥ तत्र शुभदृष्टस्य फलं॥ शुभदर्शनबलसहितः परूषं कुर्याद्बला
न्वितख्यातं॥ सुभगं प्रधानमखिलं सुरूपं देहं सुसौम्यं च॥ पुंस्त्रीभवनबलेन च करो
क
तिजनपूजितं कलौशालं॥ पुरुषं प्रसन्नचित्तं कल्यं परलोकभीरूं च॥ आशाबलसमवे

तो जनयति स्वदशां नभश्चरः पुरुषं॥ नीलावस्त्रविभूषणवाहनसौख्यान्वितं॥ वक्षिण
स्तु महावीर्याः शुभा राज्यं प्रदा ग्रहाः॥ पापा व्यसनदाः पुंसां कुर्वंचरथाटनं॥ स्वस्थ न्नारी
रसमागमसुखमहतं जयबलेन विदधाति॥ शुभमतुलं विहगेंद्रो राज्यं च विसर्जिता
रातिः॥ रात्रिदिवाबलपूर्णै भूगजलाभेन शौर्यपरिवृद्धा॥ मलिनयति शत्रुपक्षं भज
ति चलक्ष्मीर्न भश्चरैः पुरुषः द्विगुणं द्विगुणदधुर्वर्षाधिपमासदिवसहोरेशाः॥ क्र
मपरिवृद्ध्या सौख्यं स्वदशासु धनं च कीर्तिं च॥ यस्स बलाद्रिपुनाशं रक्तांबरहस्तिसं
पं दद्युः॥ स्त्रीकनकभूमिलाभं कीर्तिं चन्द्राशाककरधवलं॥ सकलबलभारभरितं
निर्मलकारजालभासुराः सततं॥ राज्यं ग्रहा विदधुः सौख्यं च मनोरथातीतः॥ आचा
रसत्यशुभशौचयुताः सुरूपास्तेजस्विनः स्तत विरो द्विजदेवभक्ताः॥ सहस्त्रमाल्यज

नभूषणसंप्रियाश्चसौम्यग्रहैर्बलयुतैः पुरुषा भवंति॥लुब्धाः कुकर्मनिरताः निज
कार्यनिष्टाः पापान्विताः सकलहाश्चतमोभिभूताः॥क्रूराः शठा बधरताः मलिनाल्
तघ्नाः पापग्रहैर्बलयुतैः पिशुनाः कुरूपीः॥पुंराशिषुग्रहेंद्रैः धराः संग्रामकोस्मिणो
बलिनः॥निम्ने हास्तु कठोगः क्रूरामूर्खाश्च जायंते॥युवतिभवनस्थितेषुचमृदवः
सर्वसुगमं॥५॥इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ ग्रहयोनिभेदाध्या
योद्वितीयः॥२॥५॥५॥अथातोवियोनिजन्माध्यायोव्याख्यायते॥कः पुनरर्थो वि
योनिजन्मेत्युच्यते॥तत्र भट्टः सका 'शाज्जातककालप्रश्नकालं वा विज्ञाय वियोनि
जन्मनिश्चयज्ञानं भवति॥तच्च वसंततिलकेनाह॥क्रूरग्रहैः सुबलिभिर्विबलैश्च सौ

न्मै क्लीबे च तुरग यग ते तद्दे वस्तणाद्दा॥ चंद्रोपगद्विरसभागसमानरूपंसत्वंवदेयदि
भवेत्तस्य योनिसंज्ञः॥१॥५॥ चंद्रोपगद्विरसभागेति॥ चंद्रमा उपगतो व्यवस्थितो यस्मि
न् द्विरसभागे द्वादशभागे॥ तत्समानरूपं तत्सदृशं रूपं सत्वं प्राणिनं वियोनिजन्मानं
वदेत् तस्य च द्विरसगे यदि वियोनिसंज्ञो भवति॥ स चंद्राक्रांतो द्वादशभागो यदि वियो
निसंज्ञस्तदैव वदेन्नान्यथेति॥ तत्र मेषद्वादशभागव्यवस्थिते चंद्रमसि मेषाख्यस्य
वियोनिजन्म ज्ञातव्यं॥ अजादिछागोदः॥ एवं वृषद्वादशभागव्यवस्थिते वृषाख्य
स्य महिषादेश्च॥ कर्कटद्वादशभागव्यवस्थिते कुलीरादेः॥ सिंहद्वादशभागव्यवस्थि
ते सिंहद्वीपिसृगालव्याघ्रमार्जारादिश्वापदानां जन्म॥ वृश्चिकद्वादशभागव्यवस्थिते
सर्प्पकीटादेः॥ धनुर्द्धरद्वादशभागे द्वितीयार्द्धव्यवस्थिते अश्वगर्द्दभजन्म॥ ० मकरद्वा

दशभागे पूर्वोद्दिष्टव्यवस्थिते मृगजन्म॥ अपरे मंडूकादेर्जलप्राणिन इच्छंति॥ मीनमी
नस्यैव॥ किमेतावतैव विहगयोनिजन्मनिश्चयो नेत्याह॥ क्रूरग्रहैरित्यादि॥ क्रूरग्रहैः सदि
त्यंगारकशनैश्चरैर्बुधेन च तदेकतमेन युक्तेन क्षीणेन चंद्रमसा एतैः सुबलिभिरिति
बलसंयुक्तैः सौम्यैः शुभग्रहैः क्रूरैरपरिशिष्टैर्विबलैर्वर्यरहितैः क्लीबे शनैश्चरे बुधे
वा चतुष्टयगते केंद्रस्थे॥ एको विहगयोनिजन्मयोगः॥ तदेवेक्षणाद्दा॥ चंद्रमसि प्रदर्शित
विहगयोनिजन्मद्वादशभागव्यवस्थिते॥ क्रूरैर्बलयुक्तैः सौम्यैर्विबलैर्हरनबलैर्यत्र त
त्रावस्थितेन बुधेन शनैश्चरेवा लग्ने दृष्टे विहगयोनिजन्मज्ञाने द्वितीयो योगः॥ अर्था
देव द्विपदद्वादशभागव्यवस्थिते चंद्रमसि पूर्वोक्तयोगाभावे द्विपदजन्म॥ तथा च सा
रावल्यां॥ क्रूरैः सुबलसमेतैर्विबलैः सौम्यैर्विहगनिभागगते॥ चंद्रज्ञशनी केंद्रे तद्दोस्थि

तैश्चोदये वियोनिः स्यात्॥ मेषेंशेंशी तदंशोच्छागादिप्रसवमाहुराचार्याः॥ गोमाहिषाणां
गोंशे नररूपाणां त्रितीयेंशे॥ तत्र चतुर्थे भागे कूर्म्मादीनां भवेदुदकज्ञानं॥ व्याघ्रादीनां परतः
परतो ज्ञेया नराणां च॥ वणिगंशे नररूपा रश्चिकभागे तथा भुजंगाद्याः नवमे मृगशि
षिस्यात्तथा दशमे॥ ज्ञेयाश्च तत्र विविधाश्चक्रस्त्वणजातपक्षिणाः॥ एकादशे च पुरुषा
जलजा नानाविधाश्चांत्ये॥ श्वमार्जारमुषिकादीनां संख्याज्ञानं॥ श्वप्रभृतीनां प्रभ
वेयां वंतो द्वादशांशके लग्ने॥ तावंति एव वदेत्प्राज्ञः पुंस्त्रीसंज्ञान्यपत्यानि॥ अथ वियो
निजन्मज्ञानयोगोतरं वैतालिकेनाह॥ पापा बलिनः स्वभागगाः पारक्ये विबला श्चशु
भ नालग्ने च वियोनिसंज्ञकं दृष्ट्वात्रापि विनिर्मादिशेत्॥२॥ चंद्रापगद्विरसभागस
मानरूपं मित्यनुवर्तते॥ पापाः क्रूरग्रहाः प्रागुक्तबलिनः सबलाः न केवलं यावत्स्व

भागाः स्वनवांशस्थाः॥ भागग्रहणेनेह नवांशक एव ज्ञातव्यः॥ शोभनाः सौम्यग्रहाः
प्रागुक्ता पारक्ये परनवांशके विबलावीर्यहीनाव्यवस्थिताः॥ लग्नं तात्कालिकं च यदि
वियोनिसंज्ञिकं भवति॥ तदाप्यस्मिन्नपि योगे चंद्रोपगद्विरसभागसमानरूपं सत्वं
जातमिति वदेत्॥७॥ अथ वियोनावपि चतुःपदानां प्राधान्येनोपयोगित्वान्नरांगवि
भागं राश्यात्मकमुपजात्याह॥ क्रियः शिरो वक्त्रगले वृषोन्ये पादांसकं पृष्ठमुरोथ पा
र्श्वे॥ कुक्षिस्त्वपानांघ्र्यथ मेढ्रमुष्कौ स्फिक्पुच्छमित्याह चतुष्पदांगे॥३॥ क्रियो मेषश्चतुष्प
दानां शिरस्तदुपलक्षितमित्यर्थः॥ वृषो वक्त्रे गले वक्त्रं मुखं॥ लंबकंठो वृषः॥ अन्यो मि
थुनादयो यथाक्रमं पादादि॥ मिथुनः पादांसके पादौ पूर्वपादावंसौ स्कंधौ पृष्ठं कर्कटः॥
उरो वक्षः सिंहः॥ अथशब्द आनंतर्ये॥ पार्श्वे पार्श्वद्वयं कन्या॥ कुक्षिद्वयं तुला॥ अपा

नं गुरोरश्चिकः अंघ्रीपश्चिमपादो धन्वी॥ अथ शब्दः॥ पादपूरणे मेढ्रं लिंगं मुष्कौ वृषणौ म
करः॥ स्फिकौ कुंभः॥ पुछं लांगुलं वृष इति शब्दः प्रकारार्थ॥ केचिच्चतुष्पदांगेराशिविभागे
आह॥ केचिद्वदंतीत्याचार्या इति वाक्याध्याहारः॥ चतुष्पदग्रहणमुपलक्षणार्थं॥ पक्षिण
मप्येवं॥ तेषां पूर्वपादस्थाने पक्षपाः शेषं सामान्यं॥ प्रयोजनं॥ राश्युपलक्षितेंगे वर्णोपा
घातादेर्विज्ञानमिति॥ अथ वियोनिवर्णज्ञानं वैश्यदेव्याह॥ लग्नांशकाद्ग्रहयोगेक्षणा
द्वा वर्णान्वदेद्बलयुक्ताद्वियोनौ॥ दृश्यासमानासु वदेच्च संख्यया रेखां वदेत्स्मरसंस्थे
ष्वपृष्ठे॥४॥ लग्नेये न ग्रहेन योगो यस्तत्र व्यवस्थितस्तस्य यो यो वर्णः प्रोक्तो वर्णान्ता
म्न सितातिरिक्तहरिता इति॥ तद्वर्ण वियोनौ सवलजातौ वदेत्॥ हष्टनष्टेदेवा॥ ईक्षणाद्दि
ति॥ अथ लग्ने न कश्चिद्ग्रहो भवति तदा ये न ग्रहेण लग्नमीक्ष्यते दृश्ये तस्य यो वर्णस्तं वव

देत्॥ अथ लग्नं न केनचिद्युतं दृष्टं भवति तदा लग्नांशकात् लग्ने यद्राशिनवांशकेदयोस्त
द्राशिवर्णरक्तः श्वेतादिकं वा वदेत्॥ दृष्ट्यासमानामिति॥ अथ बहुभिर्ग्रहैर्लग्नं युक्तं दृष्टं
भवति तदा बहूनेव वर्णान्वदेत्॥ तत्रापि यो वीर्यवान्स बलस्तद्वर्णबाहुल्यं॥ यत उक्तं॥
बलयुक्तादिति॥ अथ लग्नस्य स्वामिनायुतं दृष्टस्य राशेः संबंधि वा नवांशकोदयो तभव
ति॥ तदा तद्वर्णमेव वदेत्॥ यत्र यो ग्रहो वियोनौ यस्मिन्नंगे व्यवस्थितस्तत्रासौ यवर्णं
तस्मिन्नंगे करोति॥ एतत्कृतौ लब्धं॥ रेखां वदेत्स्मर संस्थैश्च दृष्टे इति वचनात्॥ लग्ना
त्स्मर संस्थैः सप्तमस्थानगतैर्ग्रहैर्बलवद्भिः वर्णान्दृष्टे वियोनौ रेखां वदेत्॥ तथा च सा
रावल्यां॥ मेषादिभिरुदयस्थैरंशैर्वा ग्रहयुतैश्च दृष्टैर्वा॥ स्वग्रहांशकसंयोगाद्विधाद्व
र्णान्यराशिकेस्तौ॥ सप्तमसंस्थाः कुर्युः दृष्टे रेखां स्ववर्णसमां वीक्ष्यं ते यावंतो वियो

निवर्णाश्च तावंतः॥ बलदी सोगगनचरः करोति वर्णं वियोनीनां॥ पीतं करोति जीवः शशी

सितं भार्गवो विचित्रं च॥ रक्तो दिनकर रुधिरौरविजः कृष्णं बुधः शबलं॥ स्वेराशौ परभागे

परराशौ स्वेन वांशके तिष्टन्॥ पश्यन् ग्रहो विलग्नं स्ववर्णतरां कुरुते॥ अथुनापक्षिणो जन्म

ज्ञानं वदास्थेनाह॥ खगेदृष्काणे बलसंयुतेन वा ग्रहेण युक्ते चरभांशकोदये॥ बुधांशके

वा विहगाः स्थलांबुजाः शनैश्वरे हिमण योगसंभवाः॥५॥ खगेदृष्काण इति॥ खगद्रेष्का

णाः तत्र पक्षिद्रेष्काणा मिथुन द्वीतियः सिंह प्रथमः तुला द्वितीयः कुंभ प्रथमः एषामन्य

तमे द्रेष्काणे उदयति शनैश्वरं द्वीक्षण यागसंभवाः यथाक्रम विहगाः पक्षिणः स्थलांबु

जा संभवंति॥ पक्षिद्रेष्काणे शनैश्चरेण युक्ते दृष्टे वा स्थलजपक्षिणां॥ जन्म वक्तव्यं॥ ए

वमिंदुना युक्ते दृष्टे वा जलजानां पक्षिणामिति॥ एको योगः॥ अत्र लग्ने प्रथमे भागाद

शकोयोग्रहः स्थितः प्रथमद्रेष्काणस्थः॥ ततः परमान्यस्मिन्दशके द्वितीयद्रेष्काणस्थः
स्ततः परमऽन्यस्मिन्दशाके तृतीयद्रेष्काणस्थ इति॥ एवं च त्रयो भागा लिप्ताश्च विंशतिर्न
वांशकप्रमाणं परिकल्प्य स्थितिरन्वेष्या सर्वराशिष्वियं परिभाषा॥ बलसंयुतेन वा ग्रहेण संयु
क्ते चरभांशकोदये॥ यस्य तस्य लग्नस्य चरनवांशकोदये बलसंयुतेन ये ग्रहेण संयुक्ते
तथा युते शनैश्चरयुतदृष्टे स्थलजानां चंद्रयुतदृष्टे जलजानां जन्म जानं॥ द्वितीयो योगः॥
बुधांशके वेति॥ बुधनवांशके मिथुनकन्ययोरन्यतमे तात्कालिकस्य लग्नस्योदिते त
स्मिंश्च बलवद्ग्रहसंयुते शनैश्चरयुतदृष्टे स्थलजानां चंद्रयुतदृष्टे जलजानामिति॥
तृतीयो योगः॥ एतेशनैश्चरस्यंदो वा संयोगे दृष्टेन वा संभवंति॥ तथा च सारावल्यां॥ वि
हगोदितदृष्काणग्रहेण बलिना युते थ चरभांशे॥ बौधांशे वा विहगाः स्थलांबुजाः शनि

त्रा त्रीक्षणयोगात्॥ अधुना वृक्षजन्मज्ञानं वसंततिलकेनाह॥ होरेंदुसूरिरविभिर्विबले
स्तरूणां तोयस्थलेतरभवांशकृतप्रभेदः॥ लग्नाद्गृहैः स्थलजलर्क्षपतिस्तु यान्तावं
तत्तरवः स्थलतोयजाताः॥ ६॥ होरालग्नं इंदुः चंद्रः सूरी जीवः रविरादित्यः एतैर्विबलैः
वीर्यरहितैः अशातरूणां वृक्षाणां जन्मपृच्छतीति वक्तव्यं॥ अत्रायं विशेषः॥ तोयस्थल
इति॥ तत्र तरुभवो वृक्षजन्म कियं तोये जले स्थले निर्जले चेति॥ तत्प्रभेदस्तद्विकल्पो
शङ्कतो नवांशक विहितः॥ तत्र अयं राश्यंशकोदये तोयसमीपजातवृक्षान् नृपजा
ने तोयराशयः कर्कटमकरपश्चार्द्धमीनाः एतैरनूपजवृक्षजन्मेति ज्ञानं॥ इतररा
श्यंशकोदये स्थलवृक्षज्ञानं॥ तत्रापि संख्यायं॥ लग्नाद्गृहैरिति॥ उदितांशः स्थलचारी
जलचारी वा भवति॥ तदधिपतिर्यावत्संख्ये राशौ लग्नाद्व्यवस्थितस्तावंतएव संख्या

स्तरवोत्पत्ताः स्थलजाजलजानावात्क्व्याः॥ अत्राप्यंशकपतिवशादस्य माणायुर्दायवि
धिना द्वित्रिगुणत्वं वाच्यं॥ स्वतुंगवक्रोपगतैस्त्रिसंगुणं द्विरुत्तमस्वांशकभागगैरिति॥
अत्र द्वित्रिगुणत्वे प्राप्ते यावंत्यो गुणना भवंति तांस्य:॥ तथा च सारावल्यां॥ लग्नार्कजीव
चंद्रैरबलैः शेषैश्च मूलयोनिः स्यात्॥ स्थलजलभवनविभागाद्वृक्षादीनां प्रभेदकराः॥
स्थलजलपरखगोलग्नाद्यावतिरांशौ तु ते पि तावं स:॥ द्वित्रीगुणत्वं तेषामायुर्दायप्रका
रोक्तं॥ अधुना स्थलजलज्ञानमंशस्वामिवशाद्वृक्षाणां विशेषज्ञानं मंदाक्रांतयाह॥ अंतः
सारान्जनयति रविर्दुर्भगान्सूर्यसूनुः क्षीरोपेतांस्तु हिनकिरणः कंटकाढ्यांश्च भौमः॥
वागीशज्ञौ सफलविफलान्पुष्पवृक्षांश्च शुक्रः स्निग्धानिंदुः कटुकविटपान्भूमिपुत्रश्च भू
यः॥७॥ रविस्तु यो राशिपतिरंतस्सारान्॥ मध्ये दृढं स्थिरपादीन्वृक्षान्जनयति उत्पादयति॥

सूर्यस्तु रार्किदुर्भगान्दग्ध्वनसोरम्रियान्॥ कुकुरप्रभृतीन्जनयति॥ तुहिनकरण श्चंद्रः क्षीरोपेतान्क्षीरान्इक्षुप्रभृतीन्जनयति॥ भौमः कुजः कंटकाढ्यान्कंटकव हुलान्॥ खदिरप्रभृतीन्जनयति॥ वागीशा ज्ञाविति॥ वागीशो बृहस्पतिः ज्ञो बुधः ए तौ यथासंख्येन सफलविफलान्वृक्षान्जनयतः॥ तत्र बृहस्पतिः सफलान्आम्र वृक्षप्रभृतीन्॥ बुधो विफलान्मरारुकप्रभृतीन्॥ इंदुश्चंद्रः भूयः पुनः स्निग्धान्स चिक्कणान्धनवप्रभृतीन्जनयति॥ भूमिपुत्रोंगारकः कटुकविटपान्भल्लातकप्र भृतीजनयति॥ तत्रोभयजनितस निर्देशाच्चंद्रभौमयोर्विकल्पेनादेशाः॥ अधुनाभू मिगशुभाशुभज्ञानेसंख्यांश्चवंशाछेनाह॥ शुभोशुभसैर चिरं शुभं मिजं करोति वृक्षं वि परीतमन्यथा॥ परांशकेयावति विच्युतःस्वकाभवंति तुल्यास्तरवस्तथाभिधा॥ ८॥ शुभो

शुभर्क्ष इति॥ स एव स्थलजलांशपतिर्ग्रहः॥ शुभस्तत्कालमशुभर्क्षे पापराशौ व्यवस्थितो
भवति तदा रुचिरं तरुं शोभनं दृश्यं कुभूमिजं अशोभनभूमिजातं वदेत्॥ अन्यथा विप
र्यये विपरीतं दृश्यं करोति॥ अंशपतिरशुभस्तत्काले शुभगृहराशिस्थो भवति तदाऽ
शोभनं वृक्षं शोभनभूमिजातं वदेत्॥ परांशके यावतीति॥ स स्थलजलांशपतिर्ग्रहः स्व
कादांशीयादंशकाद्विच्युतश्चलितो यावत्संख्यपरनवांशके वर्तते तत्तुल्यास्तत्संख्या
स्तदोक्तास्तज्जातीयाश्च तरवो वृक्षा भवन्ति॥ तावन्त एव स्थलजा जलजा वा तरवः प्रा
क्संख्यया त्वयश्चेति॥ तत्र पुनः संख्याकरणाद्विकल्पेनादेश इति॥ तथा च सारावल्यां
स्वांशान्नासरांशगामिषु यावत्संख्या भवन्ति तावन्तः॥ स्थलजा वा जलजा वा तरवः प्रा
क्संख्यया प्रवदेदिति॥ ८॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ वियोनिज

न्माध्यायस्तृतीयः॥३॥ अथातो निषेकाध्यायो व्याख्यायते॥ तत्रादावेव ऋतौ सति गर्भा
धानमित्यतः ऋतुनिरूपणमृतावपि स्त्रीपुरुषसंयोगज्ञानं वंशस्थेनाह॥ कुजेंदुहेतुः
प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ॥ अतोऽन्यथास्थे शुभपुंग्रहेक्षिते न
रेण संयोगमुपैति कामिनी॥१॥ कुजेंदुहेतुरिति॥ कुजो भौमः इंदुश्चंद्रः तौ हेतुकारणं नि
मित्तं यस्य रजसः स कुजेंदुहेतुः मासं मासं प्रति मासं स्त्रीणां प्रतिमासमार्तवं कुजेंदुहे
तुः प्रतिमासग्रहणेन प्रथमोद्भूतरजोनिवृत्तिं दर्शयन् गर्भग्रहणस्य समार्तवं प्रद
र्शयति ऋतौ भवमार्तवं॥ कथमित्याह॥ गते तु पीडर्क्षमनुष्णदीधितौ इति॥ अनुष्ण
दीधितौ शीतमयूखे चंद्रे पीडर्क्षगते प्रकृतत्वात्स्त्रीणां मनुपचयगृहस्थिते आर्तव
कारणं भवति॥ अर्थादेव यदि चंद्रः कुजः संतुष्टो भवति॥ एतदुक्तं भवति॥ स्त्रियो जन्म

र्क्षादनुपचयसंस्थश्चंद्रमास्तत्रचयाद्यंगारकेण दृश्यते तदा गर्भग्रहणमार्तवमतीव
हेतुर्भवति॥ अन्यत्र बालवृद्धातुवंध्याभ्यः॥ अत्र स्यवादरायण॥ स्त्रीणां गतोनुपच
यर्क्षमनुष्यरश्मिः संदृश्यते यदि धरातनयेन तासां॥ गर्भग्रहार्तवमुशंतितदा न वंध्या
वृद्धातुराल्पवयसमापिचैतदिष्टं॥ तथाच सारावल्यां॥ अनुपचयराशिसंस्थे कुसुमाक
रबोधवे रुधिरदृष्टे॥ प्रतिमासं युवतीनां भवति हि रजो बुधैः प्रोक्तं॥ इंदुर्जलं कुजोग्निर्ज्ज
लमिश्रं वग्निरेव पितं स्यात्॥ एवं रक्तेक्षुभिते पितेन रजः प्रवर्त्तते स्त्रीषु॥ एवं यद्भवति
गर्भग्रहणमार्त्तवं॥ स्त्रीपुरुषसंप्रयोगसंभवासंभवौ प्रदर्शयति॥ अतोन्यथास्थ इति
जन्मराशेरुपचयस्थश्चंद्रमा यदि भवति तस्मिन्शुभेन सौम्येन पुंग्रहेण गुरुणेक्षितेन
दृष्टे कमिनी स्त्री नरेण पुरुषेण सह संयोगं मैथुनमुपैति गच्छतीति वक्तव्यं॥ नन्वत्रातोन्य

थास्तइति॥ स्त्रियाउपचयस्थः कस्मान्नव्याख्यायते॥ अयुक्तमेतत्॥ अधान्यासुरुषस्यै
व॥ यस्माद्बादरायनः॥ पुरुषोपचयगृहहस्थोगुरूणायदिदृश्यते हिममयूखः॥ स्त्री
पुरुषसंयोगंतदावदेद्न्यथानैवमिति॥ सारावलीकारेण सामान्येनोक्तं॥ तद्यथा॥ उप
चयभवनेशशिभृद्दृष्टोगुरुणासुहृद्भिरथवासौ॥ पुंसांकरोतियोगं विशेषतःशुक्रसंदृ
ष्टः॥ कस्मिन्कालेयविचारः॥ उच्यते॥ चतुर्थदिनेस्नातायाः॥ तथामणित्थः॥ ऋतुविरामेस्ना
तायोपचयुपचयस्थःशशिभवति॥ बलिनागुरुणादृष्टोभर्तासहसंगमश्चतदा॥ राजपुरु
षेणरविणाविदनभौमनवीक्षितेचंद्रे॥ सौम्येनचपलमतिनाभृगुणाकांतेनरूपवता॥
भृत्येनसूर्यपुत्रेणयातिसास्त्रीसमायोगं॥ एकैकेनफलंस्याद्दृष्टेचान्यैःकुजादिभिःपा
पैः॥ सर्वैस्वगृहंत्यक्त्वागच्छतिवेश्यापदंयुवतिं॥ अथमैथुनप्रकारज्ञानमिन्द्रवज्रयाह॥

यथास्तराशिर्मिथुनं समेतितथैव वाच्यो मिथुनप्रयोगः॥ असद्गृहालोकितसंयुते
स्ते सरोषइष्टैः सविलासहासः॥२॥ आधानलग्नाज्जन्मलग्नाद्वा प्रश्नकाललग्नाद्वा योऽस्त
राशिः सप्तमोऽस्तलग्नसंज्ञको योऽजंतुः तन्मिथुनं स्त्रीपुंसौ यथा येन प्रकारेण समेत
संयोगं सुरतं जातिं॥ तथा तेनैव प्रकारेण तस्य नरस्य मिथुनप्रयोगः संयोगो वाच्यो वाच्यः
तस्मिन्नेवास्ते सप्तमे स्थाने असद्गृहावलोकितसंयुते पापग्रहैर्दृष्टे युक्ते सवा
रोषः सकलहो मिथुनप्रयोगे वाच्यः॥ इष्टैः सौम्यैर्युतदृष्टे सविलासहास॥ विलासोहासः
सीत्कारादिसंयुते मिथुनप्रयोगो वाच्यः॥ अर्थादेव नकेचिद्युतदृष्टे न सरोषो नापि न
लह इति॥ मिश्रयुतदृष्टे सरोषः विलासहासश्चेति॥ तथाच सारावल्यां॥ द्विपदादयो वि
लग्नात्सुरतं कुर्वंति सप्तमे यद्वत्॥ तद्वत्सुरषाणामपि गर्भाधानं समादेश्यं॥ अस्ते शुभयु

तदृष्टेखरोषकलहंभवेद्ग्राम्यं ॥ सौम्यैः सौम्यं सुरतं वात्स्यायनसंप्रयोगमाख्यातं ॥ ५ ॥ क्ष
यगर्भसंभवासंभवं शास्त्रेनाह ॥ रवींदुशुक्रावनिजैः स्वभागगैर्गुरौत्रिकोणोदयसंस्थित
पि वा ॥ भवत्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ॥ ३ ॥ रविः सूर्यः इंदुः
चंद्रः शुक्रः सितः अवनिजो भूमितनयः एतैः स्वभागगैर्यत्र तत्र राशौ स्वनवांशकस्थै
राधानकाले ऽवश्यमेवापत्यं भवति ॥ गर्भसंभवो भवतीत्यर्थः ॥ यदि च तत्सर्वे स्वभागगा
न स्युस्तदा पुरुषोपचयर्क्षगाभ्यां सूर्यसिताभ्यां स्वनवांशकस्थाभ्यामाधानकाले ऽवश्य
मेवापत्यं भवति ॥ गर्भसंभवो भवतीत्यर्थः ॥ यस्मादनेन स्वल्पजातके नोक्तं ॥ बलयुक्तौ
स्वगृहांशोषर्कसितौ उपचयर्क्षगौ पुंसां ॥ स्त्रीणां वा कुजचंद्रौ यदा तदा संभवति गर्भः ॥
गुरौत्रिकोणोदयसंस्थितेपि वा इति ॥ गुरौ बृहस्पतौ त्रिकोणनवपंचमयोरुदये लग्नेपि

वासंस्थितेएषामन्यतमस्थानस्थेपिभवत्यसंभवोगर्भग्रहणं॥विबीजिनामिमेइति॥हि
यस्मादर्थे॥एतेहियोगाःविबिजानांविगतंबीजंवीर्यंएषांस्त्रीपुरुषाणांतेषामफलाविद्य
मानाअपिसंभवंति॥अत्रोदाहरणं॥कराहिमांशोर्विदग्धानिवाफलाइति॥यथाहिमां
शोःशीतरश्मेःचंद्रस्यकराररश्मयोविद्यमानाअपिविदग्धानांधानामफलानिःफलाः॥वि
गतादृष्टिर्येषांतेविदग्धाःतेषामिवेति॥अधुनास्त्रीपुंसयोराधानकालवशादाप्रसवाव
धिंयावत्शुभाशुभज्ञानंवंशस्थेनाह॥दिवाकरेंदोःस्मरगौकुजार्कजौगदप्रदौपुंगल
योषितस्तदा॥व्यवस्थगौमृत्युकरौयुतौतथातदेकदृष्ट्यामरणायकल्पितौ॥४॥दिवा
करात्सप्तमस्थानस्थौकुजार्कजौ॥कुजोगारकःअर्कजःसौरः यदिभव
तः॥तदापुंगलस्यमनुष्यगदप्रदौरोगप्रदौभवतः॥एवंचंद्रात्स्मरगौसप्तमस्थानस्थौ

कुजार्कजौ यदि भवतः॥ तदा योषितः स्त्रियः गदप्रदौ भवतः॥ एतदुक्तं भवति॥ आधाने
काले यत्रार्कस्थितस्तस्मात्सप्तमे स्थाने यदाङ्गारको भवति सौरो वा तदा पुंसो रोगप्रदो
भवति॥ स्वमासे॥ एवमिन्दोः॥ चंद्रात्सप्तमे भौमः सौरो वा भवति तदा योषितः स्त्रियो रो
गप्रदो भवति॥ स्वमास एव॥ व्ययस्वगौ मृत्युकराविति॥ तावेव कुजसौरौ व्ययस्वगौ द्वा
दशद्वितीयगौ तयोर्दिवाकरेन्द्वोः सकाशात्तदुभयत्र पार्श्वस्थितयोस्तदा पुंगलयोषि
तोः स्त्रीपुरुषयोर्मृत्युकरौ भवतः॥ एतदुक्तं भवति॥ सूर्याद्देको द्वादशो द्वितीये तदा त
योर्मध्याद्यो बलवान्स स्वमासे मृत्युकरो नरस्य भवति॥ चंद्रादप्येवं व्यवस्थिते॥ चं
द्राद्देको द्वादशो द्वितीयो द्वितीये तदा तयोर्मध्ये यो बलवान् स स्वमासे मृत्युकरः स्त्रि
यो भवति॥ युतौ तथेति॥ तदिति कुजसौरयोः परामर्शः तयोः कुजशनैश्चरयोर्म

६४

जा०

ध्याद्यद्रेकेनादित्योयुतः सहितो भवत्यन्येनदृश्यते॥ तदानरस्य मरणायकल्पितो निश्चितः॥ एवं चंद्रमायद्येकेनयुक्तो भवत्यपरेणदृष्टः॥ तदास्त्रियो मरणायकल्पितः॥ द्वयोर्मध्ये यो बलवान् तस्यस्य मासेइति॥५॥ अथ निषिक्तस्य पितृमातृपितृव्यमातृस्वसृणां शुभाशुभं ज्ञानं वंशस्थेनाह॥ दिवार्कशुक्रौ पितृमातृसंज्ञितौ शनैश्चरेन्दू निशि तद्विपर्ययात्॥ पितृव्यमातृष्वसृसंज्ञितौ तावयोजयुग्मर्क्षगतौ तयोः शुभौ॥६॥ दिवा दिने निषिक्तस्य जातस्य वा जंतोयथाक्रमं पितृमातृसंज्ञितावर्कशुक्रौ भवतः॥ पितृसंज्ञकोर्कोमातृसंज्ञिकः शुक्रः एवमेव निशिरात्रौ निषिक्तस्य जातस्य वा॥ शनैश्चरेंदु सौर चंद्रौ॥ शनैश्चरः पितृसंज्ञिकः चंद्रो मातृसंज्ञकः॥ तद्विपर्यादिति॥ तद्विपर्ययौ दिवारात्रिव्यत्यय।भावेव पूर्वोक्तौ ग्रहौ पितृव्यमातृस्वसृ संज्ञितौ भवतः॥ तत्र दिवानिषि

६४

128

कस्य जातस्य वा शनैश्चरः पितृव्यसंज्ञः॥ चंद्रो मातृसंज्ञः॥ रात्रौ निषिक्तस्य जातस्य वार्कः
पितृव्यसंज्ञः शुक्रो मातृसंज्ञः॥ तत्संज्ञायाः प्रयोजनं॥ तावयौजयुग्मर्क्षगतौ तयोः शु
भाविति॥ तावेव यथोक्तग्रहौ तयोरोजयुग्मर्क्षगतौ शुभौ ज्ञेयौ॥ ओजा विषमराशयो यु
ग्माः समाः॥ तत्र दिवार्कौ विषमर्क्षगो मेषमिथुनसिंहतुलधन्विकुंभानामन्यतमस्थः
पितुः शुभकृत्॥ रात्रौ पितृव्यस्य॥ तथा दिवा शुक्रः समर्क्षगो वृषकर्कटकन्यावृश्चिकम
करमीनानामन्यतमस्थो मातुः शुभकृत्॥ रात्रौ पितृव्यस्य तथा दिवा शुक्रः समर्क्षगो
चंद्ररौ वृषकर्कटकन्यावृश्चिकमकरमीनानामन्यतमस्थो मातुः शुभकृत्॥ रात्रौ मातृ
स्वसुः॥ शनैश्चरो रात्रौ विषमर्क्षगतः पितुः शुभकृत्॥ दिवा पितृव्यस्य चंद्रो रात्रौ समर्क्ष
गो मातुः शुभकृद्दिवा मातृस्वसुः॥ सामर्थ्याद्देवोक्तविपर्यस्थः स एवोक्तयोरशुभः॥

यथा दिवा समस्तेत्रेगतोऽर्कः पितुरशुभो रात्रौ पितृव्यस्य॥ दिवा विषमर्क्षगतः शुक्रो मा
तुरशुभो रात्रौ मातृस्वसुः॥ रात्रौ समक्षेत्रगतः शनैश्चरः पितुरशुभो दिवा पितृव्यस्य॥
रात्रौ विषमर्क्षगतश्चंद्रमा मातुरशुभो दिवा मातृस्वसुरिति॥ अथाधानप्रसवमध्ये आ
धानकालवशात् मातुर्मरणयोगद्वयमाह॥ अभिलषद्भिरुदयर्क्षमसद्भिर्म्मरणमेति
शुभदृष्टिमयाते॥ उदयराशिसहिते च यमे स्त्री विगलितोडुपतौ सुतरदृष्टे॥६॥ उद
यर्क्षमुदयलग्नमसद्भिः पापग्रहैरभिलषद्भिः तत्रोदयलग्नाभिलाषः कश्चिल्लग्नाद्वि
तीयस्थस्य ग्रहव्याख्यातः॥ तेषामभिमते यथोदयलग्नादनंतरं तदुभयस्य प्रत्यासन्न
तयाभिलषसुदयर्क्षमिति॥ अन्ये पुनर्लग्नात् द्वादशस्थानस्य ग्रहस्योदयर्क्षाभिला
षं कथयंति॥ यस्मात् द्विहायराशिगमनग्रहः करोति॥ एवं लग्नाद्द्वादशस्थैः पापैर्लग्ने

चयदि शुभदृष्टि सौम्यग्रहदर्शनमयाते ॥ आधानसमये सौम्यग्रहैरदृश्यमाने स्त्री योषिद्गर्भिणी मरणमेति मृत्युं प्राप्नोति ॥ अत्र च भगवान् गार्गिः ॥ अशुभैर्दारशर्मस्थैः शुभदृष्टिविवर्जिते ॥ आधानलग्ने मरणं योषितः प्रवदेद्बुध इति ॥ योगांतरमाह ॥ उदयराशिसहिते त्वयमेइत्यादि ॥ यमेशनैश्चरे उदयराशिसहिते लग्नस्थे तस्मिंश्च विगतेना उपतिना नक्षत्रस्वामिना क्षीणचंद्रेण भूसुतेनांगारकेण चदृष्टेऽवलोकिते स्त्री गर्भिणी मरणमेति ॥ अथायोगांतरं वैतालिकेनाह ॥ पापद्वयमध्यसंस्थितौ लग्नेंदून च सौम्यविक्षितौ ॥ युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते ॥ ७ ॥ लग्नमुदयराशिः इंदुःश्चंद्रःएतौ लग्नेंदूपापद्वयमध्यसंस्थितौ लग्नस्थे चंद्रमसि यद्येकः पापग्रहो द्वादशस्थो भवति ॥ द्वितीयस्त्वेसरः तदा लग्नेंदुयुगपत्तुल्यकाले पापद्वयमध्यगा

वृ०
९९

जा०

वुच्यतो॥ अथवा लग्नेंदू विरुद्धस्थौ क्रांतरितौ भवतस्तत्रैकः पापस्तावत्सौम्यस्थितो
परस्तावद्रतिक्रम्यस्थितस्तथापि लग्नेंदू पापद्वयमध्यगावेवोच्यते॥ अथवा द्वादशस्था
ने एकः पापोऽपरो द्वितीये त्रितीये चंद्रश्च तुर्थे च पापो भवति॥ तथापि लग्नेंदू पापद्वय
मध्यगावुच्यते॥ एवं लग्नेंदू यदि युगपत्पापद्वयमध्यगतौ न च सौम्यवीक्षितौ शुभ
ग्रहावलोकितौ न भवतस्तदा नारी स्त्री गर्भयुता विपद्यते॥ एषयोगेवत्विति अथवा एष
केस्थौ लग्नेंदू भवतस्तयोर्मध्यादेकतमो विपापद्वयमध्यगो भवति॥ सौम्यग्रहदृष्ट
श्च न भवति तथा नारी गर्भयुता विपद्यते इति॥ अथवा लग्नात्त्रितीये चंद्रो द्वितीये च
तुर्थे द्वादशस्थाः पापाः तथापि लग्नेंदू पापद्वयमध्यगो भवतः॥ युगपद्ग्रहणं पादपू
रणार्थं विस्पष्टार्थं वा॥ तदर्थस्य एषयोगेव सामर्थ्यं लब्धत्वात्॥ अत्र योगकृतणां ग्रहो

९९

णां मध्याद्योबली तन्मासि गर्भिण्या मरणं भवतीति सर्वत्र परिभाषा॥ अन्ययोगांतराणि वैताली ये नाह॥ क्रूरैः शशिनश्चतुर्थगैर्लग्नाद्वा निधानाश्रिते कुजे॥ वध्वंसगयोः कुजार्कयोः क्षीणेंदौ निधनाय पूर्ववत॥८॥ शशिनश्चंद्रात् क्रूरैः पापग्रहैः चतुर्थस्थानस्थैर्निधनाश्रिते ष्टमस्थानस्थे कुजे भौमे एको योगः॥ अथवा लग्नाच्चतुर्थैः पापैरष्टमे भौमे चैव द्वितीयो योगः॥ वध्वंसयोः कुजार्कयोरिति॥ लग्नाद्वंधुगते चतुर्थगते भौमे सप्तमे द्वादशस्थानस्थे वै यत्र तत्रस्थे क्षीणेंदौ परिक्षीणे चंद्रे तृतीयोगः॥ एषामाधानकाले न्यतमस्य संभवे मरणाय पूर्ववन्नारी गर्भयुता विपद्यत इति॥ अधुना मातुः शस्त्रनिमित्तमरणयोगं सर्वे चाधानलग्नं शाद्वैतालीके नाह॥ उदयास्तगयोः कुजार्कयोर्निधनं शस्त्रात् कृतं चरेतरा॥ मासाधिपतौ निपीडिते त

त्कालेस्रवणंसमादिशेत॥४॥निषेककालेकुजार्कयोर्भौमसूर्ययोर्यथासंख्यमुदया
स्तगयोर्लग्नसप्तमस्थयोर्लग्नेभौमेसप्तमस्थेर्केगर्भयुतायाःभार्यायाःस्त्रियःश
स्त्रहतंशस्त्रहेतुकंमरणंनिधनंवदेतब्रूयात॥तथातेनैवप्रकारेणेति॥नारीगर्भ
युताविपद्यतइत्यर्थः॥मासाधिपतौनिहते॥गर्भमासेषुमासाधिपातवक्ष्यति॥कलल
घनेत्यादिना॥तत्रनिषेककालेयोग्रहोभौमादिरन्येनग्रहेणयुद्धेविजितोभवति॥
पराजितोभवति॥यतःकुसुतादीनांयुद्धमित्युक्तं॥केतुनावाभिधूमीतउल्कयावा
भिहतःसोपिनिपीडितग्रहइत्युच्यते॥सूर्यचंद्रमसौक्रूरयुक्तौदृष्टौवाराहुणाग्र
हेणपीडितौइत्युच्यते॥तस्यापिनिपीडितस्यग्रहस्ययोभवतिमासोयस्मिन्मासेमा
साधिपत्यंतस्यमासंसंभवतितत्कालेतस्मिन्कालेगर्भस्यस्रवणंच्युतिंसमादि

गे तद्वदेत्॥९॥ अधुनागर्भपुष्टिज्ञानं वन्नास्थेनाह॥ शशांके लग्नोपगतैः शुभग्रहै
स्त्रिकोणजायार्थसुखास्पदस्थितैः॥ तृतीयलाभर्क्षगतैश्च पापकैः सुखेतु गर्भो रवि
णा निरीक्षितः॥१०॥ यन्नराशौ शशांकश्चंद्रः स्थितस्तत्रैव शुभग्रहैर्व्यवस्थितैर्बुधगुर
सितैरित्यर्थः॥ अथवा लग्नस्थैः शुभग्रहैः लग्नेव्यवस्थितैः अथवा केचिच्छशांकोप
गतैः केश्चिल्लग्नोपगतैः एवं शशांकोपगतैः शुभग्रहैर्द्वयोपगतैर्वा॥ अथवा त्रि
कोणजायार्थसुखास्पदस्थितैः॥ त्रिकोणनवपंचमे जायास्थाने सप्तमे अर्थस्थाने
द्वितीये सुखस्थाने चतुर्थे॥ आस्पदस्थाने दशमे एतेषु त्रिकोणजायार्थसुखास्पदे
षु यथासंभवं चंद्राल्लग्नाद्वा॥ द्वयोर्वा समवस्थितैस्तथा पापकैः क्रूरग्रहैश्चंद्राल्ल
ग्नाद्वा तृतीयलाभर्क्षगतैः॥ तृतीये एकादशस्थाने स्थितैर्यथासंभवं द्वयोर्व्यवस्थि

वृ०

६८

जा०

तैरविणा सूर्येण निरीक्षितो दृष्टः॥ राशिर्लग्नं वा भवति॥ यस्मादेव योगः स च दृश्यते तदा गर्भः सुखी पुमान् भवति॥ केचिद्गुरुणा निरीक्षित इति पठंति॥ तदयुक्तं॥ यस्मात्सारावल्यामुक्तं॥ होरेंदुभैः सौम्यैस्त्रिकोणजायार्थसुखांबरस्थैर्वा॥ पापैस्त्रिलाभयातैः सुखी तु गर्भो निरीक्षितोरविणा॥ अथ निषिक्तस्या निषेककलाज्ज्ञातस्य जन्मकालादुभयोरपि प्रश्नकालाद्वा॥५॥ पुंस्त्रीविभागज्ञाने शार्दूलविक्रीडितेनाह॥ ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्म प्रवदेत्समांशकगतैर्युग्मेषु तैर्योषितः॥ गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियं प्रागस्था बुधवास्यणाश्च यमलौ कुर्वंति पक्षे स्वके॥११॥ ओजर्क्षे पुरुषांशकेष्विति॥ लग्नमुदयलग्नं॥ आदित्य अर्कः गुरुर्ज्यावः इंदुश्चंद्रः॥ एतैर्लग्नार्कगुर्विंदुभिरोजर्क्षस्थैर्विषमराशिव्यवस्थितैर्न केवलं यावत्पुरुषांश

६८

136

केषु विषमनवांशग्रहणे नास्ति॥ तत्कथं व्याख्यातं विषमनवांशकैरिति॥ उच्यते॥ पुरुषांश

केषु इति वचनात् पुरुषराशिनवांशका इत्यर्थः॥ ये एव विषमराशयस्त एव पुरुषराशयः॥

से मांशकगतेषु युग्मेष्विति॥ तैरेव लग्नार्कगुर्विंदुभिर्युग्मेषु समराशिषु स्थितैर्यथासंभ

वन केवलं यावत्समांशकगतैर्युग्मराशिनवांशकस्थैर्बलिभिश्च योषितः॥ स्त्रियो जन्म

प्रवदेत्॥ अथैषां यथाभिहितानां लग्नग्रहाणां सुभयविकल्पागानां बाहुल्यांसु स्त्री निर्दे

श्याः॥ साम्यबलाधिकत्वात्॥ गुर्वर्काविति॥ अथैतेषां गुर्वर्कौ विषमे भवति॥ गुरुर्जीवः अ

र्कः आदित्यः एतावुभावपि विषमराश्यौ गतौ यत्र तत्र नवांशकस्थौ नरं मनुष्यं कुरुतः॥

बलग्रहणमत्रानुवर्त्तते॥ शशी चंद्रः सितः शुक्रः वक्रोंगारकः एते यदि सबलाः युग्मेस

मराश्यौ गता यत्र तत्र नवांशकस्थाः स्त्रियं जनयंति॥ द्व्यंगस्था इति॥ एतत् एव ग्रहा द्व्यंगस्था

यत्र तत्र राश्यौ द्विशरीर नवांशकस्थाः बुधवीक्षणाच्च बुधदृष्ट्या यमलौ द्वौ स्वपक्षे कुर्वंति॥
आत्मीयपक्षे कुर्वंति॥ आत्मीयपक्ष पुरुषनवांशके स्त्रीनवांशके चेत्यर्थः॥ एतदुक्तं भव
ति॥ चत्वारो द्विस्वभावा मिथुनकन्याधन्वीमीनाः तत्र मिथुनधन्विमीनौ पुरुषांशकौ॥ कन्या
मीनौ स्त्र्यंशकौ॥ ते यथासंभवं मिथुनधन्व्यंशकगतावादित्यजीवौ॥ यदि बुधेन पत्र
तत्रावस्थितेन दृश्यते तदा यमलौ द्वौ पुरुषौ वाच्यौ॥ एवं यथासंभवं कन्यामीनांशगताः
शशिशुक्रभौमाः यत्र तत्रावस्थितेन बुधेन दृश्यते तदा यमलौ कन्ये कुर्वंति॥ अथ द्वावे
व विषमराशिगतौ यथा दर्शितस्थौ बुधेन पश्यति तदा द्वौ पुरुषै द्वि वकन्ये वक्तव्ये॥ न
न्वत्रांशकग्रहणं नास्ति तत्कथं व्याख्यातं॥ द्विशरीरांशेष्विति॥ उच्यते॥ अनेनैव सत्य
जातके उक्तं॥ बलिनौ विषमे गुरुनरं स्त्रियं सम गृहे कुजेंदुसिताः यमलौ द्विशरीरांशं

विंदुजदृष्यास्यपक्षसममिति॥ अथपुंजन्मयोगांतरमुपेंद्रवज्रयाह॥ विहायलग्नेविषमर्क्ष
संस्थः सौरोपिपुंजन्मकरोविलग्नात्॥ प्रोक्तग्रहाणामबलाबलावीर्यवाद्यःप्रसूतौपुरुषांग
नावा॥११॥ उक्तयोगाभावस्यावसरनान्यथा॥ आधानलग्नेवृच्छाकालिकेलग्नेवालग्नेवि
हायसत्का सौरः॥ शनैश्चरोलग्नाद्विषमर्क्षगतस्तृतीयपंचमसप्तमनवमैकादशास्थाना
नामन्यतमस्थः पुंजन्मकरः पुरुषजन्मकरोभवति॥ प्रसूतौप्रसवेपुरुषोनरोंगणास्त्री
वाजन्मवक्तव्यं॥ एतदुक्तंभवति॥ यत्रपुरुषजन्मयोगसंभवः॥ स्त्रीजन्मयोगसंभव
श्चदृश्यते तदायोयोगोबलवद्ग्रहाभिनिर्मितस्तद्वशात्सुस्त्रीजन्मवक्तव्यं॥ अथक्लीबज
न्मयोगांश्चाहूलविक्रीडितेनाह॥ अन्योन्यंयदिपश्यतःशशिरवीयद्यार्किसौम्यावपिव
क्रौवासमगंदिनेशमसमेचंद्रोदयौचस्थितौ॥ युग्मौजर्क्षगतावपीन्दुशशिजौभूम्या

ग्मजेनेक्षितौ पुंभागे सितलग्नशीतकिरणाः स्युः क्लीबयोगाः स्मृताः ॥१२॥ अन्योन्यमिति।
अन्योन्यं परस्परं यदि पश्यतः समराशिस्थितः चंद्रो विषमराशिगतमर्कं पश्यत्यर्कश्च
शशिनं पश्यति तदा क्लीबजन्मयोग एकः ॥ यद्यार्किसौम्यावपि ॥ आर्किः सौरः सौम्यो बु
धः एतावार्किसौम्यौ यथाक्रमं युग्मौजर्क्षगतौ ॥ अन्योन्यं यदि पश्यतस्तदा द्वितीयो यो
गः ॥ वक्रोयासमगमिति ॥ वक्रोंगारको विषमर्क्षगः समगं समराशिस्थं दिनेशं सूर्यं प
श्यति सूर्यश्चांगारकं पश्यति ॥ तदा तृतीयो योगः ॥ असमे चंद्रोदयो च स्थितौ भूम्यात्म
जेनेक्षितौ चंद्रशशी उदयं लग्नं एतावसमे विषमराशावुदयस्थितौ भूम्यात्मजेनांगा
रकेण समराशिगेन क्षितौ दृष्टौ तदा चतुर्थो योगः ॥ युग्मौजर्क्षगतावपीति ॥ इंदुश्चंद्रः
शशिजो बुधः एतौ यथासंख्यं युग्मौजर्क्षगतौ समविषमराशिगौ भूम्यात्मजेन भौमेन

यत्रतत्रावस्थिते न विस्थितो दृष्टो तदा पंचमो योगः॥ पुंभाग इति॥ सितः शुक्रः लग्न उदय
लग्नेन्दुनीतविकिरणश्चेद्रः एते सितलग्नन्नीतविकिरणाः यत्रतत्रराशौ पुंभागे पुरुषनवांशके
व्यवस्थिता भवंति तदा क्लीबजन्मयोगषष्ठः॥ तथा बादरायणः॥ अन्यो न्यंरविन्दुशिनौ
विषमर्क्षगौ निरीक्षिते॥ इंदुजरविपुत्रौ वा तथैव गर्भे नपुंसकं कुद्दतः॥ वक्रो वा विष
येस्तर्यः सम्मगस्त्वेवं परस्परालोकात॥ विषमर्क्षं लग्नेंदू समराशिगतः कुजो बलोक
यति॥ बधवंद्रौ कुजदृष्टौ विषमर्क्षसमर्क्षगौ तथैवो क्तौ ओजनवांशकसंस्थौ लग्नेंदू
निरीक्षितौ स्तथैवोक्ता इति॥ एते योगाः पूर्वयोगानामभावे वक्तव्याः॥ तेषां योगानां मेतेयां
चसंभवे तेमेव बलवत्त्वं॥ ५॥ अधुना द्वितेगर्भसंभवयोगात त्रयादलवीक्रिडितेनाह॥
युग्मे चंद्र सितौ तथौज भवने स्युर्ज्ञारवी वोदयाः॥ लग्नेंदू नृनिरीक्षितौ च समगौ युग्मे

षु वा प्राणिनः ॥ कुर्युस्ते मिथुनं ग्रहोदयगतान्द्व्यंगांशकान्पश्यति स्वांशे ज्ञे त्रितयं ज्ञगां
शकवशाद्युग्मं त्वमिश्रैः समं ॥१४॥ युग्मे चंद्रसिताविति ॥ चंद्रसितौ शशिशुक्रौ युग्मे समराशौ
व्यवस्थितौ तथा तेनैव प्रकारेण ज्ञारजीवोदयाः ज्ञो बुधः आरोऽङ्गारकः जीवो बृहस्पतिः उद
यो लग्नं एते सर्व एवौजभवने विषमराशौ स्युर्भवेयुः ॥ एवमेते मिथुनं कुर्युः ॥ दारिकौ दा
रकश्च ॥ लग्नेंदू नृनिरीक्षिताविति ॥ लग्नेंदू उदयचंद्रौ समगौ युग्मराशिव्यवस्थितौ नृ
निरीक्षितौ नरग्रहेण पुंग्रहेण केनचिद्दृष्टौ भवतस्तथापि मिथुनं गर्भस्थं वाच्यं ॥ युग्मे
वा प्राणिनः ॥ तदेव पूर्वोक्ता ज्ञारजीवोदयाः सर्व एव युग्मेषु समराशिषु स्थिताः प्रा
णिनो बलिनो भवंति ॥ तथापि मिथुनं कुर्युः ॥ ग्रहोदयगतानित्यादि ॥ ग्रहाः सर्व एव
द्व्यंगांशकेषु द्विस्वभावनवांशकेषु गताः प्राप्ताः उदयो लग्नस्थः द्व्यंगांशकेषु गतः ता

न्ग्रहोदयगतान्दृष्ट्वं गोंशकान्स्त्र्यंशोस्यनवांशकस्थे ज्ञे बुधे पश्यति सति॥ तदा त्रित
यं वक्तव्यं॥ तत्रायं विशेषः॥ ज्ञेगांशकवशाद्युगांतु इति॥ ज्ञो बुधो गतो व्यवस्थितौ वां
शके स्थितः तद्वशाद्युग्मं॥ बुधो यस्मिन्नस्मिन्नवांशके व्यवस्थितः॥ स यल्लिंगांश
कस्तल्लिंगं तत्र गर्भे युग्मं वक्तव्यं॥ एकस्त द्विरीतः एतदुक्तं भवति॥ मिथुनांशक
स्थो बुधो यदा ग्रहोदयगतान्दृष्ट्वं गांशकान् पश्यति तदा गर्भे दारकद्वयं दारिकाद्वे
का वक्तव्यं॥ अथ कन्यानवांशकस्थो बुधः स्त्र्यंगांशक व्यवस्थितान् ग्रहोदयान् प
श्यति तदा गर्भे दारिकाद्वयमेकं च दारकं वक्तव्यं॥ अमिश्रैः समम् इति॥ तैर्ग्रहोदयग
तैः बुधैर् मिश्रैः स्थिते द्विस्वभावस्य भलिंगस्थिते स्त्रितयस समम् एकलिंगं वक्तव्यं॥
एतदुक्तं भवति॥ मिथुननवांशके व्यवस्थितो बुधो मिथुनधन्वांशक व्यवस्थितान् ग्र

होदयान्चनृपति॥ तदागर्भेदारकत्रितयंवक्तव्यं॥ अथकन्यांशकव्ययस्थितोबुधः॥
कन्यामीनांशकव्ययस्थितानुग्रहोदयान्चनृपतितदागर्भेदारिकात्रितयंवाच्यमिति॥
तथाचसारावल्यां॥ समराशौशशिसिततनयोर्विषमेगुरुवक्रसौम्यलग्नेषुयोगस्मि
गर्भेगतंनूनंमिथुनंतुविज्ञेयं॥ लग्नेंदुवासमगोपुंग्रहदृष्टौचमिथुनजन्मकरौ॥
उदयेज्ञवक्रगुरवोबालेनःसमराशिगास्तथोक्तः॥ द्विशरीरांशकयुक्तानुग्रहाश्चि
लागंचपनृपतिनंदुसुतः॥ कन्यांशोदेकन्येपुरुषश्चनिषच्यते॥ गर्भेमिथुनांशो
केन्ये। कादौपुरुषौत्रितयमेवनृपात॥ नमिथुनधनुरंशगतानुहानविलग्नेचपु
नृपतीन्दुसुतः॥ मिथुनांशकस्थश्चयदापुरुषस्त्रितयेतदागर्भे॥ कन्यामीनांशा
नुस्थान्विहगानुदयंयुवतिभागगताः॥ पनृपतिशीतगुरुतनयःकन्यातृतीयेत

दाग भें॥ १४॥ अधुनाप्यधिकगर्भसंभवयोगज्ञानमुपजातिकयाह॥ धनुर्द्धरस्यांत्यगते वि
लग्ने ग्रहैस्तदंशोपगतैर्बलिष्टैः॥ ज्ञेनार्किणा वीर्ययुतेन दृष्टे संति त्रभूता अपि कोशसं
स्थाः॥ १५॥ धन्विलग्ने धनुर्द्धरांशके चोदयं लग्नमुपगते॥ धनुर्द्धरस्य धनुषोंत्यगते विलग्ने
धन्वंशके चोपगते ग्रहैः सर्वैरेव तदंशोपगतैर्यत्र तत्र राशौ धन्विनयांशकस्थैर्न केवलं य
वद्बलस्थैर्वः र्यवद्भिस्तस्मिंश्च लग्ने ज्ञेनार्किणा च दृष्टे ज्ञेन बुधेन आर्किणा शनैश्चरेण च
वीर्ययुतेन बलवता दृष्टे वलोकिते त्रभूता बहवः कोशसंस्था जरायुवेष्टित विग्रहा ग
र्भे संति भवंतीति॥ पंचसप्तदशा यावत्॥ पूर्वमुक्तं॥ मासाधिपतौ निपीडिते तत्कालंस्र
वणं समादिशेदिति॥ तदधुना गर्भस्य मासाधिपान् श्लोटकेनाह॥ कललघनांकुरास्थि
चर्म्मांगजचेतनताः सितकुजजीवसूर्यचंद्रार्किबुधाः परतः॥ उदयश्चंद्रसूर्यनाथाः

क्रमशो गदिता भवंति शुभाशुभे च मासाधिपते सह रचां ॥१६॥ सिताद्याग्रहाः गर्भस्य प्रथममासात्प्रभृती कललादीनि भवंति सुवतयेति ॥ तद्यथा ॥ गर्भस्य प्रथमे मासि कललं भवंति ॥ शुक्रशोणिते अत्यने काठिन्ये संमिश्रीभूते तत्र गर्भस्य तस्मिन्मासेः सितः शुक्रोधिपतिः ॥ द्वितीये घनता काठिन्यं भवति ॥ तत्र तस्य कुजोंगारको भौमाधिपतिः ॥ तृतीये करोस्तति र्हस्ताद्यवयवजन्म तत्र जीवो बृहस्पतिरधिपतिः ॥ चतुर्थेऽस्थिसंभवः तत्र सूर्यो रविरधिपतिः ॥ पंचमे चर्मसंभवस्तत्र चंद्रोधिपतिः ॥ षष्ठे अंगजसंभवो लोमजन्म तत्रार्किः सौरोधिपतिः ॥ सप्तमे चेतनासंभवो भवति ॥ चेतनस्य भावः तत्र बुधोधिपतिः ॥ बुधमासासरतो चेन्य रोषा मासास्ते गर्भस्याज्ञानोद्वेग प्रसवकारास्तेषु चोदय चंद्रसूर्यनाथास्वामिनः क्रमशो गदिताः उक्ताः ॥ तत्राष्टमे मासि गर्भस्थो जंतुरशनेकरोति ॥ पतिर्योग्रहः स मासाधिपतिः ॥

नवमेगर्भस्थस्योद्वेगोभवति॥ तत्रंचंद्रोधिपतिर्भवति॥ दशमेगर्भस्यप्रसवोप्रसूतिर्भ
वति॥ तत्रसूर्योरविरधिपतिः॥ तथाचस्वल्पजातके॥ कललघनावयवास्थित्वग्रोमस्मृ
तिसमुद्भवाःक्रमशः॥ मासेषुशुक्रकुजजीवसूर्यचंद्रार्किसौम्यानां॥ अशनाद्वेगप्रसवाः
परतोलग्नेशाचंद्रसूर्याणामिति॥ अत्रप्रथमद्वितीयमासाधिपयोर्यवनेश्वरेणमद
भेदः॥ तथाचतद्वाक्यं॥ कुजास्फुजिज्जीवरवींदुसौरज्ञाशांकलग्नेंदुदिवाकराणां॥ मासा
धिपत्यप्रसवोनचैषांजयोपयातेर्ग्रहवर्द्धयंति॥ आद्येतुमासेकललंद्वितीयेपेशिस्तृ
तीयेपेशिस्तृतीयेपिभवंतिशाखाः अस्थीन्यथस्नायुशिराश्चतुर्थेमज्जातुचर्माण्यपि
पंचमेतु॥ षष्ठेत्वसृग्रोमनखोयरश्चतेतःस्थिताः सप्तममासमेलतृष्णाशनास्वाद
नेमष्टमेस्यात्पूर्वापरार्द्धोनवमेरतिश्च॥ स्रोतोभिरुद्घाटितपूर्णदेहोगर्भोर्कमासेदश

मेषस्थे तेः॥ आचार्यस्य बहुमतसाम्यमभिमतमिति॥ भवति शुभाशुभं च मासाधिप
तेः सदृशं॥ गर्भस्थस्य मासाधिपतिसदृशं शुभमशुभं फलं भवति॥ एतदुक्तं भवति॥
आधानकाले यो ग्रहो निपीडितो भवति॥ तन्मासि गर्भस्य पतने कलुषे मंदरश्मौ विव
र्णे पीडने निर्मलेंशुजालसंपन्ने बलवति पुष्टिरिति॥ तथा च सूक्ष्मजातके॥ कलुषैः पी
डापतने निपीडितैर्निर्मलैः पुष्टिरिति॥ अत्र चान्यैः शास्त्रकारैर्विशेष उक्तः॥ तत्किंचि
त्सदृश्यते तथा च सारावल्यां॥ तत्र शुभाशुभमिश्रैः कर्मभिरधिवासिता विषयरतिग
र्भवासे निपतति तेसंयोगे शुक्रशोणितयोः मैथुनस्य मनोभावो यादृक्सद्दलाल्लभ्यसं
भवति॥ श्लेष्मादिभिश्च दोषैस्तत्तुल्यगुणो निषिक्तस्य॥ यादृक्चरूपतिसौम्यस्तत्तुल्यगुणं
सुतेसमाधते पितृजननीसादृश्यं रवेः शशांकस्य बलयोगात् सुबोधमेतत्॥ ७॥ अथा

न्यतमेराशौस्थितौभवतः॥ चेच्छद्वोयद्यर्थेपद्यवंतदा अस्मिन्योगेसदंतोदंतसहि
तोगर्भस्थोवाच्यः॥ केचित्सौम्यर्क्षांशेमिथुनेमिथुनांशकेकन्यायांकन्यांशकेकेचिदि
च्छंति॥ ऋक्षांशकयोर्युगपद्ग्रहणात्॥ अंशशब्देनकेवलेनैवसिद्धिस्यात्तदृक्षग्रहणम
तिरिच्यतइति॥ एवंविधेयोगेगर्भस्थःसदंतोभवतिजातोवा॥ कुब्जःस्वर्क्षइति॥ रा
शिनिचंद्रेस्वर्क्षेआत्मीयराशौकर्कटस्थितेतथाभूतेचतनुगतेलग्नगतेतस्मिंश्चमं
दमाहेयदृष्टेमंदेनशनैश्चरेणमाहेयेनांगारकेणचदृष्टेःवलोकितेगर्भस्थःकुब्जो
वाच्यः॥ पंगुमइनरइति॥ मीनेलग्नसंस्थेयमकुजशशिभिःशनैश्चरभौमचंद्रैर्वक्षि
तेदृष्टेपंगुःपारविलोकेगर्भोवाच्यःसंधाविति॥ पापैरादित्यकुजसौराणामन्यतमेरा
शिनिचचंद्रेसंधौकर्कटवृश्चिकमीनांत्यनवांशगतेयथासंभवंतिगर्भस्थोजंतुज

डः अत्रेन्द्रियहीनो वाच्यः॥ न चेत्सौम्यदृष्टा इति॥ एते योगकर्तारो ग्रहा यथा दर्शितान
चेत्तत्पदिसौम्योशुभग्रहैर्दृष्टा भवेति॥ तदैतद्योगचतुष्टयं पूर्णं वक्तव्यं॥ सौम्यैर्बलिभि
र्निरिक्षिता योगा एव न भवंति॥ मध्यबलैर्हरनबलैर्वा दृष्टास्तदा असमग्रफलं भवं
ति इति॥ अधुना वामन॥ हीनांगयोगौ रोधे कनाह॥ सौरशशांकदिवाकरदृष्टवामन
कोमकरांत्यविलग्ने॥ धीनवमोदयगेष्वरकाणैः पापयुतैरभुजांघ्रिशिरः स्यात्॥११॥
मकरांत्यविलग्ने मकरस्यांत्यनवांशके विलग्नस्थे नवमवांशके उदयमानः॥ सत्यमकर
स्य भवतीत्यर्थः॥ तस्मिंश्च सौरशशांकदिवाकरदृष्टे सौरः शनैश्चरः शशांकश्चंद्रः दि
वाकरः सूर्यः एतैरवलोकिते वामनको गर्भस्थो वाच्यः॥ धीनवमोदयग इति॥ अत्र
केचिदेवं व्याचक्षते॥ यदा लग्ने द्वितीयो द्रेष्काणो भवति तदा तत्र पंचमराशिसंबंधि

धिकोणगस्फुटः चिरलब्धगिरोसंभवयोगान्वंशस्थे नाह॥ त्रिकोणगे ज्ञे विबलैस्तथाप

रे सुखाघ्रिहस्तै द्विगुणैस्तराभवेत्॥ अथवाग्गचीरावशुभेर्भसंधिगैः शुभेक्षितश्चेत्कु

रुते गिरं चिरात्॥१७॥ ज्ञे बुधे त्रिकोणगे लग्नान्नवमस्थे पंचमस्थे वा तस्माद्बुधात् परै

रैरन्यैः सर्वैर्ग्रहैर्यत्र तत्रास्थितैर्विबलैर्वक्ररहितैः सुखांघ्रिहस्तैर्द्विगुणैर्गर्भस्थो वा

च्यः॥ द्विशिरश्चतुष्पाच्चतुर्भुज इति॥ त्रिकोणगे ज्ञे इत्यत्र केचिन्मूलत्रिकोणगे बुधे क

न्यागत इत्याहुः॥ तच्चायुक्तं॥ यस्माद्भगवान् गार्गिः॥ बलहीनैर्ग्रहैः सर्वैर्नवपंचमगे

बुधे॥ द्विगुणांघ्रिशिरोहस्तो भवत्येकोदरस्तथा॥ अथवागिति॥ गविवृषस्थिते इंदौ चंद्रे

शुभैः पापैर्भसंधिगैः कर्कटवृश्चिकमीनानामन्त्यनवांशकस्थैर्यथासंभवं तदा अवाङ्मु

कोगर्भस्थो वाच्यः॥ शुभेक्षित इति॥ चेदुह्यो पद्यर्थे एवं विधे योगे यदि शुभेक्षितः सो

स्यग्रहदृष्टश्चंद्रो भवति तदा जातस्य चिराद्बहुना कालेन गिरं वाचां कुरुते॥ अथ यदि च
पापवीक्षिते वाग्हीनः॥ एवं मिश्रग्रहवीक्षिते यदा सौम्या बलिनस्तदा चिरेण कालेन ल
ब्धवाग्भवेत् यथ पापा बलिनस्तदा नैवेति॥ अत्र च भगवान्गार्गिः॥ कुलीरालीरषांतस्थैः
पापैश्चंद्रे वृषोपगे॥ मूकः पापेक्षितः सौम्यैश्चिरेण लभते गिरं॥ मिश्रदृष्टे ग्रहैर्बलवा
न् मुको वा लब्धवाक् चिराद्दि॥ अधुना सदंतकुब्जजडउन्मयोगानमंदाक्रांतयाह॥ सौम्य
र्क्षांशे रविजरुधिरौ चेत्सदंतो तत्र जातः कुब्जः स्वर्क्षे शशिनि तनुगे मंदमाहेयदृष्टे॥
पंगुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे संधौ पापैः शशिनि च जडः स्यान्न चेत्सौ
म्यदृष्टः॥ १८॥ रविजः शनैश्चरः रुधिरो गारकः यत्र तत्र राशौ शनैश्चरांगारकौ सौम्य
र्क्षांशे बुधनवांशके मिथुनांशके कन्यांशके वा भवतः॥ अथवा बुधर्क्षे मिथुनकन्ययोर

त्वाद्विद्रेष्काणइत्याख्यातस्मिन् द्वितीयद्रेष्काणे पापग्रहयुते उदयमनुप्राप्ते सौरशशांक
दिवाकरदृष्टे गर्भस्थो ऽभुजो ऽनुजहीनो वाच्यः ॥ एवं लग्ने तृतीयद्रेष्काणो यदा भवति त
दा नवमराशिसंबंधित्वात् तृतीयो नवांशकः तस्मिन्नुदयगे पापयुते सौरशशांकदिवा
करदृष्टे नेत्रपादहीनो गर्भो वाच्यः ॥ एवं प्रथमद्रेष्काणस्य लग्नसंबंधित्वादुदयद्रेष्काणइ
त्याख्यातस्मिन्नुदयगते वा पापयुते सौरशशांकदिवाकरदृष्टे शिरःशिरोवर्जितो गर्भ
स्थो वाच्यः ॥ एतेषु योगेषु सौरशशांकदिवाकराणां दर्शनयोगात् पापयुक्त इति ॥ केव
लेनाङ्गारकेण युक्तो योगो भवति अत्राप्यन्ये धीनवमोदयगैर्द्रेष्काणैः पापयुतैः केवल
मेवाभुजांघ्रिशिरसां संभवं व्याचक्षते सौरशशांकदिवाकरदृष्टैरित्यस्यानुवृत्ति
रछेति ॥ अन्ये विभुजादिसंभवे यथासंख्यस्त्रो द्रेष्काणत्रयेपि प्रतिद्रेष्काणो नद्रु

द्भवविकल्पमाहुः॥ विभुजो यानदिर्वा विशिरा वेति अन्य एवं व्याचक्षते॥ यथा लग्ने यदा
प्रथमद्रेष्काणोदयो भवति तदा पंचमराशौ प्रथमद्रेष्काणो नवमो पि प्रथम एवं तद्रेष्का
णत्रये यदा पापयुतं भवति तदा भुजहीनो गर्भस्थो वाच्यः॥ अथ लग्ने द्वितीयद्रेष्काणो
दयो भवति तदा पंचमनवमयोरपि द्वितीय एव॥ एतेद्रेष्काणत्रयं यदा पापयुतं भव
ति तदा पापहीनो गर्भस्थो वाच्यः॥ अथ लग्ने तृतीयद्रेष्काणोदयो भवति तदा पंचम
नवमयोरपि तृतीय एव॥ एवं द्रेष्काणत्रये यदि पापयुतं भवति तदा शिरोविहीनो ग
र्भस्थो वाच्यः॥ अत्राप्यन्ये यथा सर्वं सत्कत्रिप्रकारे पि योगे भुजो हि शिरो हीनानां विक
लेन संभवमाहुः॥ अन्ये पुनरेवमाहुः॥ वयं पुनर्व्रूमः निषेककालः पंचमराशौ यो
द्रेष्काणः स यद्यंगोरणयुक्तः सौरत्राशांक दिवाकर दृष्टश्च भवति तदापि॥ अभुजो ग

र्भः॥ तथा निषेककाले नवमराशौ योद्रेष्काणः स यद्यंगारकेण युक्तः सौरराशौ क दिवा
करदृष्टश्च भवति तदा अनेनिः पाररहितो गर्भस्थः उदयस्थानलग्ने यो द्रेष्काणः स य
द्यंगारकेण युक्तः सौरराशौ क दिवाकरदृष्टश्च भवति तदा अशिरो गर्भः॥ एषैव व्या
ख्या साध्वी॥ यस्माद्भगवान् गार्गिः॥ लग्नद्रेष्काणगो भौमः सौरक्षे यदु वीक्षितः॥ कुर्या
द्विशिरसं तद्वत्संचमे बाहुवर्जितं॥ विपरं नवमेस्थाने यदि सौम्यैर्न वीक्षित इति॥ त
था च सारावल्यां॥ भौमयुताद्रेष्काणास्त्रिकोणलग्नेषु भेषु सेदृशाः॥ विभुजांत्रिमस्त
कः स्याच्छिनिरविचंद्रैर्वदेद्भर्भे॥ ५॥ अधुना नयनरहितजन्मज्ञानार्थं हरणीयमाह॥
रविराशियुते सिंहलग्ने कुजार्कि निरिक्षितैर्नयनरहितः सौम्यासौम्यः सबुद्वुदलो
चनः॥ व्ययगृहगतश्चंद्रो वामं हीनस्सपरं रविर्नशुभगताः योगाः याप्या भवंतिशु

भेक्षिताः ॥२०॥ रविशशिकुजे इति ॥ सिंहे लग्ने रविशशियुतेऽर्कचंद्राभ्यां संयुक्ते तथापु
ते कुजार्किनानिरीक्षिते भौमसौराभ्यां दृष्टे नयनरहितो भवति नेत्ररहितो यो गर्भस्थो
वाच्यः ॥ अथ यदि केवले सिंहलग्नेऽर्केण युक्ते सौरांगारकेन वा मास्त्रिकोणः सौम्याः ऽसौम्यैः
सबुद्बुदलोचन इति ॥ तस्मिन्नेव सिंहलग्नेऽर्कचंद्राभ्यां युक्ते सौम्यः ऽसौम्याः शुभपाप
ग्रहैर्दृष्टे गर्भस्थः सबुद्बुदलोचनः पुष्पिताक्षो वाच्यः ॥ अत्राप्येवं तमयुक्ते प्राग्वत् पुष्पि
ताक्षत्वं ॥ व्ययग्रहत इति ॥ निषेककाललग्नाज्जन्मलग्नाद्वा यस्य चंद्रमा व्ययग्रहतो
द्वादशभस्थो भवति ॥ तस्य वामं चक्षुर्हि नास्ति ॥ वामाक्षिकाणः स भवतीत्यर्थः ॥ एवं रवि
रादित्यो लग्नाद्द्वादशगोऽपरं दक्षिणं चक्षुर्हि नास्ति ॥ अशुभगदिता योगा इति ॥ य एते
योगाः प्रागभिहितास्त्रिकोणज्ञे इत्यादिना ग्रंथेनाशुभफलदास्तेषामेव योगानां यत्र

योगकर्तारो ग्रहाः शुभग्रहैर्दृष्टा भवंति॥ तदा ते योगा याप्या भवंति पूर्णं यथोक्तं फलं
न प्रयच्छंति किंतु प्रयच्छंतीत्यर्थः॥ अथ प्रश्नाधानकाले योगवशात्प्रसवकालज्ञानं
वसंततिलकेनाह॥ तत्कालमिंदुसहितो द्विरसांशको यस्तत्तुल्यराशिसहिते पुर
तः शशांके॥ यावानुदेति दिनरात्रिसमानभागस्तावद्गते दिननिशोः प्रवदंति जन्म॥२२॥
तत्कालमाधानकाले प्रश्नकाले वा यस्मिन् राशौ चंद्रमा वर्तते॥ तत्र च यस्मिन् द्वादश
भागे व्यवस्थितः स तत्कालमिंदुसहितो द्विरसांशकः॥ केचित्तात्कालिकेंदुसहितो द्विर
सांशक इति पठंति॥ तात्कालिकेंदुना यावत्संख्यो द्वादशभागः सहितः तत्तुल्यस्ताव
त्संख्यो मेषादौ गणनया यो राशिस्तत्रस्थे चंद्रमसि प्रसवो वक्तव्यः॥ एषैव साध्वी व्या
ख्या॥ यस्माद्भगवान् गार्गिः॥ यावत्संख्यो द्वादशांशो द्वीतरस्मी व्यवस्थितः॥ तत्सं

सू०
७९

जा०

रव्योयस्तनोराशिर्जन्मेंदौ तद्रुतोवदेत्॥ अत्रापिनस्तत्रानयते॥ यम३॥ नुपातोपाप॥ य
दिचंद्रांशको तद्द्वादशभागप्रमाणेनसकलचंद्रराश्यष्टादशशतलिसाप्रमाणंलभ्येन
तदनेनभुक्तद्वादशराशिप्रमानेनकिमितिलब्धं चंद्रराशिभुक्तं लभ्यते॥ ततोष्टशत
लिसापरिकल्पनयानक्षत्रमुदयमस्त्वं॥ तत्रापिदिनरात्रिज्ञानमाह॥ यावानिति॥ दि
नरात्रिलग्नाः पूर्वंव्याख्याताः॥ गोजाश्विकर्कमिथुनाद्यादि॥ आधानकालेप्रश्नका
लेवायल्लग्नंतस्ययेंत्रविभागः दिनसंज्ञोरात्रिज्ञोवायावानुदेति॥ स्वमानेतस्मिन्
यावत्कालभागेगतस्तावत्येवदिननिशोः स्वमानाद्गतेकालेजन्मभविष्यतीतिवाच्यः॥
दिनस्यरात्रेर्वांगतकालभागंबुध्वाउपातेनप्रसवकालेलग्नहोराद्रेष्काणनवांशद्वा
दशभागत्रिंशांशकावाच्याइतिमुनयः प्रवदंतिकथयंति॥ तथाचसारावल्यां॥ त

८९

त्काले दिवसनिशासंज्ञासमुदेति राशिभागो यः यावानुदयस्तावान्वान्यो दिवसस्य रात्रेर्वा॥
इत्याधाने प्रथमे प्रसूतिकाले सुश्चितं कृत्वा॥ जातकं विहितं च विधिं विचिंतयेत त्रगणि
तज्ञः॥ अधुना धृतगर्भस्य वर्षत्रयवर्षद्वादशप्रसूतिज्ञाने मालिन्याह॥ उदयति मृदु
भांशो शसस मस्थे च मंदे यदि भवति निषेकः सूतिरब्दत्रयेण॥ शशिनि तु विधिरेषः
द्वादशाब्दे प्रकुर्यान्निगदितमिह चिंत्यं सूतिकाले पि युक्त्या॥२२॥ उदयतीति॥ मंदोरस्य भां
शोः तस्मिन्निषेककाले यस्य तस्य लग्नस्योदये मृदुभांशो शनैश्चरराशिनवांशाके म
कुंभांशके चोदयति॥ तथा भूते तस्मादेव लग्नान्मंदे शनैश्चरे तत्काले घूनं गते सप्तम
स्थे॥ एवंविधे योगे यदि निषेको भवति तदा तस्य गर्भस्याब्दत्रयेण वर्षत्रितयेन सू
तिकायाः प्रसवो वक्तव्यः॥ शशिनिति॥ एष एव विधिर्यदा शशिनि चंद्रे भवति तदा द्वा

दशाब्दे द्वादशवर्षे प्रसूतिः प्रसवं कुर्यात्॥ एतदुक्तं भवति॥ यस्य तस्य लग्नस्योदये
यदा कर्कटांशकोदयो भवति॥ तस्माल्लग्नात्सप्तमचंद्रो भवति तदाष्ट तस्य गर्भस्य द्वा
दशाब्दे प्रसवो वक्तव्यः॥ निगदितमिहेति इहास्मिन्नाधाना आधानकालयोगवशात्
यथाहीनाधिकमासादिनो गर्भसंभवो भवति॥ प्रथमप्रसूतिकाले पितादृग्योगवशा
त् तथाविधानामेव जन्म वक्तव्यं॥ पितृमातृपितृव्यमातृस्वसृणामपि शुभाशुभं
जन्मकालेवशात् तदनंतरमपि वक्तव्यं॥ उक्तं च॥ जन्मन्याधाने प्रश्नकाले वेति॥ ५
इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृतौ निषेकाध्यायश्चतुर्थः॥ ५॥ ५॥
अथातो जन्मविधिर्नामाध्यायो व्याख्यायते॥ तत्रादावेव पितुः सन्निधासत्रेधौ वा जा
तस्य जन्मस्य तु शुभात्॥ पितुर्जातः परोक्षस्य लग्नमिंदावपश्यति॥ विदेशस्थस्य च

रभे मध्याद्भ्रष्टे दिवाकरे ॥१॥ इंद्रौ चंद्रे प्रसवलग्नमपश्यति नावलोकयति सति पितुः परो
क्षस्य जनकस्यासन्निधौ जातः ॥ तत्रास्य पितुरसन्निधाने ॥ स्वदेशपरदेशस्थितिज्ञान
माह ॥ विदेशस्थस्येति ॥ दिवाकरे सूर्ये चरराशिगे चरराशिस्थे मध्याद्भ्रष्टे मध्याद्दशमस्था
नाद्भ्रष्टे धः पतिते नवमाष्टमस्थानस्थे पितुर्विदेशस्थस्य अन्यदेशस्थस्य अन्यदेशागत
स्य जातः चेद्रमसि प्रसवलग्नमपश्यति अर्के स्थिरराशिस्थे मध्याद्भ्रष्टे स्वदेशस्थस्य
पितुः परोक्षे जातः ॥ अस्मिन्नेव योगे द्विस्वभावस्थेर्के मध्याद्भ्रष्टे स्वदेशपरदेशयोर्मध्ये
पथि स्थितस्य परोक्षे जातः मार्गमध्ये इत्यर्थः ॥ अथर्यादेव चंद्रे प्रसवलग्नमपश्यति स
र्के चरराशिस्थे स्थिरराशिस्थे वा द्विस्वभावराशिस्थे वा मध्याद्भ्रष्टे पि पितुः स्वदेशस्थ
स्यैव परोक्षः सन्निधौ जात इति वक्तव्यं ॥ तथाच सारावल्यां ॥ होरामवीक्ष्यमाणे पितु

१०
८१

ज्ञा०

र्येथेहस्थिते ग्रामे नि जातः मेषुरणाच्युते वा चरभे भानौ विदेशगते॥ अथान्यपि योगाननु
ष्टुभाह॥ उदयस्थे पि वा मंदे कुजे वास्तंसमागते॥ स्थिते चांतः क्षपानाथे शशांकसुतशुक्र
योः॥२॥ मंदे सौरे उदयस्थे लग्नगतो पितुः॥ परोक्षे जातः वाच्यः प्रकाराय॥ अथवा कुजे मौ
मे जन्मलग्नादस्तं सप्तमस्थानं समागमे प्राप्ते पितुः परोक्षस्य जातः स्थिते चांते इति॥ क्षपा
नाथे शशांकसुतशुक्रयो मद्धस्थे शशांकसुतो बुधः शुक्रो भार्गवः॥ अनयोर्मध्यस्थिते॥ चंद्र
दे को द्वादशो ऽन्यो द्वितीये॥ अथ वैकस्मिन् राशौ मध्यभागेषु चंद्रः स्थितः आद्यंतभागयोर्बु
धशुक्रौ तथापि मध्यस्थः एवं विधे योगे पि मध्यस्थः एवं विधे तुः परोक्षजातः॥ तथा च स्व
ल्पजातके॥ चंद्रे लग्नमपश्यति मध्ये वा सौम्यशुक्रयोश्चंद्रे॥ जन्म परोक्षस्य पितुर्यमोदये
वा कुजे वास्ते॥ ८॥ अधुना सर्प्यवेष्टितजन्मज्ञानं चानुष्टुभाह॥ शशांके पापलग्ने वा रश्चि

८१

सं

केशत्रिभागगे॥ शुभैः स्वायस्थितैर्जातः सर्प्पस्तद्वेष्टितोपि वा॥ ३॥ वृश्चिकेशः वृश्चिकस्वामि
भौमः कर्कट द्वितीयः सिंहस्तृतीयः मीन तृतीयः एषामन्यतमस्थस्य चंद्रमसः शुभैः शुभ
ग्रहैः स्वायस्थिते द्वितीयैकादशस्थानस्थितैः सर्पउरगो जात इत्यवोचत्॥ पापलग्नेवेति॥
एवं पापसंबंधिलग्नोदये यदा भौमो द्रेष्काणो भवति॥ तत्र पापलग्ने भौमद्रेष्काणाः मेषः प्र
थमः क्षीणे चंद्रे कर्कट द्वितीयः वृश्चिक प्रथमः सिंहस्तृतीयः॥ एषामन्यतमस्योदये ल
ग्नाच्च शुभग्रहैर्व्ययैकादशस्थैस्तद्वेष्टितः सर्पवेष्टितो जंतुर्जात इति वक्तव्यं॥ अन्ये पुनरेवं
व्याचक्षते॥ चंद्रे पापलग्ने वा भौमद्रेष्काणो भवति॥ तत्र पापलग्ने भौमद्रेष्काणाः मेषः
प्रथमः कर्कट द्वितीयः सिंहस्तृतीयः॥ वृश्चिक प्रथमः धन्वि द्वितयः मीनस्तृतीयः त
स्माद्वशुभैः स्वायस्थितैः विकल्पेन सर्प्पो वा सर्प्पवेष्टितो वा जात इति वक्तव्यं॥ अत्र

वृ०
८२

जा०

पूर्वव्याख्यासाध्वी॥ यस्मान्न भवान् गार्गिः॥ भौमद्रेष्काणगे चंद्रे सौम्यैरापधनस्थितैः॥ सर्पस्तद्वेष्टितस्तद्वत्सापलग्ने विनिर्दिशेत्॥ सारावल्यां॥ भौमद्रेष्काणगे चंद्रे लग्ने वा संस्थिते वदेज्जातं॥ व्येकादशगैः सौम्यैरहिवेष्टितो भुजंगो वा॥८॥ अधुनैकजरायुवेष्टितयोर्द्वयोर्जन्मज्ञानमनुष्टुभाह॥ चतुष्पदगते भानौ शेषैर्वीर्यसमन्वितैः॥ द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ॥९॥ भानौ सूर्ये चतुष्पदराशिगते मेषसिंहधन्विपरार्द्धमकरपूर्वार्द्धानामन्यतमस्थे शेषैरन्यैः सर्वग्रहैर्द्वितनुस्थै द्विस्वभावस्थितैश्च वीर्यसमन्वितैर्बलिभिश्च कोशवेष्टितौ एकजरायुवेष्टितौ यमलौ जायते॥८॥ अधुना नालवेष्टितजन्मज्ञानमनुष्टुभाह॥ छागसिंहवृषैर्लग्ने तत्स्थे सौरे यवा कुजे॥ राश्यंशसदृशे गात्रे जायते नालवेष्टितः॥१०॥ छागो मेषः सिंहः प्रसिद्धः वृषो वृषभ एवं गतैः छागसिंहवृषै

८२

164

र्लग्नस्थितैः एषामन्यतमो यदि लग्नगतो भवति तस्थे सौरे यवा कुजे तस्मिंश्छागसिंहरूषा

णामन्यतमे लग्ने तस्थे तत्र स्थिते सौरे शनैश्चरे यवा कुजभौमे तत्रस्थे नालवेष्टितो जंतु

र्जायते॥ नालवेष्टितो जंतुर्जायते॥ नालशब्देन नाड्यभिधीयते॥ कस्मिंत्रे वेष्टितइत्याहरा

श्यंससदृशो गात्र इति॥ राशरंशो राश्यंशः॥ राशेर्लग्नस्य यो नवांशकस्तत्कालमुदितः स च

यद्राशिसंबंधी स च कालं गानीत्यादिनाग्रंथेन नियत राशिः यस्मिन्नंगे कालपुरुषस्य व य

वस्थितस्तत्सदृशो तस्मिन्नेवांगे शीर्षमुखादिन विष्टितरतिवक्तव्यं॥ तथा च सारावल्यां

सिंहाजगोभिरुदयस्थितौ नालेन वेष्टितो जंतुः॥ लग्ने कुजेथ सौरे शश्यशसमानगात्रे पु॥ ५

अधुना जारजातकज्ञानं येश स्थेनाह॥ न लग्नमिंदुं च गुरुर्निरीक्षितेन वा शशांकं रविणा

सामागतातं॥ स पापको र्केण युतो तवा शशी परेण जातं प्रवदंति निश्चयात्॥ ६॥ न लग्नमि

165

वृ०
८३

जा०

ति॥ गुरुर्जीवो लग्नमुदयमिंदुश्चंद्रं च यदि न निरीक्षते॥ न पश्यति॥ लग्नचंद्रावेकराशि
स्थौ एयकस्थौ वा यदोभावपि गुरुणा न दृश्यते तदा परेण जारेण जात इति॥ निश्चयात्स वदंति
मुनयः॥ अत्र यदि लग्नचंद्रौ जीवभागस्थौ जीवनवांशकस्थौ भवतः तदा परजात इति व
क्तव्यं॥ तस्माद्यवनेश्वरः॥ अजीवभागेष्वनवस्थिते वा जीवेष्व चंद्रेण विलग्नभे वा॥ जातः प
रोद्भूतमिति ब्रुवंति वाच्योजनेता यवलाव लोकितादिति॥ न वा शशांकमिति॥ शशांकं चंद्रं
रविणार्केण समागतं संयुक्तं गुरुणा निरीक्षते चंद्रार्कावेकराशिस्थौ यदि बृहस्पतिना न दृ
श्यते तदा परेण जातः॥ अथवा शशी चंद्रश्च पापगः पापग्रहेण भौमेन सौरेण वा युक्तस्त
था विधोर्केण सूर्येण यदि युक्तो भवति तथापि परेण जात इति॥ अत्राप्यन्ये जीवदृष्ट्यानु
वर्तितव्याख्यातं कुर्वते॥ तद्युक्तं॥ यस्माच्चंद्रार्कावेकराशिगतौ पापयुक्तौ॥ अयुतौ वा॥

८३

जीवेन दृश्यमानौ वा जारजातजन्मकरौ ॥ तत्र चंद्रार्कयोगे पापेन समेतस्त्वकिंदृतं भवति ॥ तस्माच्चंद्रा
र्कावेकराशिगतौ अपापौ जीवेन दृश्यमानौ सपापौ जीवेन दृश्यमानौ जारजातजन्मकरौ निश्चया
त् ॥ अत्र चंद्रमा यदि बृहस्पतिर्गुरुर्गृहमतः तत् द्रेष्काण तत्र वांशकद्वादशभागस्थो भवति ॥ अ
न्यत्र तारानौ गुरुणा पुनः स्मरान जारजः इति ॥ यस्माद्भगवान् गार्गिः ॥ गुरुक्षेत्रगते चंद्रे तद्युक्ते वा
न्यराशिगे ॥ तद्द्रेष्काणे तदंशे वा न परैर्जात इष्यते ॥ ६ ॥ अथ जातस्यापि तु बंधनयोगज्ञानवता
लिके नाह ॥ क्रूरर्क्षगतावशोभनौ सूर्याद्यूनन वात्मजस्थितौ ॥ बद्धस्तु पिता विदेशगः स्वे वा राशि
वशाद्यथोपथि ॥ ७ ॥ क्रूरर्क्षाणि क्रूरराशयः मेषसिंहवृश्चिकमकरकुंभाः कृष्णपक्षेण कर्कटः
पापयुक्ते बुद्धेपि कंन्या मिथुने अशोभनौ पापौ शनिभौमौ क्रूरर्क्षगतौ पापक्षेत्रस्थौ तौ सूर्याद्द्
वेर्द्यूनन वात्मजस्थितौ ॥ द्यूने सप्तमे नवमे त्र सिद्धं ॥ आत्मजस्थानं पंचमं एषामन्यतम

स्थोभवतस्तदा जातस्य पिता जनको बद्धो वाच्यः॥ तस्यादित्याक्रांतराशिवशाद्बंधस्थदेशज्ञान
माह॥ स्वे वास्मिन्राशिवशाद्यथोपथीति॥ चरराशिस्थे सूर्ये परदेशे बंध॥ स्थिरराशिस्थे स्वदेशे॥
द्विस्वभावे पथि॥ एवं राशिवशात्स्थानपरिज्ञानं॥ अथोरत्ययं निपातो विकल्पे कश्चित्स्थिरराशि
वशात् यथापथीति पठंति॥७॥ अधुना पोतगता प्रसवज्ञानं वैतालियेनाह॥ पूर्णे शशिनि स्वराशि
गे सौम्ये लग्नगते शुभे सुखे॥ लग्ने जलजेस्तगेपि वा चंद्रे पोतगता प्रसूयते॥८॥ शशिनि चंद्रे पू
र्णे परिपूर्णमंडले तस्मिंश्च स्वराशिगे कर्कटस्थिते तथा सौम्ये बुधे लग्नगते उदयस्थे शुभे जी
वे एव सुखे चतुर्थस्थे पोतगता नौस्थान प्रसूयते इति वक्तव्यं॥ तत्रान्ये शुभै सुख इति पठंति॥
पठित्वा त्वेवं व्याचक्षते॥ सुखे चतुर्थे भवने शुभैरिति बहुवचनं॥ घटते लग्ने बुध उक्तः॥ शु
क्रबृहस्पतिशेषौ शुभाभ्यामित्येव प्राप्नोति॥ यद्वयते शुभैरिति॥ तस्मादेवमवसीयतां चंद्रमाः

शुक्रबृहस्पतीभ्यां युक्तो भवति तदा शुभैरिति भवति॥ एतच्च मेषलग्ने तस्थे बुधपूर्णचंद्र
शुक्रबृहस्पतीभ्यां समायुक्ते कर्कट व्यवस्थिते सर्वत्र युज्यत इति॥ अयं पाठोऽस्य व्याख्यानेन
युक्तः॥ यस्मान्मकरावस्थितेर्के कर्कटस्थ चंद्रमाः पूर्णो भवति मकरव्यवस्थिते चार्के मकरा
च्चतुर्थभवने मेषे बुधस्य संभवो नास्ति॥ किं पुनर्मकरात्सप्तमराशौ कर्कटे शुक्रस्याप्यवस्था
नमिति तस्माच्छुभे सुखे इति सप्तम्यात्त एकवचनांत एव पाठो न्याय्यः॥ शुभे सुख इति॥ तत्क
थं जीवो व्याख्यातः उच्यते॥ बुधो लग्नगतः तस्माच्चतुर्थे शुक्रस्यावस्थानं भवति॥ अतो
जीव इति व्याख्यातं॥ केचित्सूर्व शास्त्रानुसारेणेति शुक्र इति इच्छंति॥ अथ पोतगता प्रसव
योगो द्वितीयः॥ लग्ने जलज इति॥ लग्ने जलज जलराशौ कर्कट मकर पश्चिमार्द्ध मीनानाम
न्यतमे तस्माद स्तगे सप्तमस्थानस्थे चंद्रे पूर्णे वा पूर्णे च पोतगतैव प्रसूयइति॥ वाशब्दः प्र

कारय॥ अथोदकमध्यप्रसवज्ञानं वैतालियेनाह॥ आप्योदयमाप्यगः शशी संपूर्णः समवेक्षते ऽथवा॥ मेषूरणबंधुलग्नगः स्यात्सूतिः सलिलेन संशयः॥१॥ अपोदय इति॥ आप्ये राशयो मकरपश्चार्द्ध कर्कट मीनास्तेषामन्यतमस्योदये जलराशिर्लग्ने भवति शशी चंद्रश्चाप्यगो जलराशिस्थः तदा सूतिः प्रसवसलिले जलसमीपेन संशयः निश्चयाद्वाच्यः॥ अथवा संपूर्णः शशी लग्नगमाप्योदयं समवेक्षते पश्यति तथापि सलिलसमीपे प्रसूतिः॥ मेषुरणबंधुग्न इति॥ अथैष्यराशाउपगते मेषुरणबंधुलग्नगे मेषुरणे दशमे बंधुस्थनि चतुर्थे लग्ने प्राग्लग्ने वा स्थितः स्याद्भवेत्तथापि सलिले प्रसूतिरितिवदेत्॥ तथा च सारावल्यां॥ सलिलभलग्ने चंद्रो जलराशौ वीक्षिते ऽथवा पूर्णः॥ प्रसवं सलिले विंद्याद्बंधरं यदशमगश्च यदा॥ अधुना बंधनागारावटयोः प्रसवज्ञानं वैतालीयेनाह॥ उदयोडुपयोर्व्ययास्थितयोः पापनिरीक्षि

तेयमे॥ अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षिते वटे॥१०॥ उदयो लग्नं उडुपश्चंद्रः॥ तयो
रुदयोडुपयोरेकराशिस्थयोर्यमे सौरव्यवस्थिते द्वादशस्थे तस्मिंश्च पापनिरीक्षिते गुप्तबंध
नागारे प्रसूयतेति वक्तव्यं॥ सौरे शनैश्चरे अलिकर्कियुते वृश्चिककुलीरयोरन्यतमस्थे विलग्न
गते स्मिंश्च शीतकरेक्षिते चंद्रदृष्टे वटे च भ्रमे प्रसूतिर्वक्तव्यं॥ अथ क्रीडागृहे देवालये सोखरभू
मिप्रदेशोषप्रसवसानं चैतालिये मंदे अगते विलग्नगे बुधसूर्येन्दु।रीक्षिते क्रमात॥ क्रीडाभा
वने सुरालये सोखरभूमिषु च प्रसूयते॥११॥ मंदे शनैश्चरे अब्जगते जलराशिस्थे तथाभूते वि
लग्नगे प्राग्लग्नस्थे क्रमात् सरिपाद्या बुधसूर्येंदु निरीक्षिते बुधरविचंद्रदृष्टे क्रीडाभवने सुराल
ये सोखरभूमिषु च प्रसूयत इति वदेत॥ एतदुक्तं भवति॥ शनैश्चरे जलराशिस्थे लग्नगते बु
ध निरीक्षिते बुधदृष्टे क्रीडाभवने इति गृहे प्रसूतिः॥ एवं सूर्येणार्केण निरीक्षिते सुरालये दे

३०
८८

जा०

वग्वहे इंदुना चंद्रेण निरीक्षिते सौरवरम्ये मिथुसवालुकास्य च निपु प्रसूयते इति॥ ५॥ अथ
स्मशान रम्यप्रदेशाग्निशालान्नपदे वगृहगोकुलशिल्यालये प्रसवज्ञानमेवोपजातिकया
हा॥ नलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेंदु गुरुरग्निहोत्रे॥ रविर्नरेंद्रामरगोकुलेषु शिल्या
लये ज्ञः प्रसवं करोति॥ ११॥ नृलग्नगमिति॥ पूर्वश्लोकान्मंद इत्यनुवर्त्तते॥ प्रत्यासन्नमिति
न्यायात्॥ नृलग्नग नरराशिलग्ने स्थिते नरराशयो मिथुनकन्यातुलधन्विपूर्वार्द्धकुंभाः
वक्तव्याः॥ तत्रगते शनैश्चरं कुजोंगारकः प्रेक्ष्य दृष्टा भौमो यदि पश्यति तदा स्मशाने प्र
सवं जन्म करोति॥ केचिन्नृलग्नदृशा क्षितिज इति पठंति॥ नृलग्नेगं पश्यति तच्छिलो
नृलग्नदृशा क्षितिजः॥ रम्ये सितेंदु इति॥ नरराशिगे लग्ने शनैश्चरयुक्ते सितः शुक्र इंदु
श्चंद्रो वा पश्यति॥ तदा रम्ये रमणीये प्रदेशे जन्म॥ एवंविधं सौरं गुरुर्जीवः पश्यति तदाग्नि

८८

होत्रे ऽग्निशालायां॥ एवंविधं सौरं रविः पश्यति तदा नरेंद्रगृहे राजवेश्मनि॥ अमरगृहे देवा
गारे वा गोकुले वा प्रसूतिः॥ एवमेव बुधे नरदृष्टे सौरे शिल्पालये शिल्पगृहे चित्रे पुस्तकका
रवर्द्धकिप्रभृतीनां शिल्पीनां प्रसिद्धामनेतमस्य गृहे प्रसूतिरिति॥ तथा च सारावल्यां॥ र
विजेजेलजविलग्ने क्रीडोद्याने बुधे स्थिते प्रसवः॥ रविणारे वागारे तथोखरे चैव चंद्रेण॥
आरण्यभवनलग्नगिरिवनदुर्गे पुनर्नरविलग्ने॥ रुधिरे स्थिते श्मशाने शिल्पिकनिल
ये च सौम्यन॥ सूर्ये स्थिते गोनृपदेववासिश्रुत्वेंदुजाभ्यां रमणीयस्थले॥ सुरेज्यदृष्टे द्वि
जे वह्निहोत्रे नरोदमे संप्रवदंति सूतिं॥ ७॥ अथ प्रसवदेशज्ञानं वैतालीयेनाह॥ शशंपश
समानगोचरे मार्गे जन्मचरे स्थिरगृहे॥ स्वर्सांशगते स्वमंदिरे बलयोगात्फलमंशकर्स
योः॥ १२॥ राश्यंशपति॥ राशिश्च अंशश्च तद्राशयंशौ राशिर्लग्नराशिः अंशो नवांशकः॥ लग्न

राशेस्तन्नवांशकस्य वा यः समानः सदृशः स्वात्मीये गोचरे मार्गविषयः स्वचराश्च सर्वद
ल्सनेन प्रदर्शितः॥ तत्र यस्मिन्यस्मिन् प्रदेशे योयो राशिरूपः प्राणी संचरति तत्र योमा
र्गः पंथास्तस्मिंजन्म॥ यदि चरलग्नस्तन्नवांशको वा यदि चरो भवति॥ अथ लग्नराशि
स्तन्नवांशको वा स्थिरस्तदा राशितुल्यप्राणिनः स्वगृहे यत्र वसति तत्स्थाने जन्मवक्त
व्यं॥ अथ लग्नराशिस्तन्नवांशको वा द्विस्वभावस्तदा तद्देहलीद्बहिः पथसमीपे स्थानाश्र
लितस्य यो मार्गस्तत्रेति॥ स्वर्क्षांशयुत इति॥ चरस्य स्थिरस्य द्विस्वभावस्य वा राशेर्लग्नग
तस्य॥ स्वर्क्षांशः आत्मीयनवांशकोदयो यदा भवति॥ तदास्य मंदिरे आत्मीय एव गृहे एव ज
न्म वक्तव्यं॥ तत्र राश्यंशसमानगोचरे मार्गे जन्मेत्यादि सामान्येनोक्तं॥ तत्र ज्ञायते किं ल
ग्नराशिसमानगोचरे किं मेशसमानगोचरे॥ प्रसवोद्देशः दृश्यतो॥ तदर्थमत्र निश्चयः त

त्रायं नियमः बलयोगादिति अंशकोनवांशः ऋक्षराशिः॥ अनयोर्बलयोगात्फलं प्रसवस्था
नज्ञानं॥ एतदुक्तं भवति॥ लग्नराशेर्नवांशकराशेश्च यो बलवांस्तत्समानगोचरे मार्गादि
षु प्रसवो वक्तव्यः॥ तेषां संभवे योगोक्तप्रदेशेष्वेव प्रसवो वक्तव्यः॥ ४॥ अथ यस्मिन्योगे जा
तो गन्तस्त्यज्यते यस्मिंश्च योगे जातस्य त्यक्तोऽपि मात्रा दीर्घायुः सुखी भवति तद्योगद्वयं वैना
शीयेनाह॥ आरार्कजयोस्त्रिकोणगे चंद्रे त्यक्तश्च विसृज्यते बंधया॥ षष्ठे मररराजमंत्रिणा दीर्घा
युः सुखभाक्स्वसंस्मृतः॥ १५॥ चंद्रे शशिन्यारार्कजयोर्भौमसौरयोरेकराशिगतयोस्त्रि
कोणगे नवमस्थे पंचमस्थे वाऽस्ते च सप्तमस्थाने स्थिते जातो बंधया मात्रा विसृज्यते त्य
ज्यते॥ एवंविधे योगे। चंद्रमभ र राजमंत्रिणा गुरुणा दृष्टे मात्रा सक्तोऽपि परहस्तगतोऽपि
दीर्घायुश्चिरंजीवि सुखभाक्सुविभोगी भवति॥ ५॥ अथ यस्मिन्योगे जातो मात्रा त्यक्तो

विनश्यति कुजार्कजयोस्तथार्ये॥ सौम्येपि पश्यति तथाविधहस्तमेति सौम्येतरेषु परह
स्तगतोप्यनामुः॥१५॥ तुहिनगौ चंद्रे पापेक्षिते पापग्रहेदृष्टे सौरेणांगारकेन वेत्यर्थः॥
तथाभूते उदयलग्ने स्थिते कुज भौमे वास्ते सप्तमस्थाने स्थे जातो मात्रा त्यक्तो विनश्यति
म्रियत इत्यर्थः॥ तथाभूते उदयलग्ने स्थिते कुज भौमे वास्ते सप्तमस्थानस्थे जातो मा
त्रा त्यक्तो विनश्यति म्रियत इत्यर्थः॥ कुजार्कजयो इति॥ तथा तेनैव प्रकारेण लग्नगते
चंद्रमसि पापेक्षिते सूर्यदृष्टे कुजार्कजयो भौमशनैश्चरयो रायेएकादशस्थित [illegible]र्जा
तो मात्रा त्यक्तोपि विनश्यति म्रियत इत्यर्थः॥ सौम्यपि पश्यतीति॥ पूर्वोक्तयोगस्थे चंद्रम
सि पापदृष्टे सौम्य शुभग्रहे पि पश्यति जातो मात्रा त्यज्यते॥ त्यक्तोपि यादृग्वर्ण प्रभ्रूणा
सौम्यग्रहेण चंद्रमा दृष्टस्तथाविधस्य हस्तमेति॥ तादृग्वर्णस्य ब्राह्मणादेर्हस्ते गच्छति

तेनचपार्यतोजीवतीच॥ अथास्मिन्योगेस्थितश्चंद्रमापापेनकुजेनसूर्येणसौर्येणवा
दृश्यतेअन्येनसौम्यग्रहेणचदृश्यतेतदाजातोतयोर्दृष्टग्रहयोर्योबलवान्तादृक्वर्ण
स्यब्राह्मणादेर्हस्तंगतोविनश्यति॥ यतउक्तं॥ सौम्येतरेषुपरहस्तगतोप्यनायुरिति॥ न
तुयथायोगस्थेचंद्रमसिसौम्यैःपापैश्चदृश्यमानेमात्रात्यक्तोविनश्यतीत्यभिहितेतत्र
क्षत्रियवैश्यशूद्रवर्णशंकरादिपुरहस्तगतःसर्वएवविनाशमाप्नोति॥ बहवश्चमात्रा
त्यक्ताःक्षत्रियादिवर्णसंकरगतास्यजीयमानादृश्यंते॥ तस्मात्पूर्वश्लोकादृष्टःऽमररा
जमेत्रिणादीर्घायुःसुखभाक्चसस्मृतइत्येतदिहशेषभूतमवगंतव्यं॥ तस्माद्बु
धेनशुक्रेणवायथादर्शितयोगस्थश्चंद्रमाःदृश्यमानोपिजीवेनदृश्यतेतदादृष्टग्र
हाबलवन्नात्तद्वर्णस्यब्राह्मणादेर्हस्तगतोजीवति॥ तथाचसारावल्यां॥ म्रियतेपापे

दृष्टे त्रांशिनि विलग्ने कुजे स्तगे त्यक्तः॥ लग्नाच्चलाभगतयोर्वसुधासुतमंदयोरेवं॥ पश्य
तिसौम्यो बलवान् यादृग्गृण्हाति॥ तादृशो जाते॥ शुभपापग्रहदृष्टे परैर्गृहीतोप्यसौ त्रि
यते॥ सर्वेष्वेतेषु यदा योगेषु शशी सुरेज्यसंदृष्टः॥ भवति तदा दीर्घायुर्हस्तगतः सर्वव
र्णेषु॥८॥ अधुना प्रसवगृहज्ञानं वैतालीयेनाह॥ पितृमातृगृहेषु तद्बलात्तरुशालादि
नीचगेष्वशुभैः॥ यदि नैकगतैस्तु वीक्षितो लग्नदो विजने प्रसूयते॥९॥ पितृमातृग्रहादि
वार्कशुक्रौ विल्यादिनोक्तौ॥ तद्बलात् पितृमातृग्रहवीर्यात् पितृमातृगृहे प्रसूयत इति
वदेत्॥ तदार्कज्ञानैश्चरयोरन्यतमे बलवति पितृगृहे पितृष्वसृपितृव्यादिसंबंधिगृ
हे प्रसूतिः॥ एवं मातृगृहयोश्चंद्रशुक्रयोरन्यतमे बलवद्भवति॥ मातृगृहे मातृस्वसृमा
तुलादिषु गृहे प्रसूतिः॥ तरुशालादिषु नीचगैः शुभैरिति॥ बहुवचनात्सर्वैरेवशुभग्र

हाः यदा नीचस्थो भवति तदा तरुषु हर्म्येषु शालेषु प्राकारसमीपेषु प्रसवो वाच्यः॥ आदिग्रहणान्नदीकूपारामवर्त्तितेषु सर्वेषु प्रदेशेष्वनावृत्तेषु॥ यदि नैकगतैरिति॥ नीचगैः शुभैरित्यनुवर्त्तते॥ सर्वे शुभग्रहाः नीचगताः॥ लग्नेंदू उदयचंद्रावुभावप्येकराशिगतौ ग्रहैर्बहुवचनात्त्रिःप्रभृतिभिर्यदा न दृश्यते तदा विजने जनरहितस्थाने ढ्यो प्रसूतिरिति॥ यदा पुनरेकस्थैर्बहुभिर्ग्रहैर्यदा लग्नेंदू दृश्यते तदा जनाकीर्णे प्रसूतिरिति यदा पुनरेकस्थैर्बहुभिर्ग्रहैर्यदा लग्नेंदू दृश्यते तदा जनाकीर्णे प्रसूतिरिति॥ तथा च सारावल्यां॥ पितृमातृग्रहे वर्गोत्तमस्वजनगृहेषु बलयोगात्॥ प्राकारतरुनदीषु च प्रसूती नीचाश्रितैः सौम्यैः॥ नेक्षते लग्नेंदू यद्येकस्थग्रहा तदा ढ्यो॥ ५५ अधुना दीपसंभवासंभवभ्रंशेश प्रसवज्ञानं गर्भमोक्षं मातुः क्लेशज्ञानं मंदाक्रांतयाह॥ मंदसंज्ञिराशि

त्रा

निहिबुके मंददृष्टे ऽब्जगे वा तद्युक्ते वा तमसि शयनं नीचसंस्थेऽथ भमौ॥ यद्वा शिर्व्रजति हरिजगर्भमोसस्तु तद्वत् सापैश्चंद्रस्मरसुखगतैः क्लेशमातुर्जनन्याः॥१७॥ राशि निचंद्रे यत्र तत्र राशौ मंददृष्टौ शनैश्चरस्य नवभागे मकरकुंभयोरन्यतमांशकस्थे तमस्यंधकारे सति शयनं वक्तव्यं॥ हिबुके लग्नाच्चतुर्थस्थे चंद्रे धकार एव शयने॥ यत्र तत्रावस्थिते चंद्रे मंदेन सौरेन दृष्टे धकार एव॥ अब्जगे वा॥ अब्जराशी अत्र कर्कटमीनौ द्वौ विज्ञेयौ मकरकुंभयोरन्यत्वात॥ मंददृष्टौ शौ इत्यादिनेति॥ तेन यत्र तत्र राशौ कर्कनवांशकस्थे मीननवांशकस्थे वाश्चंद्रमस्येधकार एव॥ एवं निषेककाले नारीशयनमिति॥ सर्वेष्वेतेषु योगेषु॥ यदार्कदृष्टः चंद्रमा भवति॥ तदांधकाराभावः॥ यस्माद्यवनेश्वरः॥ सौरांशकस्थे राशिनि प्रलग्ने जलेज लाख्यांशकमाश्रिते वा॥ स्वांशास्थिते केंद्रगते र्कजे वा जातस्तमि

ष्येयदिनार्कदृष्टः॥अन्येषां मतं यथा॥सूर्यबलवति भौमेनदृष्टे तस्यपियोगेष्वंधका
राभावः॥तथाचसारावल्यां॥बलवतिसूर्यदृष्टे प्रदीपोधकाराकुपुत्रेण॥अन्येर्व्यपग
तवीर्यैः सूतोज्योतिस्त्वणे भवति॥सौरांशे थजलांशे चंद्रे र्किसंयुते यवा हिबुके॥तद
ष्टे वाकुर्यात्तमसिप्रसवं नसंदेहः॥नीचसंस्थे भूमौशायनंवाच्यं॥भूशब्दे नात्रातृण
स्तृता भूर्ज्ञेया॥केचिल्लग्नस्थे चतुर्थस्थे वानीचगते चंद्रे भूशायनमिच्छंति॥तथाचेसा
रावल्यां॥नीचस्थे भूशायनं चंद्रेप्यथवासुखेविलग्ने वा॥यद्वद्धिति॥प्रसवलग्नराशि
द्येनप्रकारेण नार्य्यागर्भेगर्भमोक्षोवाच्यः॥यत्राकाशं भूम्यासहासक्तंसमंतादृश्यते
हरिज्ञं॥उक्तंचहरिजमिति॥गगनमवनौप्रसक्तमिवलक्ष्यतेयथोक्तेषु॥तद्यथा॥
शीर्षोदयेषुलग्नेषुतानास्याः॥उदरतानंदर्शयेतोगर्भस्यमोक्षोवाच्यः॥एष्टोद

२०
९१

जा०

येष्वधोमुखस्य पृष्ठे दृश्यतः ॥ तथा च सारावल्यां ॥ शीर्षोदयेषु लग्ने मूर्ध्ना प्रसवोऽन्यथो
दयोच्चरणैः ॥ उभयोदयचरस्थैः शुभदृष्टेः शोभनोऽन्यथा कष्टः ॥ केचिदेवं व्याचक्षते ॥
यदा लग्नाधिपो नवांशकाधिपो वा लग्नस्थो वा ग्रहो वक्री भवति तदा वैपरीत्येन गर्भ
च्युतो वाच्यः ॥ तथा च मणित्थः ॥ लग्नाधिपेंऽशकपतौ लग्नस्थे वक्रीते ग्रहे वापि ॥ विप
रीतगते मोक्षो वाच्यो गर्भस्य सक्लेशः ॥ पापैरिति ॥ पापग्रहैश्चंद्रगतेशशितोऽव्यवस्थि स
तैः ॥ स्मरगतैर्लग्नात्सप्तमस्थैर्वा सुखगतैश्चतुर्थस्थैर्वा प्रसवकाले जनन्याः मातुः
क्लेशमाहुः ॥ कष्टं कथयंति सूरयः ॥ तथा च सारावल्यां ॥ क्लेशो मातुः क्रूरैर्बंधस्तगतैः
शशांकसुतैर्वा ॥ ६ ॥ अथ दीपस्नेहज्ञानमिंद्रवज्रयाह ॥ स्नेहः शशांकादुदयाश्च व
र्तीर्दीपोर्कयुक्तर्क्षवशाच्चराद्या ॥ द्वारं च तद्वास्तुनि केंद्रसंस्थैर्ज्ञेयं ग्रहैर्वीर्यसमन्वितै

९१

182

र्वा॥१९॥ शशांकाच्चंद्रात्स्नेहो वाच्यः जन्मकाले पूर्णे चंद्रमसि स्नेहेन पूर्णदीपभाजनं व
क्तव्यं॥ क्षीणे क्षीणस्नेहमिति॥ तथा च सारावल्यां॥ दीपः पूर्णपूर्णे शशी निःक्षीणे क्षयस्तु
तैलस्य॥ यद्येव तदामावास्यायां सर्वेषामंधकारे प्रसवो भवति॥ तस्माद्युक्तमेतत॥
तेन यत्र राशौ चंद्रमा व्यवस्थितस्तत्र यदि राशिप्रारंभे स्थितो भवति तदा दीपभाजनं
स्नेहेन पूर्णं वक्तव्यं॥ अथ राश्यवसाने स्थितस्तदा स्नेहात् स्नेहं नास्ति॥ मध्ये प्राप्तेऽर्धं
अन्यत्रानुपात इति॥ उदयाच्च वर्तिं उदयाल्लग्नाद्दीपवर्तिरादेश्या॥ लग्नारंभे तत्स
णाद्दत्ता वर्तिः॥ मध्येऽर्धदग्धा॥ लग्नावसाने वर्त्तिर्दाहो वाच्यः॥ अंतरेनुपातः॥ तथा
च सारावल्यां॥ यावल्लग्नादुदितं वर्त्तिर्दग्धा तु तावती भवति॥ दीपोर्कयुक्तर्क्षवशादिति॥
अर्को रविः तद्युक्तराशीवशाच्चरादियो दीपो वाच्यः॥ तत्र चरराशिव्यवस्थितेऽर्के संचार्य

माणो दीप आदेश्यः॥ स्थिरराशिस्थे एकदेशस्थः द्विभावस्थे चालितः प्रतिष्ठित इति॥ केचिद्व
दंति॥ यथा यस्मिन्राश्यावर्कः स्थितः स राशिर्यस्यां दिशि स्थितः प्रागादिशाः क्रियावृषन
युक्कर्कटेत्यादिना प्रदर्शितं॥ तस्यां दिशि दीप आदेश्यः॥ अन्ये एवं वदंति॥ यथा यस्यां दिश्यर्को
भ्रमवशेनाष्टप्रहरकल्पनया ष्टासु दिक्षु परिभ्रमस्तु तेनैव क्रमेण यस्यां दिशि व्यवस्थि
तः॥ तस्यां दिशि गृहस्य दीपस्थानमिति॥ तथा च सारावल्यां॥ द्वादशभागविभक्ते व्यासगृ
हे व्यवस्थिते सस्नेहो दीपश्चरस्थिरादिषु तथैव वाच्यः प्रसवकाले॥ अत्र प्राच्यादि गृहं
द्वादशधा विभज्य मेषादिगणनयार्कराशिर्यत्र भवति तत्र दीपस्थानमिति केचिल्लग्नस्य
यादृशो वर्णस्तादृग्वर्णा दीपवर्तिमिच्छंति॥ तथा च मणित्थः॥ लग्नस्य योत्र वर्णो निर्दिष्ट
स्तेन वर्तिरादेश्या॥ द्वारं च तद्वास्तुनीति॥ तद्वास्तुनी सूतिकागृहे॥ लग्न केंद्रस्थे ग्रहे द्वारा

देशः कार्यः॥ तस्य गृहस्य यदि कस्मात् गवाद्वारविशुद्धलोहिततमइत्यादिनोक्तस्तद्दिगभिमुखं सूति

कागृहे वक्तव्यं॥ बहुसुखे देशे बलवद्गृहवशात् लग्नस्य यादिक् तदभिमुखं॥ यस्मादनेनैव स्व

स्य जातके युक्तं॥ द्वारं वास्तुनि केंद्रोपगोद्गृहादसति वा विलग्नर्क्षादिति॥ अन्ये वदंति॥ यथाल

ग्नद्वादशभागराशिस्तद्दिगभिमुखं सूतिकागृहद्वारमिति॥ एतच्च संवादेनापिदृष्टमिति॥

विर्यसमन्वितादिष्युतस्त्रसबध्यतेकश्चिद्वदंति॥ यथा वीर्यसमन्वितादृहाद्गृहद्वारं वदेत॥

तथा च रावल्यां॥ वा स गृहोद्यानगतं दिक्पालकाद्बलोपेतादिति॥ ७॥ अधुना सूतिकागृहे स्व

रूपज्ञाने शार्दूलविक्रीडितेनाह॥ जीर्णं संस्कृतमर्कजक्षितिसुतेदग्धं वशीतगोः काष्ठाढ्यं न

नदृढं रवौ सुते तन्नैकशिल्पुद्भव॥ रम्यं चित्रयुतं नवं च भृगुजजीवे दृढं मंदिरं चक्रस्थैः स्व

यथोपदेशाचरनोसामंतपूर्वा वदेत॥ १९॥ जीर्णं संस्कृतमिति॥ वीर्यसमन्वितादित्यनुवर्त

२०
९३ जा०

ते॥ सर्वग्रहेभ्योर्कजसौरे वीर्यवतीसबलजीर्णमतिचिरंतनेभूयः संस्कृतसूतिकागृहंवा
चं॥ क्षितिसुते भौमे बलवत्यग्निनादग्धं॥ एवं शीतगौ चंद्रे नवभिनवं शुक्लपक्षे उपलिप्तंव
देत्॥ यस्माद्यवनेश्वरः॥ संवर्द्धता चंद्रमसोपलिप्तमिति॥ काष्ठाढ्यंनदृढंरवामिति॥ रवा
वादित्ये काष्ठाढ्यं दारुबहुलं न दृढमसारं॥ शशिसुते बुधे तद्गृहमनेकशिल्पयुक्तं बहुवि
धशिल्पिरचितं॥ रम्यंचित्रयुतं रति॥ भृगुजे शुक्रे रमणीयं मनोरमं चित्रयुतं चित्रकर्म
संयुक्तं॥ जीवगुरौ दृढं चिरकालस्थायि॥ चक्रस्थैरिति॥ चक्रस्थैर्भगणचक्राधिरूढैर्गृहस्व
गृहैः समीपस्थैरन्यैर्गृहैः सामंतपूर्वा समंता सर्वासु दिक्षु यथोपदिष्टं वदेद्ब्रूयात्॥ सामं
तपूर्वा प्रतिवेश्मिकवेश्मनो समंतात् क्रमेणेत्यर्थः॥ यथाग्रहदातग्रहस्य ग्रहाः पुरतः
पश्चाद्वा॥ पार्श्वयोर्वान्येग्रहा व्यवस्थितास्तेनैव क्रमेण सूतिकागृहस्यान्यादि निप्रतिवेश्म

९२

186

गृहाणि वाच्यानि॥ अन्ये सीमंतपूर्वामिति पठंति॥ सीमंताद्गृहपर्यंतात् पूर्विकारचनामिति॥
तथा च सारावल्यां॥ भवनग्रहसंयोगैः प्रतिवेश्यास्थितनीयाः स्युः॥ देवालयांबुपावककोष्ठ
विहाराद्यवस्करास्थाने॥ निज्ञागृहं च भास्करशशिकुजगुरुभार्गवार्किबुधयोगात्॥ अत्राच
र्यैलग्रहभूमिकाप्रमाणे॥ त्रिशालद्विशालज्ञानं च नोक्तं॥ तदुच्यते॥ बृहस्पतौ कर्कटस्थे
परमोच्चभागात् दृष्टे लग्नाद्दशमगे द्विभूमिकमुच्चभार्गवे वा कस्थिते षु त्रिभूमिकमुच्चभा
गस्थे चतुर्भूमिकं धनुषि सबले दशमस्थानस्थे गुरौ त्रिशालं ततगृहे मिथुनकन्यामीनस्थे
द्विशालं॥ उक्तं च स्वल्पजातके॥ गुरुरुच्चो दशमस्थो द्वित्रिचतुर्भूमिकं करोति गृहं॥ धनुषि
सबले त्रिशालं द्विशालमन्येषु यमलेष्विति॥ ५॥ अथ समस्तवास्तुनिकृंतनिकाग्रहमिति
ततरिक्तज्ञानं बोधकेनाह॥ मेषकुलीरतुलालिघटैः प्रागुन्नततो गुरुसौम्यगृहेषु॥ पश्चि

मू०
८५

जा०

मतश्चवृषेण निवासोदक्षिणभागकरौमृगसिंहौ॥२०॥मेषकुलीरतुलालिघटैः मेषःक्रियः कुलीरः कर्कटः तुला तुलः वृश्चिकः घटः कुंभः॥एतैर्लग्नैरेषामंशकैर्वालग्नगतैर्वास्तुनि प्राग्भागे सूतिकागृहं कर्तव्यं॥गुरुसौम्यगृहेषु गुरुगृहेषु धन्विमीनौ सौम्यगृहे मिथुनकन्ये॥एतेषु लग्नेषु तदंशकेषु वा उत्तरजो वास्तुनि उत्तरदिग्भागे सूतिकागृहं कुरुतः॥वृषलग्ने तदंशके वा पश्चिमतो निवासः प्रसूतिकागृहं॥मृगसिंहौ मकरकेशरिणौ दक्षिणभागकराविति॥दक्षिणभागे सूतिकागृहं कुरुतः॥५॥अथ सूतिकागृहे तत्शयननिमित्तं तज्ज्ञानं वैतालिकेनाह॥प्राच्यादिगृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः॥शय्यास्वपि वास्तुवद्वदेत्पादैः षड्‌त्रिनवांत्यसंस्थितैः॥२१॥गृहे सूतिकावेश्मनि प्राचादिषु पूर्वाद्यास्वष्टासु दिक्षु क्रियादयो मेषाद्याराशयः द्वौ द्वौ च तस्य षु दिक्षु कोणगता विदिक्षु गता द्विमूर्त्तयो

द्विस्वभावाः तद्यथा॥ मेषवृषयोर्लग्नयोर्गृहस्थस्य प्राग्भागे सूतिकाशयनं॥ मिथुने आग्नेयां॥
कर्कटसिंहयोर्दक्षिणे॥ कन्यायां नैऋते॥ तुलावृश्चिकयोः पश्चिमे॥ धनुषि वायव्ये॥ मकरकुं
भयोरुत्तरे॥ मीने ईशान्यामिति॥ एष एव विधिः शय्यास्वपि वक्तव्यः॥ युतउक्तं॥ शय्यास्वपि
वास्तुवद्देहे दिति॥ किंत्वयं विशेषः॥ पादैः षड्भिनवांत्यसंस्थितैरिति॥ इह खट्वापादाः षड्रि
खोपराशयः॥ लग्नात् षष्ठतृतीयनवमद्वादशराशयः खट्वायाः पादाः परिकल्प्या॥ तत्रैतज्ज्ञा
तं येन लग्नेन प्रसवस्तदुक्तदिशि शय्या॥ याशिरस्तस्मादेव षड्भिनवांत्याः पादास्तत्र द्वादश
तृतीयो पूर्वपादौ तृतीयो दक्षिणः द्वादशो वामः षष्ठनवमौ पश्चिमपादौ॥ तत्रापि षष्ठो दक्षि
णः नवमो वामः लग्नद्वितीयो शीर्षभागः चतुर्थपंचमौ दक्षिणमंगं॥ सप्तमाष्टमौ पादां
तरभागः दशमैकादशौ वाममंगे प्रयोजनं॥ विनतत्वयपलक्षैः क्रूरैस्तत्तुल्य उपघातः इति॥

यत्र द्विभावराशयः स्थितास्तत्र विनतत्वं॥ यत्र पापास्तत्र तत्सदृशस्योपघातः॥ एवं सदैवा
नुपपन्ने खड्गागमप्रसंगः यस्मादवश्यं कश्चिदपि यमलैर्भाव्यं कश्चित्पापग्रहश्च॥ तस्माद्यत्र
यमलर्क्षे सौम्यग्रहस्य स्वामियुतदृष्टं तत्रापि विनतत्वं॥ पापग्रहो स्वोच्चराशि त्रिकोणमि
त्रसे त्रस्थः अशुभफलकरो न भवतीति॥ ७॥ अधुनोपसूतिकासंख्याज्ञानमनुष्टुभाह॥ चं
द्रलग्नांतरगतैर्ग्रहैः स्युरुपसूतिकाः॥ बहिरंतश्च चक्रार्द्धे दृश्यादृश्येन्यथा परे॥ २२॥ लग्ना
दारभ्य यत्रराशौ चंद्रमा व्यवस्थितस्तदंतरे तयोर्मध्ये यावंतो ग्रहा व्यवस्थितास्ते चंद्र
लग्नांतरगताः ग्रहास्तैरुपसूतिकास्स्युः॥ तावत्संख्या उपसूतिकाः॥ सूतिकासमीपवर्तिन्यः
स्त्रियः स्युर्भवेयुः ताश्च ग्रहतुल्यजातिवयो वर्णरूपाः॥ तथा च सारावल्यां॥ शशिलग्नवि
वरयुक्ता ग्रह॥ तुल्याः सूतिकाश्च विज्ञेयाः॥ अनुदितचक्रार्द्धयुतैरंतर्बहिरन्यथा लेके॥

रूपविभूषणयोगस्तासां ज्ञेयः शुभैर्योगात॥ क्रूरैर्विरूपप्रदेहालक्षणहीनासुरौद्रवीर्याश्च॥
मिश्रैर्मध्यमरूपाबलसहितैः सर्वमेवतद्वद्धार्यं॥ बहिरंतरश्चेति॥ तत्र यावंतो दृश्ये च
चक्रार्द्धे व्यवस्थिताः तावत्संख्या उपसूतिका बहिर्गृह बाह्ये वक्तव्याः॥ यावंतश्चादृश्ये चक्रा
र्द्धे व्यवस्थितास्तावत्संख्या अंतर्गृह अभ्यंतरे वक्तव्याः॥ अत्र लग्नस्य यावंत उदिता भागा
स्तथा द्वादशैकादशादशम नवमाष्टमराशयस्तत्समराशौ लग्नानुदितभागतुल्यं दृश्य
मानं शेषमदृश्यमिति॥ अन्यथापरे॥ अपरे अन्ये आचार्या अन्यथान्येन प्रकारेण दृश्य
चक्रार्द्धे भ्यंतरगता वर्णयंति॥ अदृश्ये बाह्यस्था॥ तथा च जीवशर्मा उदयतिशशिमध्यसं
स्थे गृहेः सुरूपसूतिकास्तत्रे॥ उदगच्छगते बाह्ये दक्षिणगैरंतरे ज्ञेया इति॥ एतदाचार्यस्य
नाभिप्रेतं॥ यतो नेनैव स्वल्पजातके उक्तं॥ शशिलग्नोतरसंस्थाग्रहतुल्याः सूतिकाश्च वक्त

बृ०
९५

जा०

व्याः॥ उदगद्रेभ्यंतरगा बाह्या चक्रस्य दृश्येर्द्धे इति॥ अत्र च आयुर्दायविधिना द्वित्रिगुणत्वं ल
ब्धा ग्रहस्थानवशाद्युपसूतिकासंख्यानिश्चयः कार्यः॥ यदि बहुजनप्रसूतियोगो न भवति त
थापि ग्रहसंख्याधिकसूतिकासंभवो यत्र भवति॥ तत्र बहुजनप्रसूतियोगेन भवितव्य
मिति॥७॥ अथ जातकस्य स्वरूपं ज्ञानं बोधकेनाह॥ लग्ननवांशपतुल्यतनुः स्याद्वीर्ययुत
ग्रहतुल्यतनुर्वा॥ चंद्रेसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः॥२३॥ लग्नन
वांशयेति॥ जन्मकाले लग्ने यो नवांशको भ्युदितस्तस्य यः स्वामी स लग्ननवांशपः॥ तत्तुल्य
लग्नस्तदाकारो जातो वक्तव्यः॥ यथा मधुपिंगलदृगित्यादि॥ अथवा जातककाले सर्वग्र
हेभ्यो यो ग्रहो वीर्ययुतो बलवान् तत्तुल्यतनुर्वा वक्तव्यः॥ यदि लग्ननवांशकस्थो राशि
र्बलवान् भवति तदा तदंशपतुल्यतनुर्भवति। अन्यथा सर्वग्रहेभ्यो वीर्यवत्ग्रहतुल्य

९५

तृतीयद्रेष्काणो नवत्रो न प्रथमद्वितीयतृतीयशरीरभागपरिच्छेदः॥ तत्र शरीरप्रथम
विभागः शिरोधस्ताद्यावन्नाभिस्तावद्द्वितीयः नाभेरधः प्रभृतीपादांतं यावत्तृतीयः॥ तेषा
मंगविभागानां राशिविभागं शार्दूलविक्रीडितेनाह॥ कंठकश्रोत्रनसाकपोलहनवो वक्त्रं
च होरास्यस्तकंठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः॥ वस्तिः शिश्नगुदे ततश्च वृष
णानूरू ततो जानुनी जंघे घ्रित्युभयत्र वाममुदितैर्द्रेष्काणभागैस्त्रिधा॥२५॥ त्रिप्र
कारं त्रिधा॥ त्रिभिर्द्रेष्काणभागैस्त्रिधा शरीरत्रिविभागः॥ तत्र लग्नस्य प्रथमद्रेष्काणे
उदयति प्रथमो मूर्द्धांगविभागः॥ द्वितीयद्रेष्काणे उदयति कंठपूर्वको द्वितीयो विभा
गः॥ तृतीयद्रेष्काणे उदयति वस्तिपूर्वकं तृतीयो भागः तत्रांगविभागे वामदक्षिणाऽ
वयवव्याख्यानमाह॥ वाममुदितैरिति॥ राशिभिरुदितैर्दृश्यभागावस्थितैर्वामांगवि

र०
७७

जा०

भागः लग्नस्योदितभागास्तथाद्वादशैकादशानवमाष्टमाः सप्तमराशेर्लग्नानुदितभा
गास्तथा द्वितीयतृतीयचतुर्थपंचमषष्ठासप्तमराशेर्लग्नोदितं लग्नतुल्यभागः एवस्थि
ते॥ लग्नप्रथमद्रेष्काणे यदि लग्नराशिः कंशिरः परिकल्पनीयः लग्नाद्वितीयद्वादशौ
दृक्चक्षुषी॥ तत्र द्वितीयो दक्षिणं अक्षि॥ द्वादशो वामं तृतीयैकादशौ श्रोत्रे॥ तत्र तृती
यो दक्षिणमेकादशो वामं॥ चतुर्थदशमौ नासापुटौ॥ चतुर्थो दक्षिणं दशमो वामं॥ पं
चम नवमौ कपोलौ॥ पंचमो दक्षिणं नवमो वामं॥ षष्ठअष्टमौ हनुरी॥ षष्ठो दक्षिणमष्टमो
वामं॥ सप्तमो वक्त्रं मुखं॥ एवं राश्याद्युपलक्षितः प्रथमोंगविभागः॥ ते कंठादाकर्षति॥
अथ द्वितीयो द्रेष्काणोदयस्तदा तेहोरादयोंगविभागः परिकल्प्यः॥ तद्यथा॥ लग्नं कंठो
गलो॥ द्वितीयद्वादशौ स्कंधौ॥ तत्र द्वितीयो दक्षिणमंगो द्वादशो वामः॥ तृतीयैकादशौ बाहू॥

७७

तनुरिति॥चंद्रसमेतनवांशपवर्ण इति॥ योनवांशकश्चंद्रेणशशिनासमेतः संयुक्तश्चं
द्रो यस्मिन्नवांशकेस्थित इत्यर्थः॥ तस्यनवांशकराशेर्योधिपतिःस चंद्रसमेतनवांशक
पः तस्य यो वर्णस्तद्वर्णजातो भवति॥ अत्र च वर्णो रक्तस्यामो भास्कर इति॥ अन्ये चंद्राक्रां
तराशिवर्णमेव आहुः॥ अथारक्तश्वेतः शुक्लतनुनिभ इत्यादि॥ तत्र शुक्लवर्णस्यासंभवाद
युक्तमेतत्॥ एतच्च वर्णादि जातिकुलदेशान बुध्या वक्तव्यं॥ उक्तं च॥ बलिनः शादृशी मूर्तिर्बु
ध्या वा जातिकुलदेशानिति॥ कादिविलग्नविभक्तभगात्र इत्यनेन विधिना शिरः प्रभृतीना
मवयवनां ह्रस्वदीर्घत्वं तिरूपयति॥ कादिनि विलग्नाभिर्विभक्तानि भैराशिभिर्गात्राणि
यस्य स कादिविलग्नविभक्तभगात्रः॥ तत्र लग्नादयो राशयः कादिषु शिरः प्रभृतिषु शा
त्रेषु परिकल्प्याः॥ यथाकालांगानीति॥ तत्र लग्ने शिरः द्वितीये मुखं॥ तृतीये उरः॥ च

195

तुर्थोदरं ॥ पंचमः क्रोडः ॥ षष्ठः ॥ सप्तमो बस्तिः ॥ अष्टमः शिश्नगुदे ॥ नवमः ऊरू ॥ दश
मा जानुनी ॥ एकादशो जंघे ॥ द्वादशो पादाविति ॥ तत्र च राशीनां प्रमाणमुक्तं पूर्वार्द्धे वि
षयाद्ध्याय इति ॥ तत्र यत्रांगस्थे दीर्घे राशौ दीर्घराश्यधिपो वा व्यवस्थितो तद्वशितदंगं तस्य
दीर्घत्वं वक्तव्यं ॥ तथा च सत्यः ॥ दीर्घाधिपतिर्दीर्घे गृहे स्थितो वयवदीर्घत्वं भवति ॥ अर्था
देवाल्पप्रमाणराश्यधिपोल्पराशिव्यवस्थितो वा तदंगाल्पत्वं भवति ॥ अत्र राश्यधिपोपि
अल्पराशिव्यवस्थितो गमध्यमत्वं भवति ॥ अल्पराश्यधिपो दीर्घराशिव्यवस्थितो गम
ध्यमत्वं यत्रांगराशौ बहवो व्यवस्थितास्तत्र बलवद्ग्रहवशाद्वाच्यं ॥ यत्र न कश्चिद्व्यवस्थि
तस्तत्र राशिप्रमाणतयोग्यं वाच्यं ॥ इति सूतिकाप्रकरणं ॥ अत्र सूतिकाध्याये जातस्य
व्रणमशकादिचिन्हानि स्वर्गार्थं मंगलप्रकरणमारभ्यते ॥ तत्र च लग्नप्रथमद्वितीय

तृतीयो दक्षिण मेकादशो वामं॥ चतुर्थदशमौ पार्श्वे चतुर्थो दक्षिणं दशमो वामं पंचमनव
मो हृद्भागौ॥ पंचमो दक्षिणभागः नवमो वामभागः॥ षष्ठाष्टमौ क्रोड उदर भागौ॥ षष्ठो दक्षि
णः अष्टमो वामः॥ सप्तमो नाभिरिति॥ नाभिग्रहणमपरोदरोपलक्षणार्थं एष द्वितीयो ऽगवि
भागः वस्तिशिश्नगुदे इति॥ लग्ने द्रेष्काणे तृतीये उदयति तत एव होरादयस्तृतीयो ऽगविभा
गः परिकल्प्याः॥ तद्यथा लग्नं वस्तिः नाभिलिंगयोर्मध्यमभागः॥ द्वितीयद्वादशौ शिश्नगुदे॥
तत्र द्वितीयः शिश्नगुदयोर्दक्षिणभागः द्वादशो वामः॥ ततोनंतरं तृतीयैकादशौ वृषणौ॥
तृतीयो दक्षिणः एकादशो वामः॥ चतुर्थदशमकरू॥ चतुर्थो दक्षिण उरु॥ दशमो वामः॥
पंचमनवमौ जानुनी॥ पंचमो दक्षिण जानु॥ नवमो वामं॥ षष्ठाष्टमौ जंघे॥ षष्ठो दक्षि
ण जंघा॥ अष्टमो वामजंघा सप्तमः पादद्वयमिति॥ ॥ अथ अंगज्ञानप्रयोजनमा

दृल्वविक्रीडितेनाह॥ तस्मिन्यापयुते व्रणः शुभयुते दृष्टेच लग्नादि शास्त्रसौम्यांशस्थिरसं
युते सुसहजस्यादन्यथागंतुकः॥ मंदेश्मानिलजोग्निशास्त्रविषजो भौमे बुधे भूर्भुवः स्त्र
र्यकाष्ठचतुष्पदेषु हि मृगोस्त्र्यब्जयोन्यैः शुभः॥२५॥ तस्मिन्पापयुते द्रेष्क्रि॥ तत्र प्रथम
द्रेष्काणजातस्य वक्ष्यमाणांगविभागः॥ तस्मिन्पापयुति॥ यत्रांगराशौ पापग्रहसंयुते त
त्रांगे व्रणं विस्फोटकादि छिद्रं मशकादिचिन्हमादिशेत॥ तस्मिन्पापयुते गशौ शुभयु
ते दृष्टे सौम्यग्रहसंयुक्तेवलोकिते वा तत्राशुपलक्षितेंगे लक्ष्मादिजातं मशकादि चिन्ह
वाच्यं॥ स्वक्षांशाइति॥ स एव ग्रहो व्रणमशकादिकर्त्ता स्वर्क्षे स्वराशौ स्वनवांशके वा स्थि
तो भवति॥ स्थिरराशौ स्थिरांशके वा स्थितस्तदा व्रणमशकादिकं सहजोयंजातस्य ज
तो भवति॥ अन्ययोक्त विपर्यस्थे आगंतुको जातस्योत्तरकाले केनचित्त्रिमित्तेन वक्ष्यमा

नेन स्वदशाकाले वक्तव्यं॥ आगंतुकस्य व्रणादेर्गर्हवशेन तन्निमित्तमाह॥ मंदेश्मानिल
निलंभजइति॥ मंदे शनैश्चरे व्रणकर्तृत्वं प्राप्ते तद्धर्मिणाश्मनापाषाणहेतुको निल
जो वातव्याधिहेतुको वा वक्तव्यः॥ भौमे व्रणस्य कर्तृत्वं प्राप्ते ऽग्निशस्त्रविषयजोऽग्निहे
तुकः शस्त्रहेतुको विषहेतुको वा वक्तव्य बुधे भ्रमुर्वोच्छितपाताद्भूम्यभिघातहेतुको लोष्ट
प्रहारहेतुको वा॥ सूर्ये रवौ काष्ठहेतुश्चतुष्पदप्राणिहेतुको वा वक्तव्यः॥ हिमगौ चंद्रे शृंग्यब्जजः
शृंग्यभिघातहेतुकः शृंगे विघाते यस्य प्राणिनः स शृंगी तज्जातो वा जलप्राणिहेतुको वा
वक्तव्यः॥ अन्ये शुभं॥ अन्ये त्वाहा यत्रोगदेशस्थो भवंति तत्राशुभव्रणकरा न भवंति॥ त
त्रावशेषौ गुरुसितौ शुभप्रयुक्तौ बुधोपि व्रणकरो न भवंति॥ तस्माद्धेतुवचनाद्दृश्यते॥ बु
धः पापप्रयुक्तो व्रणकरः क्षीणचंद्रमास्तथा॥ ततोन्यैः शुभमित्युक्तं॥ अथ व्रणज्ञानेहारि

न्यात्॥ समनुपतिता यस्मिन्भागे त्रयः सबुधा ग्रहा भवति नियमात्तस्या वाप्तिः शुभेष्वशु
भेषु वा॥ व्रणकृत्तदशुभः षष्ठे देहे तनोर्भसमाश्रिते तिलकमसकृद्दृष्टः सौम्यैर्युतश्च सल
क्ष्मवान्॥२८॥ समनुपतिता इति॥ यस्मिन्भागे वामे दक्षिणे वा त्रयः सबुधा ग्रहाः यो न्ये ग्रहा
श्चतुर्थेन बुधेन सहिताः समनुपतिताः समाश्रितास्तत्रांगे प्रवर्त्तते व्रणादेर्नियमान्निश्च
यादवश्यं प्राप्तिर्भवति॥ शुभेष्वशुभेषु वा ते ग्रहाः सबुधाः शुभाः सौम्याः अशुभाः पापा
वा भवंति॥ तथापि तत्रांगे तस्य व्रणवाप्तिर्वक्तव्या॥ तेषां मध्याद्यो बली स्वदशामवाप्य
करोति॥ कस्मिन्स्थाने तनोर्भसमाश्रिते॥ तनोर्लग्नात्तस्य षष्ठस्थो राशिः॥ कल्यंगानि
यनेन दर्शितांगविभागे यस्मिन्भवति तस्मिन्भसमाश्रिते राशियुक्ते देहे शरीरे भव
ति॥ तत्रापि स्वस्वर्क्षांशास्थिरसंयुतेषु सहजः स्मादन्यथागंतुकः स्यात्तु वर्तनीयं स एव ष

स

दृष्टस्थानस्थः पापः सौम्येन सौम्यग्रहेण यदा दृष्टो भवति॥ तदा तत्रांगे तिलकमसद्भवति॥
तिलकः सूक्ष्मविंदुः मशकोऽर्जुन॥ अथ शुभग्रहेण स एव पापयुतस्तदा स लक्ष्मवान्भवति॥
राहूपलक्षितमंगं सचिह्नं भवति॥ अत्रस्थो नघ॰नो लो मनिच योलक्ष्म इति॥ इति भट्टोत्पल
विरचितायां बृहज्जातकविवृतौ जन्मविधिर्नामाध्यायः पंचम ५॥ अथारिष्टाध्यायो व्याख्याय
ते॥ तत्र तावज्जातस्यारिष्टसंभवे सत्यायुर्दायाष्टकवर्गादेर्नाशः कर्त्तव्यः तस्मात्प्रथममरि
ष्टाध्यायं वक्ष्यन्ति॥ तत्रारिष्टत्रयं विद्युन्मालयाह॥ संध्यायां हिमदीधितिहोरायां पापैर्भां
तगतैर्निधनाय॥ प्रत्येकं शशिपापसमेतैः केंद्रैर्वा स विनाशमुपैति॥१॥ संध्यायामिति॥
संध्यायालक्षणं संहितायामुक्तं॥ अर्द्धास्तमयात्संध्या व्यक्तीभूता न तारका यावत्॥ तेजःपरि
हानिमुखाद्भानोरर्द्धोदयो यावत्॥ अस्मिन्संध्याकाल इति॥ तत्र जन्मनि यस्य संध्याकालो

भवति तत्काले लग्नगता हि मरीचिं तश्चंद्रस्य होरा भवति॥ यथासंभवं पापैर्भौतगतैः यत्र
तत्र राशिस्थानवमांशगताः पापा भवंति॥ तद्देषयोगे जातस्य निधनाय मरणाय भवति॥
प्रत्येकमिति॥ एकमेकं प्रति प्रत्येकं॥ राशी चंद्रः पापाः त्रयश्चतुर्षु केंद्रेषु व्यस्थिता भवंत्ये
कैकं प्रति यथासंभवं चत्वार्यपि केंद्राण्याक्रांतानि भवंति॥ तथापि यस्य जन्म भवति॥ स
विनाशमुपैति मृत इत्यर्थः॥ अथान्यारिष्ठयोगानिंद्रवज्रयाह॥ चक्रस्य पूर्वापरभाग
गेषु क्रूरेषु सौम्येषु चरशाढलग्ने क्षिप्रं विनाशं समुपैति जातः पापैर्विलग्नास्तमयाभित
श्च॥२॥ यावंतो भागलग्नस्योदितास्तावंत एव भागाश्चतुर्थराशेः परित्यज्य शेषभागेभ्या
रभ्य पंचमषष्ठे पूर्वार्द्धं॥ तत्र चक्रस्य पूर्वभागे क्रूराः पापाः इतरभागे पश्चिमे सौम्याः
शुभग्रहाः कीटलग्ने वृश्चिकराशावुदये कर्कटे वोदयस्थिते जातः शिशुः क्षिप्रमाश्वेव

विनाशं मरणमुपैति प्राप्नोति॥ ननु च अत्र पूर्वं वृश्चिकमीनानां मतान्तरे कीटसंज्ञानामभ्युपगम्यतेऽत्र त

त्र वृश्चिककर्किकाणामेव कथं व्याख्यातानि इति समाधीयते॥ मकरमीनयोर्जलचरत्वादपि समतान्तरे कीटसं

ज्ञानामभ्युपगम्यते॥ यस्माद्बादरायणः॥ पूर्वापरभागगतैरशुभैरशुभैर्लग्ने कर्कटे लग्ने॥

जातस्य शिशोर्मरणं सद्यः कथयन्तीति यवनेन्द्राः॥ पापैर्विलग्नास्तमयाभितश्चेति॥ पापैः क्रू

रग्रहैर्विलग्नाभितः अस्तमयाभितश्च स्थितैश्चन्द्राद्वा जातः क्षिप्रं शीघ्रमेव तु नाशमुपैति॥

अत्र केचिदेके योगद्वयं व्याचक्षते॥ अभितश्चोभयतः लग्नात् पापैरभितः एको योगः॥ अ

स्तमयादभितो द्वितीयः॥ तत्र द्वादशद्वितीयस्थयोर्लग्नात्पापयोर्जातो म्रियते षष्ठाष्ट

मयोश्च पापयोश्च जातो म्रियते॥ तथा लग्नसप्तमाच्च॥ अन्ये पुनरभितः शब्दमाभिमुख्ये

न वर्तते इत्यनुवर्णयन्ति॥ तत्र लग्नाद्यो द्वितीयराशौ ग्रहस्थितः स उदयमभिलषते॥ ल

ग्नस्याभिमुखो भवति॥ यश्च लग्नादष्टमराशौ भवति सोऽस्तमयमभिलषतीत्यतः स समरा
शावभिमुखो भवति॥ तेनैतज्ज्ञातं॥ लग्नात् द्वितीयाष्टमगतैः सर्वैः पापैर्ज्जातो म्रियते॥
वयं पुनरभिप्रायमाभिमुख्यमिति ब्रूमः॥ यस्माद्यवनेश्वरः॥ ग्रहेषु लग्नाभिमुखेषु सर्वे
ष्ववाप्तवीर्येषु स्ववर्गगेषु इति किंतु॥ यो लग्नाद्द्वादशस्थाने स्थितः स उदयमभिलषति॥
लग्नाभिमुखो भवति॥ यश्च षष्ठे स्थितः लग्नात् सोऽस्ताभिमुखो भवति॥ यस्माद्ग्रहाणां प्राङ्मु
खी गतिः॥ उक्तं च॥ प्रागातस्तुल्यजवा ग्रहाश्च सर्वे स्वमंडलगा इति॥ तत्र पूर्वाभिमुखत्वं न
तो लग्नाद्द्वितीयस्थस्य नराभिमुख्यं न संभवति न चाष्टमस्थस्यास्ताभिमुख्यं॥ तेनैतज्ज्ञा
तं॥ लग्नात् द्वादशषष्ठाश्रितैः पापैर्यैः स्वजन्मसम्रियत इति॥ भगवता गार्गेण सर्वाण्ये
व व्याख्यातान्यभिमुखानीति॥ तथा च तद्वाक्यं॥ रिपुव्ययगतैः पापैर्यदि वा धननृत्युगैः॥

लग्ने वा पापमध्यस्थे द्यूने वा मृत्युमाप्नुयादिति॥ अथ योगांतरमनुष्टुभाह॥ पापानुदयास्त
गतो क्रूरेण युतश्च शशी॥ दृष्टश्च शुभैर्न यदा मृत्युश्च भवेदचिरात्॥३॥ एकः पापउदयल
ग्ने स्थितोन्यः सप्तमे गतः शशी चंद्रमाः यत्रतत्रस्थः क्रूरेण पापेन युतो भवति स च सौ
म्यैः शुभग्रहै र्यदि न दृष्टस्तदा जातस्य मृत्युरचिराच्छीघ्रमेव भवेत्॥ अथार्यांतरम
नुष्टुभाह॥ क्षीणे हिमगौ व्ययगे पापैरुदयाष्टमगैः॥ केंद्रेषु शुभाश्च न चेत् क्षिप्रं निधनं
प्रवदेत्॥४॥ हिमगौ चंद्रे क्षीणे लग्नाद्व्ययगे द्वादशस्थे तथा पापैः क्रूरग्रहैः रुदयाष्टमगैः
लग्नस्थैरष्टमगतैश्च केंद्रेषु केंद्रके पुचे यदि शुभा न भवेति॥ तदा जातस्य क्षिप्रमाश्वेव
निधनं मरणं वदेद्भूपात्॥ अत्र केचित् पापैरुदयाष्टमगैरिति नेच्छंति॥ तदप्युक्तं॥ यस्माद्भ
गवान् गार्गिः॥ क्षीणे चंद्रे व्ययगते पापैरष्टमलग्नगैः॥ केंद्रबाह्यगतैः सौम्यैर्जातस्य

निधनंवदेत् ॥ अथरिष्टांतरसममालिन्याह ॥ क्रूरसंयुतःशशीस्मरांत्यलग्नमृत्युगः ॥ कं
टकाद्बहिःशुभैरवीक्षितश्चमृत्युदः ॥५॥ शशीचंद्रःक्रूरेणग्रहेणसंयुतस्तथाभूतःस्मरां
त्यलग्नमृत्युगःसप्तमद्वादशाष्टमलग्नानामन्यतमस्थस्तथाशुभग्रहैःसौम्यैःकंटकबाह्य
स्थैःकेंद्रवर्ज्जमन्यस्थानस्थैरवीक्षितोनदृष्टोयदिभवतितदाजातस्यमृत्युदोमरणदोभ
वति ॥ अर्थादेवसौम्यैःकेंद्रस्थैस्तदारिष्टाभावः ॥ तथाचसारावल्यांव्ययाष्टसप्तोदयगेश
शांकेपापैःसमेतेशुभदृष्टिहीने ॥ केंद्रेषुसौम्यग्रहवर्जितेषुजातस्ययद्यःकुरुतेप्रनाशं ॥
अथरिष्टांतराणिपृथ्व्याह ॥ शशिन्यरिविनाशगेनिधनमाशुपापेक्षितेशुभैरथसमाष्टकं
दलमतश्चमिश्रैःस्थितिः ॥ असद्भिरवलोकितेबलिभिरत्रमासंशुभेकलत्रसहितेच
पापवर्जितेविलग्नाधिपो ॥६॥ शशिनिचंद्रेअरिविनाशगेलग्नातषष्ठस्थानस्थेष्टम

स्थे वा तत्र च पापानां क्रूरग्रहणां मध्याद्न्यतमेनेक्षितेऽदृष्टे सौम्यग्रहेणादृष्टे जातस्य निध
नं मरणमाशु क्षिप्रमेव भवति॥ शुभैरिति॥ अथ लग्नात षष्ठाष्टमगे चंद्रे शुभैः सौम्यग्रहै
र्दृष्टे पापेनादृश्यमाने जातस्य समाष्टकं वर्षाष्टकं स्थितिर्जीवितं वक्तव्यं॥ ततो मरणमि
ति॥ समिश्रा व्दोवर्षपर्याये॥ दलमतर इति॥ लग्नात षष्ठाष्टमगे चंद्रे मिश्रैः पापैः सौम्यश्च दृ
ष्टे अतोस्मात् समाष्टकात वर्षाष्टकाद्दलमर्द्धं वर्षचतुष्टयं स्थितिर्वदेत् ततो मरणमिति॥ अ
थ यदि वृषस्थाष्टमस्थे चंद्रमसि न केनचिद्दृश्यमाने रिष्टयोगाभावः॥ चंद्रमा यदि षष्ठाष्ट
मस्थः सौम्यक्षेत्रगतो भवत्यथवा पापक्षेत्रगतः सौम्ययुक्तो भवति॥ तदा न मरणप्रदः॥
यस्माद्भुवनेस्वरः॥ लग्नाच्छत्रीने धनगोऽशुभैः सषष्टे यवा पापमिरीक्षितश्च॥ सर्वापुरा
हंति शुभैर्विमिश्रस्तदा क्षितो ष्टाष्टकपर्यायण॥ तथा यस्य लग्नपक्षे दिवाजन्मनि शुक्लपक्षे

रात्रौ जन्मनि लग्नात् षष्ठाष्टमगः शशी शुभाशुभदृष्टोपि भवति तस्य न मरणप्रदः॥ यस्मा
न्मोऽव्ययः॥ पक्षे सिते भवति जन्म यदि क्षपायां कृष्णे थवा हनि शुभाशुभदृश्यमानः॥ तच्चंद्रमा
रिपुविनाशगतोपि लग्नाद्यापत्सु रक्षति पितेव शिशुं न हंति॥ असद्भिरिति॥ अत्रास्मिन्नेव प
श्चे ष्टमे वा स्थाने शुभसौम्यग्रह बुधगुरुसितानामन्यतमोस्मि ते तस्मिंश्चासद्भिः पापैर्बलि
भिर्वक्रर्युयुक्तैरवलोकिते दृष्टे जातस्य मासं स्थितिर्जीवितं वक्तव्यं॥ ततो मरणमिति॥ अ
त्र निर्दिष्टयोगस्थे चंद्रमसि शुभदृष्टे रिष्टयोगाभावः॥ यस्माद्दनेनैव स्वल्पजातके उक्तं॥
पापजितो लग्नाच्छौम्याः पापैर्बलिभिरवलोकितन शुभदृष्टाः॥ मासेन मरणदास्युः॥ पापजितो ल
ग्नपश्चास्ते॥ कलत्रसहित इति॥ विलग्नाधिपे जन्मलग्नपातौ कलत्रसहिते सप्तमस्था
नस्थे वा पापावर्जिते क्रूरयुद्धविजिते विजितलक्षणं॥ दक्षिणदिस्थः पुरुषो वेपथुमा

प्यसरन्तोणुः॥ अधिरूढो विलुतो यः निःप्रभो विवर्णश्च यः स जितः॥ भौमादीनां आकाशे युद्धं
भवति॥ यः दक्षिणाशास्थः स ग्रह जितः॥ कस तादीनां युद्धमित्युक्त्वा चंद्रदीपिकायां पुरुषो
रुक्षः वेपथुः कंपायमानः॥ अन्यग्रहमप्राप्य सन्निवृत्तः विपरितः इति मापन्नः अनुरुक्षः
अधिरूधः॥ अनेनाक्रांतलुतं विकारसहितः निःप्रभो दीप्तिरहितः विवर्णो वर्णरहितः
स जित इति॥ चशब्दन्मासंस्थितिस्ततो मरणमिति॥ अथारिष्टांतराणि मंदाक्रांतयाह॥
लग्ने क्षीणे शशिनि निधनं रंध्रकेंद्रेषु पापैः पापांतस्थे निधनहिबुकद्यूनयुक्ते च चंद्रे॥ एवं
लग्ने भवति मरनं छिद्रसंस्थेश्च पापैर्मात्रासार्द्धं यदि च न शुभैर्वीक्षितः शक्तिमद्भिः॥७॥
लग्नक्षीण इति॥ क्षीणे शशिनि चंद्रे लग्ने स्थिते रंध्रकेंद्रे ष्टमकेंद्रेषु पापे क्रूरे स्थिते यथा
संभवथौ मेवं विधे योगे जातस्य निधनं मरणं वक्तव्यं॥ तथा चंद्रे शशिनि पापांतस्थे म

ध्यगेतनिधनहिबुकघूकनयुक्तेष्टमभचतुर्थसप्तमस्थानानामन्यतमस्थे जातस्य मर
णं वक्तव्यं॥ एवमिति॥ एवमनेनैव प्रकारेण लग्नगे पापांतस्थे पापे क्रूरे यदि शुभैः सौम्यग्र
हैः शशिमद्भिः सबलैः चंद्रमान वीक्षितो न दृष्टो भवति तदा जातस्य मो त्रासार्द्धं जतन्यास
ह मरणं वदेत॥ अथ निर्दिष्टयोगस्थश्चेच्चंद्रमा शुभैर्दृश्यते बलिभिस्तदा जातस्यैव मरणं
न तन्मातुरिति॥ अथारिष्टांतराणि इंद्रवज्रयाह॥ राश्यंतगैसद्भिरवीक्ष्यमाणे चंद्रे त्रिको
णोपगतैश्च पापैः॥ प्राणैः प्रयात्याशु वियोगमस्ते च पापैस्तुहिनांशु लग्ने॥८॥ चंद्र
शशि निराश्यंतगे यत्र तत्र राशौ नवमनवांशकगते तथाभूते सद्भिः शुभग्रहैर्नवीक्ष्यमाने
न संदृष्टे पापैः क्रूरै स्त्रिकोणोपगतैर्नवमपंचमस्थानस्थैर्जातः आशु क्षिप्रमेव प्राणैर
सुर्वियोगं प्रयाति गच्छति म्रियत इत्यर्थः॥ अस्ते च पापापैरिति॥ तुहिनांशौ चंद्रे लग्नगे स्ते

सप्तमे सप्तमस्थानस्थितैः पापैश्च शब्दाच्छुभराशेश्चैव प्राणैर्वियोगं प्रयाति॥ अत्र तु हिनं
शुलग्न इति॥ कर्कटलग्ने केश्चिद्व्याख्यातं तदयुक्तं॥ यस्मादनेनैव स्वल्पजातके उक्तं॥ उद
यगतो वा चंद्रः सप्तमराशिस्थैः पापैरिति॥ अथारिष्टांतराणि हरण्याह॥ अशुभसहिते य
स्ते चंद्रे कुजे निधनाश्रिते जननिसुतयोर्मृत्युर्लग्ने रवौ तु सप्तशस्त्रजः॥ उदयति रवि
शितांशौ वा त्रिकोण विनाशगे निधनमशुभैर्वा यैर्पितैः शुभैर्न युते स्थिते॥१॥ अशुभस
हित इति॥ चंद्रे राशिस्य शुभसहिते यद्यपि सामान्येनोक्तं तथाप्यशुभेन शनैश्चरेणै
व युक्ते तथाभूते लग्नगते न केवलं याकृदस्तेराहोराशिगते लग्नश्च कुजे अंगारके नि
धनाश्रितेष्टमस्थानस्थे जननिसुतयोर्मृत्युर्भवति॥ रवौ तु सप्तशस्त्रजमिति॥ एवंविधे यो
गे रवादित्ये स्थिते जननिसुतयोः सह मृत्युः सशस्त्रजः शस्त्रेनायुधेन जातस्य मृत्युर्भव

त्ति॥ एतदुक्तं भवति॥ शनैश्चरेण बुधेन वा युक्तेऽर्कग्रस्ते लग्नगते कुजवाष्टमगे जातस्य
मात्रा सह शस्त्रहेतुकं मरणं वाच्यं॥ नत्वशुभ इति॥ सामान्येनोक्तं तत्केवलेन शनैश्चरेण
युक्ते चंद्रे शनिनीति किं व्याख्यातं॥ शनैश्चरेण बुधेन वा युक्तेऽर्क इति नोक्तं॥ अत्रोच्यते॥
असंभवादेव॥ पौर्णमास्यां चंद्रग्रहणं भवति॥ तत्र तावदर्कसहितेन चंद्रमसा न भवि
तव्यं॥ तस्माच्चंद्रग्रहणे शनैश्चरेणेति व्याख्यातं॥ अर्कग्रहणे तु पुनर्बुधेन यदि युक्तो
र्कौ भवति॥ तदार्कसहितत्वात्तस्य पापता भवति यतोर्कस्य बुधसहितत्वमिति व्याख्या
तं॥ क्षीणेंदुयोगादर्कस्य पापयोग एवायं न गम्यते॥ यस्मादवश्यममावास्यांते र्कग्रहणे
न भवितव्यं॥ तत्र चावश्यमर्केण क्षीणचंद्रसहितेन भवितव्यं॥ यद्यर्कः क्षीणेंदुनायुक्त
आचार्यस्याभिप्रेतः स्यात्तदा ग्रस्तेऽर्के निधनाश्रिते कुजे इति॥ केवलमवक्ष्यत॥ उदय

तिखाचित्यादि॥खावादितेउदयतिलग्नगतेशीतांशौचंद्रेवालग्नगतेतथाशुभैपापैस्त्रि
कोणविनाशगैर्नवमपंचमाष्टमस्थैःसर्वैरेवयथासंभवमेवंविधंयोगस्थेरवौचंद्रेवा
शुभैःसौम्यग्रहैर्वक्रयोपैतैर्बलिवद्भिरयुक्तेक्षितेनसंयुक्तेनापिदृष्टेजातस्यनिधनंमर
णंवदेत॥अथादिवोक्तयोगस्थेरवौचंद्रेवाबलिभिःशुभैर्युतेदृष्टेचारिष्टयोगाभावः॥
अथारिष्टांतरमपरवक्त्रेणाह॥असितरविशशांकभूमिजैर्व्ययनवमोदयनैधना
श्रितैः॥भवतिमरणमाशुदेहिनोयदिबलिनागुरुणावीक्षितः॥१०॥असितःसौरिःरविरा
दित्यःशशांकश्चंद्रःभूमिजोंगारकःएतैःशनिरविचंद्रभौमैर्यथाक्रमंव्ययनवमोदय
नैधनाश्रितैःद्वादशनवमलग्नाष्टमस्थानस्थैःतत्रतज्जातं॥शनैश्चरोद्वादशेर्केनव
मेचंद्रेलग्नगेभौमेष्टमस्थेएतेसर्वेत्वयोगकर्तारोग्रहायदिबलिनावीर्ययुतागुरु

णा नरस्यास्तदा जातस्य जंतोराश्वेव मरणं भवेत्॥ अथ यदा योगकर्त्तन्ग्रहाः सर्वाने बल
वान् गुरुः पंचमस्थः कांश्चित्पश्यति कांश्चिन्न पश्यति॥ अथवा॥ बलहीनः सर्वानेव पश्य
ति तदा जातस्य मरणं भवेत्॥ किंतु आशु सिघ्रं न भवेत्॥ अथ यदि देव सर्वानेव गुरुः पंचम
गः पश्यति तदा रिष्टयोगाभावः॥ अथारिष्टांतरं पुष्पिताग्रयाह॥ सुत ५ मदन ७ नवां ९
त्य १२ लग्न १ रं ध्रेः ८ अशुभयुतो मरणाय शीतरश्मिः॥ भृगुसुतशशिपुत्रदेवपूज्यैर्यदि व
लिभिर्न युतो वलोकितो वा॥११॥ शीतरश्मिश्चंद्रः सच क्षीणः अशुभयुतः पापग्रहेण संयुतः
सुतमदननवांत्यलग्नरं ध्रस्थः पंचमसप्तमनवमद्वादशोदयाष्टमगतः॥ अथवा सुतम
दननवांत्यलग्नरं ध्रे ष्विति पाठः॥ एषां मन्यतमस्थानस्थः भृगुसुतेन शुक्रेण शशिपु
त्रेण बुधेन देवपूज्येन बृहस्पतिना बलवता वीर्यसंयुक्तेण युतो नाप्यवलोकितः॥ एषां

त्रयाणां मध्ये एकतमेन नापि संयुतो नापि दृष्टस्तदा जातस्य मरणाय भवति ॥ अथारेव
भ्ने गुरुतराशिपुत्रे रेवपूज्यानामन्यतमेनैव बलवता दृष्टो भवति युक्तो भवति तदारिष्ट
योगाभावः ॥ अत्र क्षीणचंद्रग्रहणं नास्ति तत्कथं व्याख्यातं ॥ उच्यते ॥ आगमांतरदृष्टत्वा
त् ॥ तथा च सारावल्यां ॥ निधनास्तव्ययलग्नत्रिकोणगाः क्षीणचंद्रसंयुक्ताः पापा बलि
नः शुभैरदृश्यमाना नागतायुषं कुर्युः ॥ अथानुक्तमरणकाले कालपरिज्ञानं भ्रमरविला
सितयाह ॥ योगे स्थानं गतवति बलिनश्चंद्रे स्वं वा तनुगृहमथवा ॥ पापैर्दृष्टे बलवति म
रणं वर्षस्यांतः किल मुनिगदितं ॥१२॥ यस्मिन्नरिष्टयोगे जातस्य मरणकालावधिर्नोक्त
स्मिन् अरिष्टयोगकर्तारो ग्रहास्तेषां मध्यात् यो बलवान् सो यस्मिन् राशौ जन्मकाले व्य
वस्थितः स्वराशि बलिनः ततस्थाने ॥ तत्र चारक्रमश्चंद्रमसि प्राप्ते जातस्य मरणं वक्त

व्यं॥ अथ वा चंद्रस्यात्मीयस्थानगते जन्मकाले यत्र राशौ चंद्रमाः स्थितस्तमेव रा
शौ पुनरपि चंद्रगते तत्र तस्य मरणं वक्तव्यं॥ तत्तु गृहमथ वा तनुगृहं लग्नं॥ तत्र वा चा
रक्रमागते चंद्रमसि जातस्य मरणं वक्तव्यं॥ वृदे त्वुच्यते॥ वर्षस्यांतः संवत्सराभ्यंतरे॥ ए
तदुक्तं भवति॥ अनुक्तकालारिष्टजातो वर्षं नातिक्रमतीति॥ ननु अत्र मासं चंद्रमसा
सर्वाण्येव स्थानानि गंतव्यानि तत्किमित्युक्तं वर्षं इति॥ उच्यते पापैर्दृष्टे बलवतीति॥ ए
षु निर्दिष्टस्थानेषु मध्यादत्र गतश्चंद्रमा बलवान् भवति॥ पापैश्च दृश्यते तदा जातस्य
मरणं वक्तव्यं॥ न केवलं गतमात्र एव चंद्रे॥ किल मुनिगदितं॥ किलेत्यागमसूचने नि
श्चयेन मुनिगदितं रिष्टलक्षणमित्यागमपारंपर्येण श्रूयत इति॥ अत्रान्यैराचार्यै
ररिष्टभंगा उक्ताः सन्ति च सत्यस्वरूपाः॥ यतो बहवो जाता अरिष्टेष्वपि योगेषु जीवंतो दृ

२

यंते येषु तस्यपि योगे गुजीवस्य तोस्माभिः किंचिल्लिख्यते॥ सर्वाणिमानतिबलः स्फुरदंशुजालो लग्नस्थितः प्रशमयेत्सुरराजमंत्री॥ एको बहूनि दुरितानि सुदुस्तराणि भक्त्या प्रयुक्त इव शूलधरप्रणामः॥१॥ लग्नाधिपोतिबलवानशुभैरदृष्टः केंद्रस्थितैः शुभफलैरवलोक्यमानः॥ मृत्युं विधूय विदधाति सुदीर्घमायुः सार्द्धं गुणैर्बहुभिरर्जितया च लक्ष्म्या॥२॥ लग्नादष्टमनर्थेपि गुरुर्बुधशुक्रदृष्टः प्राणगश्चंद्र॥ मृत्युं प्राप्तमपि सुतं परिरक्षत्येष निर्व्याजं॥ चंद्रः संपूर्णतनुः सौम्यर्क्षगतः स्थितः शुभः स्यात् प्रकोरेति रिष्टग विशेषतः शुक्रदृष्टः॥४॥ बुधभार्गवजीवानामेकतमः केंद्रमागतो बलवान्॥ यद्यपि क्रूरसहायः सद्योरिष्टस्य नाशाय॥५॥ रिपुभवनगतोपि शशी गुरुसितचंद्रात्मजद्रेष्काणस्थः॥ गरुडउरवभोगिदष्टं परिरक्षत्येव निर्व्याजं॥६॥ सौम्यद्वयांतरगतः संपूर्णः स्नि

३०६

५०

ग्धमंडले॥शशभृत॥निःशेषपरिष्टहंता भुजंगलोकस्य गरुड इव॥७॥शशिभृति पू
र्णशरीरे शुक्लपक्षे निशाभवे दिवसे॥रिपुनिधनस्थे रिष्टं भवति नैवात्र जातस्य॥८॥
प्रस्फुरितकिरणजाले स्निग्धामंडले बलोपेते॥सुरमंत्रिणि केंद्रगते सर्वारिष्टं प्रशमय
मुपैति॥९॥सौम्यभवनोपयाता सौम्यांशके संभव द्रेक्काणस्थाः॥गुरुचंद्रकाव्यशशि
जाः सर्वेरिष्टस्य हंतारः॥१०॥चंद्राध्यासितराशेरधिपः केंद्रे शुभवचै पाणि॥प्रशमय
ति रिष्टयोगं पापानि यथ हरस्मरणं॥११॥पापा यदि शुभवर्गे सौम्यैर्दृष्टाः शुभांशव
र्गस्थैः॥निघ्नंति तदा रिष्टं पतिं विरक्ता यथा युवतिः॥१२॥राहुस्त्रिषष्ठलाभे लग्नात्सौ
म्यैर्निरीक्षितः सद्यः॥नाशयति सर्वदुरितं मारुत इव तूलसंघातं॥१३॥शीर्षोदयेषु
राशिषु सर्वगगनाधिवासिनः स्तौ॥प्रहृत्तस्थै स्या रिष्टं विलीयते घृतमिवाग्निस्थं॥१४॥

तत्काले यदि विजयी शुभग्रहः शुभनिरीक्षितो वश्यं ॥ नाशयति सर्वरिष्टं मारुत इव पा
दपान् प्रबलभर्गा ॥१५॥ सर्वैर्गगनभ्रमणैर्दृष्टश्चंद्रो विनाशयेद्रिष्टं ॥ आपुर्यमाणमूर्ति ति
र्यथा नृपः स्वन्नयेद्द्वेषीति ॥१६॥ इति श्रीभट्टोत्पलविरचितायां बृहज्जातकविवृत्तौ रिष्टा
ध्यायः षष्ठः ॥६॥५॥ अथायुर्दायाध्यायो व्याख्यायते ॥ तत्र पूर्वोक्तरिष्टाध्यायोक्तरिष्टव
र्जितस्यायुर्दायः कर्तव्यः ॥ तत्रादावेव मयपवनमस्तिथपराशरमतेन प्रत्येकस्य ग्र
हस्य परमायुःप्रमाणं पुष्पिताग्रयाह ॥ मयपव[illegible]मणित्थशक्तिपूर्वैर्दिवसकरादि
षु वत्सराः प्रदिष्टाः ॥ नव तिथि विषयाश्वि भूतरुद्र दश सहिता दशभिः स्वतुंगभेषु ॥१॥
मयो नाम दानवः ॥ सूर्यलब्धवरप्रसादः ॥ यवनाम्लेच्छजातयो होराविदः ॥ मणित्थ
आचार्यः शक्तिपूर्व पराशरः शक्तिः पूर्वो यस्य स शक्तिपूर्वः पूर्वशब्देन पिता उच्यते ॥

रु०
१०१

जो०

तैर्मयययवनमणित्थशक्तिपूर्वैर्दिवसकराद्यादित्यादि॥ अत्रनवादिभिर्दशसहितारति॥ सर्वत्रैव विज्ञेषभृतो॥ तेन वभिर्दशभिसहिताएकोविंशतिःपरमायुप्रमाण वत्सरादि वसकरस्यादित्यस्य॥ तिथिभिपंचदशभिःसहितादशपंचविंशतिश्चंद्रस्य॥ विषयैपं चभिःसहितादशभिःपंचदशभौमस्य॥ अब्धिभ्योद्वाभ्यांसहितादशद्वादशबुधस्य॥ भू तैःपंचभिःसहितादशपंचदशगुरोः॥ रुद्रैरेकादशभिसहिताएकविंशतिशुक्रस्य॥ दशभिःसहितादशविंशतिःसौरस्य॥ एतानिग्रहाणांपरमायुःप्रमाणवर्षाणि॥ वर्षाणिस्वतुंगभेषुस्वपरमोच्चेराशितेषुभवति॥ तत्रैदशाःपरमोच्चस्थिताआदित्यादयो भवंति॥ एवंविधाह्येतेयथानिर्दिष्टवर्षाणिप्रयछंति॥ अंकेऽरनापि सू२९चं२५मं२८बु१२गु५शु२७श२०एतान्यर्कादीनांपरमायुःप्रमाणवर्षाणि॥

सू	चं	मं	बु	गु	शु	श
०	१	९	५	३	११	६
९	२	२८	१५	५	२६	१९

अथ परमनीचावस्थितानामायुर्ह्रासज्ञानं च मंदाक्रांतयाह॥ नीचतोर्द्धं ह्रसति हितस्था
तुरस्थेनुपातो होरत्वं च प्रतिममपेरे राशितुल्यं वदंति॥ हित्वा वक्रे रिपुगृहगते॥ ही
पते स्वत्रिभागः सूर्योच्छिन्नद्युतिषु च दलं प्रोह्य शुक्रार्कपुत्रौ॥२॥ नीचे तोर्द्ध मिति॥ एवं
दिवसकराद यो यो नीचे परमनीचे प्राप्तो सोर्द्धं परमायुःप्रमाणवर्षेभ्योऽपहंति॥ अ
एवोक्तं नीचतोऽस्मात्सूर्वोक्तो सरमायुषोर्द्धं दलं ह्रसति क्षीयते॥ अथ दशा ख्यादयः॥
परमनीचस्था भवेति॥ परमनीचस्था एतत्व॥ पूर्वोक्तादायुषोर्द्धं दलं ह्रसति प्रयच्छ
तिते॥ तद्यथा॥ रविः नव सार्द्धानि वर्षाणि प्रयच्छति॥ चंद्रो द्वादश सार्द्धानि॥ भौमः सप्त
सार्द्धानि॥ बुधः षट्॥ बृहस्पतिः सप्त सार्द्धानि॥ शुक्रो दश सार्द्धानि॥ शनैश्चरो दश अंकनावि॥

चंद्रा वर्ष ७ मास ६ भौ० वर्ष ९

सू	चं	मं	[illegible]	बु	गु	शु	रा
९	७	३	[illegible]	११	९	५	०
१२	२	२७	[illegible]	११	२४	२६	१९

वर्ष ९ मास ६ सू० वर्ष १२ मास ६
मास ० बुध वर्ष ७ मास ६

बृ०
१११

जी०

गुरुवर्ष१० मास९ शुक्रवर्ष१० मास० शनिः॥ ततश्चोच्च
नीचांतरस्थे मध्यवर्तिनि ग्रहेनुपातस्त्रैराशिकः कर्त्तव्यः॥ तत्र तावत्सर्वस्यैवग्र
हस्य परमोच्चपरमनीचांतराले राशिषट्कं भवति॥ परमनीचपरमोच्चांतरालं तावदेव॥
तत्र राशिषट्कलिप्तापिंडीकृतं दशसहस्राण्यष्टौ च शतानि भवंति॥ तत्रस्थोच्चादधिकेग्र
हेण यदा भुक्तं भवति तदा तत्रस्थोच्चं विशोध्य शेषस्य लिप्तापिंडी कार्या॥ तासां लिप्तानां
ग्रहभुक्तलिप्तागणः इत्याख्या तस्यैव ग्रहस्य परमोनीचोक्तानि वर्षाणि मासाः कार्याणि॥
कथमुच्यते॥ वर्षाणि द्वादशभिः संगुण्य तत्र मासान्योजयेत्॥ तानि चक्रतान्यादित्यादी
नां लिख्यंते॥ तद्यथा॥ चतुर्दशाधिकशतं रवेः॥ सार्द्धशतं चंद्रस्य॥ नवतिर्भौमस्य॥ द्वा
सप्ततिर्बुधस्य॥ नवती जीवस्य॥ षड्विंशत्याधिकशतं शुक्रस्य॥ विंशत्याधिकशतं सौ

रस्य॥ अंकेनापि॥ १५५ सूर्य चंद्र १५० भौमस्य बुधस्य ७२ जीव ९० शुक्र १२९ शनि १२० तत्र।
त्रैराशिकं यदि भगणाद्ई लिप्ताभिः खखाष्टकदिक्संख्याभिः १०८०० इष्टग्रहपरमनीच
मासा लभ्यते॥ तद्ग्रहभुक्तिलिप्ताभिः कियंत इति॥ तत्रेदस्त्र॥ त्रैराशिके प्रमाणं फलनि
छायंत्रयोः सदृशराशी॥ इच्छाफलेन गुणिता प्रमाणभक्ता फलं भवति॥ तदर्थं ग्रहभुक्ति
लिप्ता एवं ग्रहपरमनीचमासैः संगुण्य भगणाद्ई लिप्ताभि विभज्या वासे मासाः॥ मासशे
षं त्रिंशद्गुणिते तेनैवच्छेदेन भागमपहृत्सा वासे दिवसाः॥ दिनशेषं षष्ट्या संगुण्य तेनैव
च्छेदेन भागमपहृत्सावासं घटिकाः॥ घटिकाशेषं षष्ट्या संगुण्ये प्राग्वद्विभज्यावासं चशे
षकाः एवं मासादिश्चषकांतः काल आगताः मासानां द्वादशभिर्भागमपहृत्स वर्षाणि ल
भ्यते॥ शेषं मासाः एवमागते वर्षादि परमोच्चायुरिति तं वर्षेभ्यः संशोध्याव शेषं

ग्रहेण वर्षादिशायुषः कालोदतो भवति॥ एवमुच्चद्विच्युतस्य नीचमलासस्य कर्तव्यं॥
नीचाद्विच्युतस्योच्चमप्राप्तस्य प्राग्वत्कालमानीय तस्य च ग्रहस्य परमनीचाद्दायुषः का
लो वर्षादिर्भवति॥ अथवा यदि राशिषट्कलिसारद्वा पूर्ववर्षाण्यपचीयंते तदाभिर्ग्रहभुक्त
लिसाभिः किमित्यत्र मध्यमराशिं सवर्णिकृत्य तेन ग्रहभुक्तलिसा गुणयेत्॥ ततः परि
वर्त्य भागहारछेदांशौः छेदसंगुणछेदः॥ अंशोंशगुणो भाज्यस्य भागहारः सवर्णितयो
रित्यत्र वर्षाणि मध्यस्वछेदेन द्विकेन मगणाद्वैन लिसाः संगुण्य स्वस्वषड्धिकृएक
विंशति लिसा भवंति २१६०० एताभिर्भागमपहृत्य वर्षाणि लभ्यंते॥ शेषं द्वादशाभिः सवि
कलसंगुण्यावस्थस्य विकलस्य षष्ट्या ६० भागमपहृत्योपरितनुराशौ संयोज्य प्राग्विद्वि
भज्य मासा लभ्यंते॥ एवं शेषं सविकलं त्रिंशता षष्ट्या षष्ट्या संगुण्य दिनघटिकाविघटिकाश्च

नपितव्याशेषंप्राग्वत्कर्म्म॥ अथसुलघुनोपायेन पिंडायुष आनयनं प्रदर्श्यते॥ तद्येष्टग्र
हादस्मात्प्रागुक्तमुच्चध्रुवकं विशोध्यावशेषं कर्मभुमौ स्थापयेत॥ अथोच्चध्रुवकेन शुध्य
ति तदाग्रहे राशिकं दत्वा तस्मादुच्चमपास्यावशेषं स्थापयेत्॥ ततस्तदवशेषं राशिशद्वा
दूनं भवति॥ तदा राशिद्वादशकादपास्य शेषं स्थाप्यं॥ अथ राशिषट्कादधिकं भवेत्तितदा
तदेवग्राह्यं॥ तत्कर्मभूमौ राश्यादिकं विलिप्तांतं स्वपरमायुर्वर्षः संगुण्यं स्वच्छेदैर्विभज्य
लब्धमुपर्युपरियोजयेत॥ अवशेषस्थापयेत्॥ विलिप्तास्थाने षष्ट्या लिप्तास्थाने विष
ष्ट्या भागानां त्रिंशता राशीनां द्वादशभिः राशिभ्यो लब्धं वर्षाणि॥ तदवशेषमासाः॥ भा
गशेषदिवसाः लिप्ताशेषं घटिकाः॥ विलिप्ताशेषं चषकाः इति॥ एतावतैव कर्मणा स्फु
भवेति॥ यथा च सारावल्यां॥ स्वोच्चशुद्धो ग्रहः शोध्यः षड्राश्यूनो भमेऽल्पात्॥ स्वपिंड

वृ०
११३

गुणितोभक्तेआदिमानेनवत्सराः॥होरात्वंन्सेत्रप्रतिममिति॥होरालग्नंसाचांशाप्रतिमानि
वर्षाणिददाति॥यावंतोनवांशाःकालग्नेनभुक्तास्तावत्यववर्षाणिददाति॥तत्करणं॥यथा
तत्कालिकलग्नस्यराशीनपास्यअंशाशेषंलिप्ताःपिंडीकार्यंतत्रशतद्वयेनभागमपहृत्या
वाप्तंभुक्तनवांशास्तावत्येववर्षाणि॥लग्नेआयुर्दायंप्रयच्छति॥अवशेषेणसहत्रैराशिकं
कृत्वावर्षामधस्तात्मासाआनयितव्याः॥तद्यथा॥परिलिप्ताशतद्वयेनद्वादशमासाल
भ्यंतेतदवशेषलिप्ताभिःकियंतइति॥तेनावशेषलिप्ताद्वादशाभिःसंगुण्यशतद्वयेनवि
भज्यावाप्तंमासास्तेचवर्षाणामधःस्थाप्यमासशेषं॥त्रिंशतासंगुण्यप्राग्वद्विभज्यावाप्तं
चदिवसाःतान्मासानामधःस्थापयेत्॥दिनशेषंषष्ट्यासंगुण्यप्राग्वद्विभज्यावाप्तंचष
कायघटिकानामधःस्थाप्याः॥एवंलग्नायुर्दायः॥अपरेराशितुल्यंवदंति॥अपरेन्येमणि

स्यादयः ॥ आचार्या लग्नस्य राशितुल्यमायुर्दायमिच्छंति ॥ लग्ने यावंतो राशयो भुक्तास्ता
वंत एव वर्षाणि लग्नायुः ॥ लग्नस्य भुक्तभागादिकं लिप्तापिंडीकृत्य मासाद्यानयनेनैराशि
कं कर्तव्यं ॥ यद्यष्टादशभिर्लिप्ताशतैर्द्वादश मासा लभ्यंते ॥ तदैताभिर्लग्नभुक्तलिप्ताभिः
कियंत इति ॥ प्राग्वद्वर्षाणामचत्वान्मासाद्यो नानुपाततः ॥ कृत्वा यतं स्ववेत्कालवर्षादि
र्लग्नजीवितं ॥ तदेवमतं शोभनं नमित्यस्माकमभिमतं ॥ अन्ये प्येवमिच्छंति ॥ यथा ल
ग्नो राशकप्रात्सा बलवति अनुग्राम्नति मं राश्यधिपे बलवति राशितुल्यं वदंतीत्यर्थः ॥ तथा
च सारावल्यां ॥ लग्नाद्दायोंऽशतुल्यं स्यादंतरे चानुपाततः ॥ नसतो बलसंयुक्तो राशितुल्यं
च भाधिपे ॥ हित्वा वक्रमिति ॥ येन ग्रहेण या वर्षसंख्या आयुर्दायोदतस्तत्तस्य संभवति ॥
तस्मात्स्वादायुषः ॥ भौमादिकस्य वक्रे विपरीतां तां गतिं हित्वा वर्ज्जयित्वा यो ग्रहोत्रिपुगृह

गतः शत्रुक्षेत्रावस्थितो भवतीति तेन स्वादायुषस्त्रिभागो हीयते॥ स ग्रहस्त्रिभागमपहरतीत्य
र्थः॥ वक्रितः पुनः शत्रुक्षेत्रगतो नापहरति॥ तथा च॥ वक्रचारं विनान्ये ग्रहाः शत्रुराशौ हरेद्ग्र
हः॥ एतद्वृद्धानां मतं॥ आचार्यस्य पुनरेष एव पक्षोऽपि प्रेतः॥ अन्यथा हित्वा भौममपि पुनर्हते
ह्रियते स्वत्रिभागइत्येवावक्ष्यत्॥ अत एव ज्ञायते॥ यथा वक्रगो ग्रहो ह्यायुर्दायबलवत्वात्त्रि
गुणं ददाति॥ तथात्रापि नापहरतीति निश्चयः॥ अन्ये पुनरेवं व्याचक्षते॥ यथा वक्रमंगार
कं हित्वा यो ग्रहरिपुराशिगतस्तेन स्वादायुषस्त्रिभागो हीयते॥ भौमः शत्रुक्षेत्रगतो नाप
हरति॥ हित्वा वक्रमित्यत्र केचिदिच्छंति यथा वक्रितं ग्रहं हित्वाऽन्यस्य शत्रुग्रहगतः स्वभा
गमपहरति॥ तदसत्॥ अत्र च बादरायणः भूम्याः पुत्रं वर्ज्जयित्वारिभस्थानस्थः स्वस्मा
दायुषस्तत्त्रिभागामिति॥ सूर्योच्छिन्नद्युतिश्चेति॥ सूर्येण रविणा छिन्ना कृता द्युतिर्ये

228

षां ते सूर्योच्छिन्नधुतयः॥ आदित्यमंडलेऽस्तमितेषु ग्रहेषु दलमर्द्धं ह्रीयते किंतु॥ शुक्रार्कपु
त्रौ सितनुर्नैश्वरौ प्रोह्य वर्ज्जयित्वा तवस्तंगतावपि नाहरतः॥ तथा च बादरायणः॥ अस्तं
याताः सर्वएवार्द्धहानिं कुर्युर्हित्वा दैत्यपूज्यार्कपुत्रौ॥ अथ स्वारायुषो ग्रहाणां चक्रपातेनाप
हानिं ग्रहर्षिण्याह॥ सर्वार्द्धं त्रिचरणपंचषष्ठभागाः क्षीयते व्ययभवनादसत्सु वामं॥ स
त्स्वर्द्धं ह्रसति तथैकराशिगा वामे कोऽरिं हरति बली तथाह सत्यः॥ ३॥ असत्सु पापग्रहेषु व्यय
भवनादारभ्य द्वादशस्थानात्प्रभृति सप्तमांतं यावद्व्यवस्थितेषु वाममुतक्रमेण यथाक्रमं
सर्वार्द्धयोः भागाः क्षीयंते॥ तत्र लग्नाद्द्वादशस्थः पापग्रहः सर्वमायुराक्षीयमेवापहरति एका
दशस्थोऽर्द्धं॥ दशमस्थस्त्रिभागं॥ नवमस्थश्चतुर्भागं॥ अष्टमस्थः पंचमभागं॥ सप्तम
स्थः षष्ठमागमिति॥ सत्स्वर्द्धमिति॥ एतेष्वेव व्ययादिषु स्थानेषु सत्सु शुभग्रहेषु व्यवस्थिते

प्यशुभग्रहोन्कस्यार्द्धं क्षीयंते॥ तत्र लग्नाद्द्वादशस्थः शुभग्रहः स्यादायुषोऽर्द्धमपहरति॥ एका
दशस्थश्चतुर्भागं॥ दशमस्थः षष्ठभागं॥ नवमस्थोऽष्टमभागं॥ अष्टमस्थो दशमभागं॥ सप्तम
स्थो द्वादशमभागमिति॥ तथैकर्क्षसंस्थितानामिति॥ उक्तस्थानेषु यदा ग्रहद्वयं भवति बहवो
वास्युस्तदा तेषामेकसंस्थितानां मध्यादेक एव यो बली वीर्यवान् स एवैकांशं भागं यथापठितं
मपहरति॥ नान्ये तत्रस्था अस्यापहरंति॥ एतत्सत्य आह सत्याचार्यो कथयति॥ अंशग्रहणं
यथासंभवभग्नप्रदर्शनार्थं॥ तथा च सत्यः॥ एकादशोत्क्रमक्रमात्सप्तमादिग्रहहरणकर्मा
णि एकर्क्षगेषु वीर्याधिकः स्वभागं हरेदेकं॥ अर्द्धं तृतीयमथ न्यतुःपंचषष्ठं च॥ आयुःपिंडं
सापाहरंति॥ सौम्यास्ततो वस्वेर् इति॥ वराहमिहिरस्याप्येवं मतं॥ इह स्वसमतोपन्यासआ
गमांतस्मृतिप्रदर्शनार्थः॥ लग्नस्थः पापचक्रपातव ज्ञादायुषोंऽशमपहरति॥ तस्यांशात्र

माणसानेवसंततिलकेनाह॥ सार्द्धोदितोदितनवांशाहतात्समस्तात्भागोऽष्टयुक्तशतसंख्यमुपै
ति नाशं॥ क्रूरे विलग्नसहिते विधिनात्वनेनसौम्येक्षितेदलमतः प्रलयं प्रयाति॥४॥ उदिताए
तेनवांशाः उदितनवांशाः॥ सार्द्धोदितेननवांशेनवर्ततेइति सार्द्धोदितनवांशाः तात्कालिक
स्य स्फुटलग्नस्य ये भुक्ता भोगाः तान् लिप्ता पिंडीकृत्य शतद्वयेनभाभागमपहृत्या वासंता
स्मिन् काले भचक्रस्य वा यावंतो नवांशकाः उदिताः॥ पश्चार्द्धोदितो नवांशकः स तत्र उदि
तनवांशाः सुहेयोज्याः॥ एवं कृते सार्द्धोदितोदितनवांशोसमूहो भवंति॥ तेन गणिताग
तं समस्तमेवायुः पिंडं गुणनीयं॥ एवं हृते सार्द्धोदितनवांशाहतं समस्तमायुःपिंडं भव
ति॥ तस्मादष्टाधिकशतेन भागेहृते यदवाप्यते वर्षादि तत्राशमुपैति॥ क्षयं गच्छति॥
किं सर्वदा नेत्याह॥ क्रूरे विलग्नसहितइति॥ यदा विलग्नस्थः क्रूर आदित्यांगारकशनै

२८

राणामन्यतमो भवति॥ तदैव मागते॥ वर्षादिसमस्तायुःपिंडात्संज्ञो ध्येयं॥ एवं कृते तत्का
लजातस्य जंतोरायुर्वर्षादिस्फुटं भवति॥ किंतु प्रत्येवस्याग्रहस्यैतत्कर्म कर्त्तव्यं॥ यते
येनायुःसंस्फुटाग्नितद्दशा वर्षाणि सर्वेषां भवंति विधिनानेनैनसौम्यक्षितः....ति॥ अनेन
विधिना स एव लग्नस्थः क्रूरग्रहो यदा सौम्येक्षितः शुभग्रहेण दृश्यते तदा विधिना वि
धिनानेन यत्फलमायुःपिंडात्सार्द्धोदितो दितनवांशहतादष्टोत्तरशतेन भागे लब्धं
ल यत्तोदलमर्द्धं प्रैयं प्रयाति॥ तदहृतःसायुःपिंडात्सातयेदेवं कृते आयुःप्रमाणं स्फुटं भ
वति॥ अन्येरेवं व्याख्यते॥ तात्कालिकेन लग्नेन भुक्ता नवांशकास्ते सार्द्धोदिताग्रहाः
अयमर्थः॥ तात्कालिकस्य राशीन पास्य भागांलिप्ता पिंडीकृत्य तस्य चरातदृयेन भाग
मपहृत्य लब्धास्समुदितांशकास्ते चार्द्धोदितेन सह कार्यास्तै कर्म प्राग्वत्कार्यं॥ एतदपि

स्फुटं कृतेन लग्नभागो लिप्ता पिंडीकृताभिः प्रत्येकग्रहदत्तवर्षादिरायुर्दायं संगुणय्याथः
स्वस्वदैर्भागमपहृत्सोपर्युपरि योजयेत्॥ वर्षस्थाने भगणकलाभिर्भागमपहृतं तरल
ब्धं वर्षादि॥ तस्य प्राग्वत्तातनं कार्यं॥ तथाच सारावल्यां॥ लग्नां[illegible]लिप्तिकाहता प्रत्येकं
विहितायुषा॥ भाज्यं मंडललिप्ताभिर्लब्धं वर्षादि शोधयेत्॥ स्वायुषो लग्ने क्रूरे सौम्य
दृष्टे च तद्दलमिति॥ एतदेव शोभनमस्माकं प्रतिभाति॥ न केवलमत्रयावच्च क्रूपाते
ष्येवं विधिः॥ लग्नादिष्टग्रहं विशोध्यानशेषं यदि षड्भागादूनं तदा तस्य ग्रहस्य चक्रपा
तोस्थितान्यथेति॥ तेनावशेषणायुःपिंडस्य भागमपहृत्य लब्धं प्राग्वदायुषः पातये
त्॥ अथ रूपादूनो भागहारो भवति॥ तदा रूपाद्भागहारं संशोध्य शेषेणायुर्दायं संगुण्य
रूपेण भागमाहरेत्स लब्धमेवायुः शुद्धं भवति॥ उक्तं च॥ लग्नेग्रहोंतकं षड्भागादूनकंय

घसौहरः॥आयुःपिंडंभजेत्तेनलब्धंवर्षादिकंबुधोध्ययेत्॥रूपाद्यहीनोहारःस्याद्रूपाद्युद्धेनताड
यत्॥रूपेणविभजेल्लब्धंतदेवायुःस्फुटंभवेत्॥अस्मिन्साद्ध्रीदितेतिक्रमणिलग्नेयदासौ
म्यपापोभवतस्तदायोलग्नोदितोंशकसमापवतीसएवग्राह्योनेतातरइति॥तत्रक्रूरशदे
नक्षीनश्चेद्दमानग्राह्यः॥तथाचबादरायणः॥सूर्यागारकुशनीनामेकस्मिन्लग्नेगेभवति
त हानिः॥विधिनानेनसौम्येक्षितेदलपोयेलब्धं॥अथपुरुषादीनांरमायुःप्रमाणज्ञानेशि
खरिण्याह॥समाषष्टिर्द्विघ्नीमनुजकरिणांपंचचनिशाहयानांद्वात्रिंशत्खरकरभयोःपं
चकत्तति॥विरूपासैवायुर्वृषमहिषतयोद्वादशशुनःस्मृतंछागादीनांदशकसहिताः
षडूपरमं॥५॥समाषष्टिर्द्विघ्नाभइति॥समशब्देनवर्षमुच्यतेसमानांवर्षाणांषष्टिर्द्वि
घ्नीद्विगुणीकृताविंशत्यधिकंवर्षशतंपंचनिशाःपंचरात्रयोहोरात्राणीत्यर्थः॥मनुजानां

मनुष्याणां करिणां हस्तिनां च परमायुः॥ हयानामश्वानां द्वात्रिंशद्वर्षाणि परमायुः॥ खरोग
र्द्दभः करभ उष्ट्रः अनयोः पंचकृतिः पंचकस्य कृतिः पंचानां वर्गः पंचविंशतिः परमा
युः॥ विरूपा सैवायुरिति॥ सा पंचकृतिर्विरूपातकेनोना च तुर्विंशतिवर्षाणि॥ वृषमहि
षयोः वृक्षाणां महिषाणां च परमायुर्गोमाहिषयोरित्यर्थः॥ शुनां सारमेयानां द्वादशवर्षाणि॥
श्वग्रहणं सर्वेषां नखीनामुपलक्षणार्थं तेन सिंहमार्जारादीनामप्येतदेव॥ बस्तं छागा
दीनामिति॥ षड्दशकसहिताः षोडशवर्षाणि॥ छागादीनां परमायुः॥ आदिग्रहणाद
विमृगयोरपि परमायुरिति सर्वेषां शेषद्भूतं॥ परमायुर्द्यायप्रयोजनं॥ आश्वादीनां ज्ञा
तानामायुःप्रमाणज्ञानार्थमिति॥ तद्यथा॥ आश्वादेर्जातस्य पुरुषवदायुःप्रमाणमानी
यते ततस्त्रैराशिकं कर्त्तव्यं॥ यदि विंशत्यधिकवर्षशते पंचदिनाधिके यस्य पुरुषस्य

युः प्रमाणं तस्येदमादमादमायुस्तद्द्वात्रिंशद्वर्षायुः प्रमाणस्याश्वस्य किं स्यादिति॥ एवमा
गतमायुःप्रमाणमश्वस्य तत्कालजातस्य वाच्यं॥ एवं सर्वेषामभिहितप्राणिनां स्वायु
षामरेणत्रैराशिकं कृत्वा तत्कालजातस्य स्वायुषः प्रमाणनिर्देशः कार्यः॥ अन्ये एवं वदं
ति॥ यथापठिते परमायुषः प्रमाणं न कश्चिज्जीवति॥ तदयुक्तं यस्माद्विंशत्यधिकाब
र्वशतादभ्यधिकमप्यायुर्गणितकर्मणा भवति॥ तस्मात्परमायुषः प्रमाणपठनं त्रै
राशिकार्थमेव ज्ञातव्यमिति॥ अथ यस्मिन्योगे जातस्य परमायुर्भवति तद्योगज्ञाने
पुष्पिताग्रयाह॥ अनिमिषपरमांशुके विलग्ने शशितनये गविपंचवर्गलिप्से॥ भवति
परमायुषः प्रमाणं यदि सकला सहिताः स्वतुंगभेषु॥१॥ अनिमिषो मीनः तस्य परमां
शकोनवांशकः स चांत्यः तस्मिन्ननिमिषपरमांशके विलग्ने शशितनये बुधे गवि

वृषे च वर्गलिप्ते स्थिते लिप्ताः पंचविंशति भुक्तो बुधो वृषे स्थितः सकलाः समस्ता ग्रहा अ
न्ये सर्व एव यदि स्वतुंगभेषु स्थिताः परमोच्चगता भवंति॥ तथा जातस्य परमायुः प्रमा
णं विंशत्याधिकं॥ सर्वशतं पंच दिनाधिकमायुर्भवति॥ अत्र च कर्म॥ तद्यथा आदित्यार
यो ग्रहाः सलग्ना ईदृशाः॥ अत्रादित्यानां बुधवर्जितानां यथापठितानि परमायुः प्रमाण
वर्षाणि भवंति॥ बुधस्य पुनः कियंतो तत्र तावद् नो नीचाद् राशीयान्मी द्विस्युतः॥ तस्मात्ता ला

सू	च	मं	बु	गु	शु	श	ल	
१	२	२१	५	२	११	६	१२	

लिकात बुधात॥१०।२५। परम नीच कळ्ळवकमिदं॥११५५००संशोध्यं जातं १५५। २५१० नो क्षिसा विंशीहृते २७।२५।१० ताभि
स्त्रैराशिकं यदि भगणाद्धे लिप्तानो एतां संगुण्य॥१८८००बुधपरम नीच वर्षाणि षट् भवंति॥ त
दाता सो २७।२५॥ नीचाक्रांत लिप्तानां किंस्यादिति॥ अत्र प्राग्वत्फलं वर्षादि॥७।६।२० तद्बुध
परम नीचगतेष्वेतेषु ६ ■ दला जातं ७।६५।० तद्बुध सकलमायुः तत्र लग्नादेकार शास्था

नत्वाद्भौमस्यपरमायुःप्रमाणात्वर्षपंचदशाद्दर्द्धंसार्द्धाणिसप्तवर्षाणियातपित्वाजातं
वर्ष ७ मास ६ सप्तसार्द्धानिवर्षाणि सौराष्ट्रस्याष्टमस्थानत्वात्परमायुःप्रमाणाद्वर्षविं
शतेःपंचभागंचत्वारिवर्षाणिपातयित्वाजातानिषोडश १६ वर्षाणि आदित्यचंद्रबृ
हस्पतिशुक्राणांपरमायुः॥ लग्नस्यनवमनवांशकस्थत्वान्नवर्षाणि सर्वेषांस्थापना॥ सू
र्यवर्ष १९ चंद्रवर्ष २५ भौमवर्ष ७ मास ६ बुधवर्ष ७ मास ६ दिन ५ जीववर्ष २९ शुक्रवर्ष २१
शनिवर्ष १९ लग्नवर्ष ९ सर्वेषांयोगः वर्षः १२० मासदिन ५ एवंदर्शितयोगेपरमायुःप्र
माणमागतमिति॥ अत्रचादित्येमेषस्थेकंन्यास्थात्वंबुधस्यसंभवति॥ तेनषड्भिर्ग्रहै
रुच्चस्थैर्बुधेचवृषस्थेयोगोयंप्रदर्शितः॥ अत्रपरमोच्चगतेसूर्येबुधस्यवृषाद्भागचतु
र्मध्येभुक्त्वास्थितिर्भवति॥ नास्मादधिकं॥ यतोमध्यमोर्कोदयेराशिस्थानेशुण्यभवति॥

भागाः षट्पंचाशल्लिप्ता भवंति॥ तदा तस्य स्फुटस्य परमोच्चतां वदति ए व ए व सूर्याबुधमध्य भ
मः॥ अत्र यदा परममंदफलपरमं शीघ्रफलं धनगतं भवति॥ तदा वृषभागचतुष्टयं भत्ता
स्थितिर्भवति॥ तत्र यथा दर्शितलग्ने यथावस्थितग्रहं संस्थायी वृषचतुर्थे भागे ईदृशो बु
धो भवति॥ १॥ अस्मान्निचयकवर्गे मिसं शोध्य जाते ९ ए ते लिप्ता पिंडीकृतं ११८०ए ताभिर्लब्धे
राशिकं यदि भगणार्द्ध लिप्तानामेतासां १०८०० षड्वर्षाणि तदैताभिः सा का २९८० नी ति
लब्धं वर्ष १ मास ७ दिन १८ ए तदा येषु यथा दर्शितवर्षेषु संयोज्य जाते वर्षाणां शतं १२०
मास १ दिन २२ ए तद्दर्शितपरमायुः प्रमाणादधिकमप्यायुः संभवति॥ तस्मात्परमायुः
प्रमानपठनं त्रैराशिकार्थमेव व्याख्यातं॥ अन्ये पुनः अनिमिषपरमांशुके विलग्ने
योग ए वा यं व्याचक्षते॥ यथा मिनेवर्गोत्तमगते लग्ने वृषभस्थेन बुधेन पंचविंश

तिलिप्ता भुक्ता भवत्यन्येन च ग्रहाः स्वोच्चराशिषु परमोच्चभागव्यतिरेकेणापि यदि स्थि-
तास्तदा योगशास्त्रैव परमायुःप्रमाणं जातो जीवति॥ अथ बुधस्य परमनीचगतस्य
ध्रुवकमिदं [illegible] पूर्वं प्रदर्शितं सांप्रतं कर्मकाले कमिदं [illegible] प्रदर्शितमित्यत्रोच्यते॥ च-
तुर्दशभागान् भुक्त्वा पंचदशपदिते परमनीचभागे व्यवस्थितो भवति॥ अतश्चतु-
र्दशभागाः परमनिचस्थस्य प्रदर्शिताः अत्रस्थस्य परमनीचप्रदर्शितमायुर्भवति॥
तस्माद्यावत्पंचदशो भागो न भुक्तो बुधेन तावत्त्रैराशिकोऽसति न कर्तव्ये ततः कर्म-
काले पंचदशभागाः प्रदर्शिताः इत्यतः सर्वेषामेव ग्रहाणां त्रैराशिककाले पदितै भा-
गैर्भुक्तैः प्रदर्शयतिव्यानि॥ तत्र त्रैराशिकार्थमुच्चध्रुवकाः तथा त्रैराशिकार्थं परम-
निचध्रुवकाः एतैः कर्म कर्तव्यमिति॥ अथास्य परमतायुर्दायस्य दूषणार्थं शालिन्याह॥

आयुर्दायं विष्णुगुप्तोऽपि चैवं देवस्वामी सिद्धसेनश्च चक्रे॥ दोषश्चैषां जायतेऽष्टावरिष्टं हित्वा
नायुर्विज्ञेतेः स्यादधस्तात्॥७॥ एतदायुर्दायं न केवलं मयय वनमणित्थप्राप्तिपूर्वैरुक्तं
यावद्विष्णुगुप्तेनापि चाणक्यापरनाम्नैवमुक्तं॥ आचार्यदेवस्वामी तथा सिद्धसेनश्चैवं
चक्रे कृतवानित्यर्थः॥ तथा च विष्णुगुप्तः॥ परमोच्चगतैः सर्वैः मने मीनांशासंस्थिते
लग्ने॥ सौम्ये वृषगे जातः परमायुर्लभति च मनुष्यः॥ तथा च देवस्वामी॥ सूर्याद्यैरु
च्चगतैर्मने मीनांशासंस्थिते लग्ने॥ सौम्ये वृषभं याते जातः परमायुराप्नोति॥ तथा च
सिद्धसेनः॥ मीने परमांशगते सौम्ये गविपेचवर्गलितास्थे॥ सर्वैः परमोच्चैतैर्जातः
परमोच्चैतैर्जातः परमायुराप्नोति॥ यद्येवं बहुभिराचार्यैरुक्तं तत्कोऽस्य दोषः अत्रोच्य
ते॥ वक्ष्यमाणसत्याचार्यमतमायुर्दायं बहुतराणां मतमिति॥ यस्मादाचार्यवराह

मिहरस्यप्रतिज्ञेयं॥ ज्योतिषभागमशास्त्रं विप्रतिपत्तौनयोग्यमस्मात्कास्वयमेवविक-
ल्पयितुंकिंतुबहूनांमतंवक्ष्ये॥ अस्यपरमतस्यबहुतरवाच्यत्वंतावदास्तां॥ यावदसंभ-
वोदोषोस्ति॥ दोषश्चैषामित्यादि॥ एषामाचार्याणांमतेदोषोजायतेकीदृशः॥ आह॥ अरि-
वरिष्टमित्यादि॥ वर्षाष्टकंयावज्जातानामरिष्टमुक्तंतंवर्षाष्टकंहित्वात्यक्त्वा॥ वर्ष-
विंशतेरधस्ताद्दर्शितप्रकारेणायुस्तस्यनागच्छति॥ एवंवर्षाष्टकादूर्ध्वंरिष्टंनास्तित-
स्माद्वर्षाष्टकादूर्ध्वंवर्षविंशतेरन्तःकस्यचिन्मरणमापद्यते॥ यावदसंभवंतेम्रियंतइ-
तिअयंतेषांप्रत्यक्षोदोषः॥ अधुनातेषामेवाचार्याणामायुर्दूषणंशालिन्याह॥ यस्मिन्यो-
गेपूर्णमायुःप्रदिष्टंतस्मिन्प्रोक्तंचक्रवर्तित्वमन्यैः॥ प्रत्यक्षोयंतेषुदोषोपरेपिजीवंत्या-
युःपूर्णमर्थैर्विनापि॥ ५॥ अनिमिषपरमांशकेविलग्नइत्यस्मिन्योगेविंशत्यधिकंवर्षश-

°तं पंचदिने परमायुःपूर्णं प्रदिष्टं तस्मिन्योगे षड्ग्रहाः परमोच्चगता भवंति॥ षड्भिश्च
परमोच्चगतैश्चक्रवर्त्ती प्रोक्तमभिहितमन्यैराचार्यैः॥ तथा च बादरायणः॥ षड्भिःस्या
च्चक्रवर्त्ती त्रिभुवनमखिलं शास्ति सर्वैर्ग्रहैर्द्वैशिति॥ यवनेश्वरश्च॥ षड्राजराजर्द्धिव
लोमकर्षप्रदाननामेष्वभिजातशांतिं॥ तत्र परमोच्चगता यावत्षड्ग्रहा भवंति॥ ताव
त्परमोच्चायुर्न प्राप्नोति॥ यदा परमोच्चगता भवंति॥ तदा जाते न चक्रवर्तिना भवितव्यं॥
एवं पूर्णमायुर्विंशत्यधिकं वर्षशतमर्थैर्द्वैर्न विनावर्जिता बहवः पुरुषा भवंति॥ तस्मा
दयमपि तेष्वपरो दोषः॥ एतच्च परमतायुर्दूषणं शालिनीद्वयमसंबंधत्वाद्वराहमि
हिरकृतमेव न भवतीति न प्रतिभाति॥ तत्र तावद्यदत्र प्रथमश्शालिन्या दूषणमुक्तं त
स्य दूषणस्यासंबंधत्वमुच्यते॥ सार्द्धादितो दितनवांशाहतात्समस्तादिति न्यायेनेय

तत्क्रूरे विलग्नगते आयुषः पतनं क्रियते तस्य प्रति लग्ने प्रसंज्ञा कवशादियेत न्न संभवतीति॥ तच्चैषा तईत्वा यदायुर्विशिष्यते तस्य पि यच्छ न्नास्तीति॥ तस्माद्यदुक्तं॥ नायुर्विशातेः स्यादधस्तान्नदयुक्तं॥ अत्रोदाहरणं॥ यदा कुंभलग्नस्याद्यंशक उदय आदित्यचंद्रशुक्राः परमोच्चे बुधजीवशनैश्चराः परमनीचे भौमश्च कुंभस्याष्टाविंशतिमं भागं क्रा स्थितस्तदा तत्कालिका ग्रहाः सलग्नाः अत्र लग्नेन न किंचिदुक्तमिति॥ लग्नयुर्दायो नास्ति॥ परमोच्चगतानां परमनीचगतानां च ज्ञायत एव भौमस्य क्रियुते॥ तात्कालिकाद्भौमादस्मात्॥१०।२८।०।० भौमस्य परमोच्चध्रुवकमिदं॥९।२८।०० संशोध्य जातं १।०।० एतल्लिप्सा पिंडीकृतं १८०० अथ त्रैराशिकं यदि भगणार्द्ध लिप्सानामेतासां १०८०० भौमनीचमास नवति भवंति ९० तदैतासां कियंतमिति लब्धा मासाः १५ एतैव वर्षसं

त्रिमासं जातवर्ष १ मास २ ए तत् भौमपरमोच्चवर्षेषु तेषु १५ संशोध्य जातं वर्ष १३ मास १ ए तन्माप्तमायुर्दायः॥ अथ जीवस्य लग्नात् द्वादशस्थत्वात् जातं जीवायुर्दायः॥ च वर्ष ३ मास ९ परमोच्चगतानां परमनीचगतानां च शत्रुगतत्वात्॥ अंशे अस्तंगताना मर्द्धं च निपात्यये॥ यस्मादनिमिषपरमांशके विलग्ने इत्यत्र योगे चंद्रमसो व्ययस्थत्वात् तस्यायुषः त्रिभागः पात्यते ते त स्य पूर्णमायुर्न भवंतीति॥ यस्मात् सत्याचार्यमता एव॥ तात्का लिकमैत्री मैत्रविधावुक्तं॥ मूलत्रिकोणाद्धन धर्म्म बंधु पुत्र व्यय स्थानगता ग्रहे शाः ता त्कालिकाः स्युः सुहृदो ग्रहस्य स्वोच्चे च यो यस्य विहृष्टवीर्यः॥ जामित्र षष्ठाष्टम शत्रुमृ ती मूलत्रिकोणे क गृहे विविष्टाः॥ तत्कालमेते रिपवो भवंति मौलानि मित्राणि रिपुंश्च

सू	चं	मं	बु	गु	शु	श	ल
०	१	१०	११	१	११	०	१०
१	२	२९	२९	४	२६	११	६
७	०	०	०	०	०	०	०

वक्ष्ये॥ अनेनापि शुक्रश्चंद्रमसस्तात्कालिकं मित्रं भवति॥ तस्मान्मीनस्थे शुक्रे वृषस्थश्चंद्र
माः शत्रुगृहे गो भवति॥ तस्य च शत्रुक्षेत्रस्थत्वाद्यत्वायुषस्त्र्यंशः पात्यते तदा निमिषप
रमांशाः कस्यचित्तत्र योगे पूर्णमायुर्न प्राप्नोतीति॥ यच्चाचार्येण शृंगग्राहिकयैव प्रदर्शितं॥
तेनोरुतज्ज्ञापयति परमोच्चगतानां परमनीचगतानां चं शत्रुक्षेत्रस्थे यत्र्यंशमंशस्तंगवानां
चार्द्धं च न निपात्यते॥ तेन यथादर्शितयोगे पृथक्पृथक्ग्रहायुर्दायवर्षाणि लिख्यंते॥
वर्ष १९ सू। चंद्र वर्ष २५ भौम वर्ष १२ मास ९ बुधे वर्ष ६ जीववर्ष ३ मास ९ शुक्रे वर्ष २१
शनि वर्ष १० लग्नेन न किंचिदुक्तमिति॥ लग्नायुर्द्दायो नास्ति॥ अथैतेषां योगः वर्ष ९८
मास ९ अथ अंगारकस्य लग्नगतत्वात्सार्द्धो दितेति कर्म क्रियते॥ तत्र च लग्ने कं भारं
मत्वा तन्नवतिर्नवांशाः कामभुक्ता भवंति॥ ते च नवांशाः कालग्नस्योदिता उदयगतराकेन

वति: ९१॥ तेनैकवस्यासर्वायुःपिंडमिदं॥ वर्ष १८ मास ६ संगुण्या जातं ८९६३ अस्याष्टाधि
कशतेन भागमपहृत्यावाप्तं वर्षाणि ८३ शेषमर्द्धाधिकं गृहीत्वा परित्यक्तं॥ एतानि १२८
संशोध्य जातं वर्ष १५ मास ८ एवमष्टाभ्युर्ध्वं विंशतेरधस्ताद्दायुरुत्पन्नं तस्मादयुक्तमुक्तं॥
नायुर्विंशतेः स्यादधस्तात्॥ अत्रान्ये वदंति॥ यथा क्रूरहीने मीनलग्नेहृद्रिकत्वे तद्दशाहमि
तिरेणाभिहं॥ अभिमिषपरमोंशुकइति॥ अनेनापि प्रकारेण न वक्तव्यं॥ यथा नायुर्विंशतेः
स्यादधस्मात्॥ तत्र धन्विलग्ने क्षीणे चंद्रे विंशतितमे भागे बुधस्तुले लग्नमितः सर्वेष्वन्ये
षु परमनीचस्थेषु यस्य जन्म भवति॥ तस्य चक्रमाते नायुर्दायो बहुपततीति॥ तस्यैवता
वत्प्रदर्श्यते॥ तत्र तात्कालिका ग्रहाः सलग्ना जस्यैवतावत्प्रदर्श्यते॥ तत्र बुधस्य प्राग्वल्ल
ब्धा जातं वर्ष १० मास १० अन्येषां परमनीचत्वात्॥ एतदेव

सू	चं	मं	बु	गु	शु	श	ल
६ ९	५ ८	३ २३	६ २०	८ ४	५ २६	० ११	८ ०

चक्रमा

तेनसर्वैतरायुर्दानास्तिलग्नेनकिंचिद्धृतमिति॥ तस्यायुर्दायोनास्ति॥ चंद्रस्यक्षीणस्यपापत्या
लग्नाद्द्वादशस्थत्वाच्चक्रपातेनसर्वंपततितदास्यायुर्दायोनास्ति॥ आदित्यस्यलग्नेकादशत्वा
च्चक्रपातेनार्द्धपातयित्वाजातंवर्ष ४ मास ९ बुधस्यास्तमितत्वादर्द्धंपातयित्वाजातंवर्ष ५
मास ५ दशमस्थत्वाच्छुक्रःस्यादायुषस्तृतीयमंशमपहरति॥ सौम्यत्वात्तदर्द्धमस्कीतष
ड्भागाद्द्वर्षमेकंनवमासाश्चीतरत्वाजाताम्यष्टौवर्षाणिनवमासाश्च शुक्रस्यवर्ष ८ मास ९
भौमस्यलग्नाष्टमस्थत्वात्संचमभागंसार्द्धंवर्षंपातरत्वाजातानिवर्षाणिषट् इति॥ एवंस
र्वेषांवर्षाणिवर्ष ४ मास ९ सूर्यवर्ष ० मास ० चंद्रवर्ष ६ मास ० भौमवर्ष ५ मास ५ बुधवर्ष ७
मास ६ जीववर्ष ८ मास ९ शुक्रवर्ष १० मास ० शनिवर्ष ० लग्नसर्वेषांयोगः वर्ष ४२ मास ५
अत्रासंभवेप्यभिगम्यापिक्रमः एवंविधआयुर्दायोसर्वप्यस्तंगतायदिभवंति॥ तदास्य

र्यो छिन्नयुतिषु चरलंभोऽप्यशुक्रार्कपुत्रावितित्वा तथापि पंचविंशतिवर्षाणि मासोनानि॥
यतो बुधस्य पूर्वमेवाद्धपातितं॥ एवं द्वाचत्वारिंशतोऽधस्तादायुर्वा गच्छतीति॥ तत्रापि विंश
तेरधस्तादित्यसंबद्धं॥ अत्रान्ये एवं वदंति॥ क्रूरहीने विलग्ने नातोऽष्टाभ्युदर्ध्वं विंशतेरध
स्तान्म्रियमाना दृश्यते॥ तेनान्याचार्यमतसंबद्धं॥ अत्रोच्यते॥ अन्याचार्यमते पूर्वाचार्यण
विचार्यैतद्वदंति॥ यैरेवाचार्यैरनेन मार्गेणायुर्दायः प्रदर्शितस्तैरेव मृत्युयोगो प्रदर्शितः
स च इह लिख्यते॥ तथा च बादरायणे॥ षष्ठाष्टमस्थो रिपुदृष्टमूर्तिः पापग्रहः पापग्रहैर्य
दि स्यात्॥ स्वां तद्दशायां मरणाय जंतोर्ज्ञेयः स युद्धे विजितो यदान्यैः॥ तथा च परमेश्वरः॥
षष्ठाष्टमस्थो शुभदस्तु रौद्रो पापायाशुभस्थानगते नदृष्टं॥ स्वां तद्दशायां प्रकारोति मृत्युं व्या
धध्वबंधादि परिक्षयाद्वा॥ तथा च सारावल्यां॥ क्रूरदशायां क्रूरः प्रविश्य चांतर्दशायदा

करते॥ पुंसांस्यात्संदेहस्तदारियोगेसदैवमहान्॥ रवितनयस्यदशायांक्षितिजन्यांतद्दशा
यदाभवति॥ बहुकालजीविनामपिमरणंनिःसंशयंपुंसां क्रूरराशौस्थितःपापःषष्ठेवानि
धनेपिवा॥ तस्थैनरविणादृष्टःस्वपाकेमृत्युदोग्रहः॥ योलग्नाधिपतेःशत्रुर्लग्नस्यातद्द
शांगतः॥ करोतस्मान्मरणंसत्याचार्यःप्रभाषभते॥ एवंक्रूरहीनेलग्नेजातास्तेषांवर्षाष्ट
कादूर्ध्वंदर्शितकालाधस्तान्मरणंसंभवत्यत्र॥ तस्मादेतत्दूषणमसंबद्धं॥ अथद्वितीय
स्यदूषणस्यासंबद्धत्वमुच्यते॥ अत्रचक्रवर्तित्वंयोगमपिविनादीर्घमायुःसंभति॥ अ
त्रोदाहरणं॥ यत्रतात्कालिकाग्रहाःसलग्नाःवृषेकौदशभागानुभुक्तास्थितःएवंमिथुनेचं
द्रमास्त्रीन्॥ कुंभेभौमोष्टाविंशतिःमेषेबुधःपंचदशाः॥ सिंहेजीवःपंचः॥ मेषेसप्तविंश
तिःसत्रिभागाःशुक्रःकुंभेविंशतिसौरः॥ धन्विलग्नमंत्येंशा॥ तद्यथा॥ ईदृशाःग्रहाःसर्व

चक्रेण प्रवादयति॥ अत्र पूर्वप्रदर्शितक्रमेणागतानि ग्रहायुर्दायवर्षाणि लिख्यंते॥ वर्ष १७ मास ९ सूर्यवर्ष २ मास ११ चंद्रवर्ष १३ मास ९ भौमवर्ष ७ मास ० बुधवर्ष १८ मास ७ जीववर्ष १९ मास ३ शुक्रवर्ष १५ मास ० शनिवर्ष ९ मास ० लग्न॥ अथ बृहस्पतेर्वर्षाणां चक्रपातार्द्धभागमपास्य जातं वर्ष १३ मास ९ चंद्रस्य षष्ठांशभागमपास्य जातं वर्ष १९ मास ९ रवेर्गुरुर्मित्रमतोन्यथान्यरति॥ शुक्रशत्रुः स चार्कमूलकोणा सिंहान्नवमे स्थाने स्थितस्तस्मात्तत्कालिकं मैत्रीभूतः तेन वषस्थः शुक्रक्षेत्रे मध्यक्षेत्रे स्थितेस्तेन तस्यायुर्दायं न किंचिस्सतति॥ चंद्रस्य मिथुने मित्रक्षेत्रे स्थिततस्यादि यथादर्शितान्येवायुर्दायवर्षाणि॥ यस्माद्दुक्तं इंदोर्बुधं देवगुरुं च विंद्यात्॥ अंगारकः कुंभे शत्रुक्षेत्रे स्थितः॥ यस्मादुक्तं॥ भौमस्य शुक्रः श

सू	चं	मं	बु	बृ	शु	श	ल	०	०
१८	२	१०	०	८	०	१०	८	०	०
१०	२	२९	१६	५	२७	२०	२१		
०	०	०	०	०	२०	०	२१		

शिजश्चंद्रमित्रं शेषान् रिपून् शेषत्वाच्छनैश्चरस्तस्य शत्रुः॥ तत्कालिकश्चैकगृहे निविष्टत्वाच्छनैश्चरो पि शत्रुः॥ किंतु अंगारकस्य शत्रुक्षेत्रस्पस्यापि न पतति॥ यस्मादुक्तं॥ हित्वा वक्रं रिपुगृहगतैर्ह्रीयते स्वत्रिभागं इति॥ तस्मादंगारकस्य यथागतमेवायुः॥ शुक्रस्य मेषे॥ चांद्रेरर्कौ इति वचनात् सौमो बुधस्य मित्रं॥ तेन तस्य मेषास्थत्वात् यथागतमेवायुर्बुधस्य॥ बृहस्पतेरप्यादित्यो मित्रं॥ यस्मादुक्तं॥ गुरोश्च भौमं परिहृत्य सर्वे तस्मात्सिंहस्थस्य बृहस्पतेर्यथागतमेवायुः॥ शुक्रस्य मेषे स्थस्य च मित्रक्षेत्रे॥ यस्मादुक्तं॥ भृगुनंदनस्य त्वर्केंदु वर्ज्याः सुहृदः प्रदिष्टाः॥ तस्मात्तस्यापि यथागतमेवायुः॥ शनैश्चरस्यापि कुंभे स्वक्षेत्रस्थितत्वाद्यथागमेवायुः॥ एवमायुर्दायवर्षाणि एषकरलिख्यंते॥ वर्ष १७ मास ५ सूर्यवर्ष १९ मास ९ चंद्रवर्ष १३ मास ९ भौमवर्ष ७ मास ६ बुधवर्ष १२

मास९ जीववर्ष११ मास३ शुक्रवर्ष१६ मास३ शनिवर्ष९ मास० लग्न॥ सर्वेषां योगः वर्ष८६
मास११ एवंविधे योगे षोडशाधिकवर्षशतमप्यायुः संभवति॥ केमद्रुमाख्यश्चायं यो
गः॥ यस्माद्वक्ष्यति॥ हित्वार्कं सुनफानफादुरुधराः स्वांत्योभयस्थैर्ग्रहैः शीतांशोः कथि
तोन्यथा तु बहुभिः केमद्रुमोन्यैस्त्वसौ॥ तस्मादेवंविधे योगे जातो दीर्घमायुः प्राप्नोति॥
केमद्रुमत्वाच्चदरिद्रो भवति॥ वक्ष्यति च॥ केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः
खलाश्च नृपतेरपि वंशजाताः॥ केवलं दरिद्रो दीर्घायुषो दृश्यंते॥ न केनचित्कस्य दरिद्र
स्यायुःप्रमाणं जातं॥ यथायं दरिद्रो विंशत्यधिकेन वर्षशतेन सर्वं च दिनेन मृतास्तमा
त्सौदमेव दूषणं ज्ञातव्यं॥ एवमस्य दूषणस्यासंबद्धत्वं प्रदर्शितमिति॥ असंभाव्यत्वा
द्वाराहमिहिरहरते तच्चालिदयं न संभाव्यते॥ यच्चदर्शितं तांचार्यमतेनायुर्दायं तत्त्वा

253

सत्यमताद्युद्धायमंगीकरिष्यत्याचार्यस्तत्र च सत्समतासत्समतस्य बहुतराणामाचार्याणामंगी
करणमेव प्रदर्शितं॥ यस्मात्पूर्वमेवाचार्यस्य प्रतिज्ञा तथ्याख्याता॥ ज्योतिषमागमशास्त्रवि
प्रतिपत्तौ न योग्यमस्माकं॥ स्वयमेव विकल्पयितुं किंतु॥ बहूनां मतं वक्ष्ये॥ अथ किंचिदाह॥ न
तु योगं योगस्त्वया प्रदर्शितः स केमद्रुम एव न भवति॥ केंद्रं शीतकरे रथवा ग्रहयुते केमद्रुमो
नेष्यत इति॥ लग्नात्सत्समस्थः केंद्रस्थश्चंद्रमा तस्माद्यं केमद्रुमो न भवति॥ अत्र च ब्रूमः॥
अत्र चंद्रमा न गण्यते॥ यस्माच्चंद्रमसः सकाशाद्ग्रहेणान्येन योगः॥ कर्तव्य इति॥ यद्यवं त
ल्लग्नात्केंद्रस्थः कथं करोतीत्यत्रोच्यते॥ चंद्रलग्नयोस्तुल्यत्वात्॥ तथा च यवनेश्वरः॥ मू
र्तिं च होराशशिभं च विद्यात्॥ अत्र च गार्गिः॥ व्ययार्थकेंद्रगश्चंद्राद्विनाभाणं भवेद्ग्रहः॥
कश्चित्स्याद्वा विना चंद्रं लग्नात्केंद्रमतोथवा॥ योगः केमद्रुमो नाम तदास्यायत्र गर्हितः॥

भवंति निंदिताचाराः दरिद्रा मयसंयुताः इति॥ तस्माल्लग्नात्सप्तमस्थे चंद्रमस्य योगस्य केम
द्रुमता सिद्धैवेति॥ अथ जीवशर्म्ममतेन सत्याचार्यमतेनायुर्दायमौपच्छंदसिकेनाह॥ स्वमते
न किलाह जीवशर्म्मा ग्रहदायुं परमायुषः स्वरांशं॥ ग्रहभुक्तेन वा त्रैराशिक तुल्यं बहु साम्यं स
मुपैति सत्यवाक्यं॥१॥ जीवशर्मा नामाचार्यः स्वमतेनात्मीयमतेन परमायुषो विंशत्यधि
कस्य वर्षशतस्य पंचदिनस्य स्वरांशं सप्तमभागं प्रत्येकस्य ग्रहस्यायुर्दायमाह कथयति॥
किलशब्दस्त्वागमप्रदर्शनार्थः तेन तद्यथा परमायुः १२०।०।५ अस्य सप्तभिर्भागमप
हृत्वा भागं वर्षादि॥१७।१।२२।८।३४। यथान्याचार्यैर्नवतिथिविषयेत्येवमादीनि परमोच्च
गतानामादित्यादीनां वर्षाणि पठितानि तथैतानि परमायुषः स्वरांशवर्षाण्येकैकस्य जी
वशर्म्मपठितानि॥ नीचेतोर्द्धं ह्रसति सतीसत्त्रापि स्थितमेव तद्यथा॥ एतानि परमनीच

स्थ स्येकैकस्य ग्रहस्य ८।६।२६।२।१७॥ एतैः प्राग्वदत्र त्रैराशिकं सत्येकैकस्य ग्रहस्यायुर्दायः क
र्त्तव्यः॥ अत्रापि वक्रभौमं विना शत्रुक्षेत्रस्थस्य ग्रहस्य त्र्यंशापहानिः शुक्रशनैश्चरौ विना॥ भौ
मं विना च बलवद्ग्रहस्यास्तंगतस्यार्द्धापहानिः सर्वार्द्धत्रिचरणोत्यादिका चक्रपातापहानिः
क्रूरे विलग्नसहिते सार्द्धोदितेति हानिः एतत्सर्वं जीवशर्मणोप्यस्याचार्यैः समानं॥ तथा च जी
वशर्म्मा॥ ससरवौ १७ को १ द्वियमौ २२ सवौ ८ वरोग्नयो ३४ ग्रहेंद्राणां वर्षाण्युच्चस्थानां नी
चस्थानामतोर्द्धं स्यात्॥ मध्येनुपाततः स्यादानयनं शेषमत्र यत्किंचित् पिंडायुषश्च वक्रा
यं तत्सर्वं गणीततत्वज्ञैरिति॥ अत्रानयने सुखोपायेन दृश्यते॥ स्वोच्चस्थो ग्रहः शोध्यो
षड्राशयुतो भमंडलात्॥ तद्भागाः षड्विंशद्युक्ता भागाः ८६।१२ स्तावद्राश्यसायकैः॥ ५०४ भ
क्ता दिनादिपल्लब्धं तदायुजन्मशर्मजं॥ दिनैर्भ्यस्त्रिंशता मासा मासैर्भ्योरविभिः समाः न

केवलं ग्रहाद्यायं परायुषः स्वरांशं एतत्॥ तेनोक्तं॥ यावत्सुमतेनेति॥ अनेनैतत्प्रतिपाद
यति॥ यथैतन्मयाऽऋषिकृतेष्वाचार्यकृतेषु वा न केचिद्धास्त्रेषु दृष्टमिति॥ तस्मादस्या
युर्दायस्य जीवशर्मणः स्वमतकरणमेव दोषः एवं सर्वाचार्यमतेनायुर्दायो व्याख्यातः॥
अत्राचार्येण यवनमतेनोपन्यस्तं॥ मयय वनमणित्थशक्तिपूर्वैरिति॥ न च यवनेश्व
रकृते शास्त्रे तथाविधआयुर्दायो दृष्टः यस्माद्यवनेश्वरेनोक्तं॥ आयूंषि राश्यंशकचायो
गादिति॥ अत्रोच्यते॥ यवनेश्वरेण शुचिध्वजेनान्यच्छास्त्रं कृतं॥ शककालस्यार्वाक्॥ त
था च शुचिध्वजः॥ गतेन साध्यद्वशतेनैयुक्तमेतेनयुक्तमेकेन केषां नगेताब्दसंख्याका
लः शकेनोनः सविशोध्य तस्मादतीतवर्षाद्युगतवर्षजातं॥ एवं केचिच्छुचिध्वजकृतं श
ककालस्यार्वाक् ज्ञायते॥ यवनाचार्यैः पूर्वैः कृतमिति॥ तदर्थं शुचिध्वजोप्याह॥ यवना

ऊचुः॥ ये संग्रहे दृग्जनितानि भेदाः प्रोक्ताः पुराणैः क्रमशो ग्रहस्य॥ तदेतत् ज्ञायते॥ यथाव
राहमिहिरेण पूर्वयवनाचार्यमतमेवोपन्यस्तं॥ अस्माभिस्तन्न दृष्टं॥ पराशरस्यापीय
मेव वार्ता पाराशरीयासंहिता केवलमस्माभिर्दृष्टा न जातकं॥ श्रूयते स्कंदहूत्रयमपि पारा
शरस्येति॥ इदर्थं वराहमिहिरः शक्तिपूर्वैरित्याह॥ चैत्रं प्रोह्य पराशरः कश्यप[illegible]सौभाग्य
दैयो षिताभित्येवमादि॥ मयमणित्थयोर्होराशास्त्रे विद्यते॥ तथा च मयः॥ एकोनविंश
तिः सूर्यश्चंद्रमाः पंचविंशतिः॥ तिथिसंख्या कुजः सौम्यो द्वादशोच्चगतो गुरुः॥ कुजवद्दै
ण
सं पूज्यस्तु वर्षाणामेकविंशतिः॥ एकोनसूर्यपुत्रस्य परमोच्चगतस्य च॥ आयुर्दायमिदं
प्रोक्तमर्द्धं नीचगतस्य तु॥ अंतरेत्वनुपाताच्च कारयेदायुसंग्रहः॥ तथा च मणित्थः॥ न
वरूपाः शरयमलास्तिथयोर्काः पंचरूपकाः क्रमशः रूपयमाः श्रुतिसंख्याः सूर्यादि

नास्वतुंगेषु॥ अस्यानीचेष्वस्मादल्पमन्यत्रानुपाततः कार्यं॥ आयुर्दायविधानं होराभुक्तां
शराशितुल्यमपि॥ अथ वराहमिहिरस्य स्वमतामुर्दायो यवनेश्वरसत्यमतानुसारी व्या
ख्यायते॥ ग्रहभुक्तनवांशराशितुल्यमिति॥ यत्र तत्र राशौ यस्मिन्नवांशके ग्रहो व्यवस्थि
तः॥ स च नवांशको मेषादेरारभ्य यावसंख्यस्य राशेः संबंधी भवति॥ तावंति स्येए वर्षाणि ग्र
हः स्वायुर्दायं प्रयच्छति॥ एवं भुक्तनवांशराशितुल्यं भवति॥ यस्मिंश्चंद्र नवांशके वर्तते
तस्मात्प्रभुक्तेग्रहेण तेन सह त्रैराशिकं कृत्वा मासाद्यानयितव्यं॥ त्रैराशिककरणं चव
क्ष्यति एवमायुर्दायानयनं च सत्याचार्येणोक्तं॥ तथा च तद्वाक्यं॥ राश्यंशकसंयोगादा
युरिह समासतो ग्रहाः दधुः॥ एतच्च सत्यवाक्यं॥ बहुसाम्यं समुपैति॥ बहूसंमतं ब
हूनामाचार्याणां संमतं॥ तथा च यवनेश्वरः॥ आयूंषि राश्यंशकचार योगादिति॥ अ

त्र तावत्सत्ययवनेश्वरवाक्यव्याख्याने किंचिद्विप्रतिपन्नं॥ राशेरंशकचारयोगादिति
व्याचक्षते॥ यथा यस्मिन्राशौ ग्रहो वर्तते॥ तत्र तेन यावंतो नवांशकाः भुक्तास्तावंसे
वर्षाण्यायुः स ग्रहो ददाति॥ अत्र च व्याख्याते परमं ग्रहदायं शोध्य क्षेपादौ विना नव व
र्षाणि भवंति॥ तत्तच्च व्याख्यानं बादरायणादिभीरंगीकृतं॥ तथा च बादरायणः॥ राश्यं
शकलागुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः द्वादशाहृता वशेषो ब्दा मासादीन नाडि
काः क्रमशः॥ इयमाचार्यवराहमिहिरेणा विनष्टे वस्वल्पजातके भिहिता एतेनुसारे २
ण सत्ययवनेश्वरयोर्व्याख्यानं क्रियते॥ आ पूंषि राश्यंशकचारयोगादिति॥ राशीनामंश
काः तेषु चारयोगादिति॥ यत्र तत्र राशौ मेषांशकस्थो ग्रहो वर्षमेकं प्रयच्छति॥ वृषन
वांशकस्थो द्वौ एवमुत्तरोत्तरांशकवृध्या वर्षवृद्धिर्यावन्मीनांते द्वादश इति॥ पूर्वव्या

ख्यानेन यवनेश्वरसत्यवाक्ययो रात्रिग्रहणमनर्थं भवति॥ अवश्यमेव राश्यंशकैर्भवि
तव्यमिति॥ अथानेनैव व्याख्यातानुसारेणाचार्य्यो वायुर्दायानयनमार्य्ययाह॥ सत्योक्ते
ग्रहमिष्टं लिप्तीकृत्वा शतद्वयेनाप्ते॥ मंडलभागविशुद्धेऽब्दाः स्युः शेषात्तु मासाद्याः॥१०॥
सत्योक्तेइति॥ सत्योक्ते सत्यमतायुर्दायकरणे तात्कालिकमिष्टमभिप्रेतं ग्रहं लिप्तीकृत्य
सा पिंडं कृत्वा तस्य शतद्वयेन भागमपहृत्य यदवाप्तं तदवाप्ताख्यं स्थाप्य॥ अवशेषमधः

८

स्थाप्यं॥ अवाप्ते मंडलभागविशुद्धेऽब्दाः यः स्युः॥ मंडलशब्देन द्वादशराशय उच्यंते॥ ते
नावाप्तस्य द्वादशभिर्भागमपहृत्यावाप्तं त्याज्यं॥ यदवशिष्यते तेऽब्दाः स्युस्तावद्वर्षाणि
तेन ग्रहेणायुषो दत्तानि भवंति॥ शेषात्तु मासाद्याः योवशेषस्थापितं॥ तस्माद्द्वादश
गुणितात्तेनैव छेदेन विभक्ता मासा लभ्यंते॥ तच्छेषात् त्रिंशद्गुणितादिनानि॥ तच्छेषा

तां त्रिंशद्गुणितादिनानि॥ तच्छेषात् षष्ठिघ्नात घटिकाः पुनरपि षष्ठिघ्नात्भाग भक्ताच्च
षकापलाः लभ्यते॥ इति॥ एवमागतं ग्रहस्यायुर्दायं भवति॥ तत्र उदाहरणं॥ तात्कालि
को ग्रहः १९।१।२५ लिप्तापिंडीकृतः २३२९ अस्य शतद्वयेन २०० भागमपहृत्या वाप्तं ११ अ
वशेषं १२९ अवाप्तस्थाप्यं ११ द्वादशाभिर्भागं न प्रयच्छति॥ एतदेवावशेषं तस्मात् द्वादशैका
दशवर्षाणि दत्तानि भवंति॥ अथ च शेषं १२९ द्वादशाभिर्गुणितं १५०० अस्य शतद्वयेन
भागमपहृत्यावाप्तं ७ एवं सप्त मास· अथ मासशेषं १०० एतत् त्रिंशतागुणितं ३००० अ
स्य शतद्वयेन भागमपहृत्यावाप्तं १५ दिवसाः पंचदश इति॥ शेषस्याभावात् घटिका
भावः॥ एवं मागतं विधात् द्वादशवर्षादि वर्ष ११ मास ७ दिवस १५ चषक ० अथैव देवसंख्
शा कला गुणितेति न्यायेन प्रदर्श्यते॥ तद्यथा॥ राश्यादि ग्रहः ११८।२५ अस्य राशिभाग

लिसाः ए यकूए यकूद्वादशाहताः १२१९९५०० अथ भूयोमवाहताः १०८१८६०।०८१६० अत्र
लिसानामेतास्यां ०८६० षष्ट्या भागेहृते लब्धं ८१ अवशेषं ० ता घटिकालब्धमिदं ८१मा
गेष्वेतेषु ८६४ संयोज्य जातं ९४५ अस्य त्रिंशता भागेहृते लब्धं ३१ अवशेषं १५ एते दिवसाः
अयं लब्धमिदं ३१ शाशेष्वेतेषु १०८ संयोज्य जातं १३९ अयं द्वादशभिर्भागेहृते लब्धं ११
शेषं ७ एते मासाः लब्धे स्यास्य ११ द्वादशभिर्भागेन प्रयच्छतीत्यत ए तदेवात्र शेषं ११ एता
निग्रहायुर्दायवर्षाणि॥ एवं वर्ष ७११ मास ७ दीन १५ घटी० एत पूर्वहृतायुर्दाये संवि
दितमिति॥ एवं यवनेश्वरसत्याचार्यबादरायणवराहमिहिरेणायुर्दायं प्रदर्शितर
ति॥ एवमागतस्यायुर्दायस्य सत्याचार्यमतेनैव कर्म विशेषार्थं वंशास्छेनाह॥ स्वतुंग
वक्रोपगते स्त्रिसंगुणं द्विरत्तमस्वांशकभत्रिभागगैः॥ स्यान्विशेषस्तुभदंतभाषिते

समानमन्यस्य प्रथमेप्युदीरितं ॥११॥ स्वतुंगस्थे स्वोच्चगते ग्रहे वक्रोपगते विपरीतगत्याश्रि
तैश्च यत्स्वदत्तमायुस्तत्त्रिगुणं कार्यं ॥ उत्तमांशोर्गैर्वर्गोत्तमांशस्थितैः स्वभस्थैः स्वरा
स्युपगतैः स्वत्रिभागगैः स्वद्रेष्काणस्थैः एतैर्यद्दत्तमायुस्तद्द्विसंगुणं कार्यं ॥१२॥ यान्विशे
षइति ॥ भदंतशब्देन सत्याचार्योभिधीयते ॥ यस्मात्तन्मतमिह प्रमाणीक्रियते ॥ पूर्वोक्त
विधिना मययवनमणित्थादिमते नायुर्दायः कृतः ॥ तस्मात्तस्य भाषिते सत्याचार्योक्ते
ते इयान्नेतान्विशेषः ॥ इयदेतत्स्वतुंगवक्रोपगते त्रिसंगुणं ॥ तस्योक्तमेव ॥ समान
मन्यदिति ॥ अन्यद्यच्छेषं तत्सर्वं प्रथमेप्युदीरितं ॥ प्रथमे मययवनादिमते यदुदीरितमु
क्तं तत्समानमन्यत्रापि तत्तुल्यं ॥ एतदुक्तं भवति ॥ सत्याचार्यमते नायुर्दाये क्रूरवक्र
वर्ज्जं शत्रुगतस्य त्र्यंशो पातनीयः ॥ शुक्रसौरौ वर्ज्जं अस्तंगतस्यार्द्धं पातनीयं ॥ सर्वार्द्धं

त्रिचरणेत्यादिचक्रपातापहानिः कार्या॥ एवं सत्याचार्यमतेन ग्रहायुर्दायमुक्त्वाधुना लग्ना
युर्दायकरणं क्रूरोदये पापोदये हानिः प्राप्ता॥ तदपवादार्थमिदं वज्रयाह॥ किंत्वत्र भांस
ख्यप्रतिमं ददाति। वीर्यान्विता राशिसमं च होरा॥ क्रूरोदये चोपचयः स नात्र कार्यं च नावैः
प्रथमोपदिष्टैः॥१२॥ अत्रास्मिन्सत्यमतायुर्दाये होरालग्नं भांशप्रतिमं ददाति। मेषादेरा
रभ्य यावत्संख्यस्य राशेः संबंधी नवांशको लग्नेन भुक्तस्तावंति संख्यानि वर्षाणि लग्ना
युर्दायो ददाति। शेषांशभागादिकान्त्रैराशिकेन मासाद्यानयितव्यं॥ एतदुक्तं भवति॥ सत्यो
क्ते ग्रहमिष्टं लिप्तीकृत्येति न्यायेन लग्नायुर्दायः कर्तव्यः॥ एवं सत्यां यदि वीर्यान्विता होरा भ
वति॥ तदा राशिसमानानि राशितुल्यानि वर्षाणि प्रयच्छतीति॥ होरास्वामिगुरुज्ञवीक्षित
युतेति न्यायेन यदि वीर्यान्विता बलवती होरालग्नं भवति तदा राशिसमं ददाति॥ ततु

ल्यानि वर्षाणि प्रयच्छंति॥ भागादिकात् त्रैराशिकेन मासाद्यानयितव्यं॥ कथमुच्यते॥ भागा
श्चलिप्तापिंडीकृत्य द्वादशभिः संगुण्याष्टादशभिः शतैर्भागमपहृत्यावाप्तं मासाः॥ अतः
शेषं त्रिंशता संगुण्य तेनैवच्छेदेन भागमपहृत्यावाप्तं दिवसाः॥ तदवशेषं षष्ट्या संगु
ण्य तथैव घटिकाः॥ पुनरपि शेषं षष्ट्या संगुण्य तथैव चषकाः॥ लब्धमासादि तत्रैव यो
जयेत्॥ एवं लग्नायुर्दायो भवति॥ वीर्यान्वितस्य लग्नस्य यत्कर्म तद्वीर्यवर्जितस्य च न
कर्त्तव्यं॥ अत्र च बादरायणः॥ होरादयोप्येवं बलयुक्ताः न्यानि राशितुल्यानि॥ वर्षाणि सं
प्रयच्छत्यनुपाताच्चोंशकादिफलं॥ एतच्चाचार्यवराहमिहिरेण स्वल्पजातके ऽविनष्टे
वानयार्यया ऽभिहितं॥ क्रूरोदय इति॥ मयययवनादिमतायुर्दाये क्रूरलग्नगते सार्द्धहि
तेदितनवांशाहतात्समस्तादिति न्यायेन परायुषोपचयः क्रियते॥ तदत्रास्मिन्सत्यमता

युर्दायेन कर्तव्यं॥ अन्यत्सुर्वं कर्तव्यं॥ कार्यं च नाब्दैरिति॥ अथ मोत्र दिष्टैः पूर्वकथितैरब्दैः
नवतिथिविषयेति तेब्दाय वनबादरायेणाचार्यमतेन पठिता जीवशर्म्ममतेन च ग्रहद
यं परमायुषः स्वरांशमिति तैरब्दैर्यवनैयत् त्रैराशिकमुक्तं तदिह न संभवति॥ यदादि
त्यस्य द्वादशानां मंशानां मेकोनविंशत्यब्दा भवंति॥ तदैकस्मिन्नंशके किमिति॥ सत्यायु
र्दायेन किंचित्कर्तव्यं॥ अथ मयादिमतमुपन्यस्य जीवशर्म्ममतं चोपन्यस्य सत्यमत
स्येवांगीकरणमिंद्रवज्रयाह॥ सत्योपदेशो वर मत्र किंतु कुर्वंत्ययोग्यं बहुवर्गनाभिः॥
आचार्यकत्वं तु बहुज्ञा तथामेकं तु यद्भिरितदेव कार्यं॥ १३॥ अत्रास्मिन्मत्रं यसत्योप
देशो वरं श्रेष्ठमित्यर्थः॥ किंतु यदप्यन्येव बहुवर्गाणाभिः बह्वीभिः गुणनाभिरयोग्यं
कुर्वंति॥ विनाशयंतिकास्ता गुणकाः स्वतुंगवक्रोपगतैस्त्रिसंगुणमित्यादिकाः॥ तत्तत्र

यदि स्वगृहे ग्रहो भवति तदा द्विगुणमायुर्ददंति॥ स एव ग्रहोंशके यदि भवति तदाभूयोपि द्विगुणं कुर्वंति स एव वक्री यदि भवति तदा भूयस्त्रिसंगुणं कुर्वंति॥ स एव स्वोच्चस्थो भवति तदा भूयोपि त्रिसंगुणं कुर्वंति॥ एवमनवस्था॥ अनेनानवस्थाप्रसंगेन सत्योक्तमप्यायुर्दायमप्युत्तमयोग्यं कुर्वंति॥ बहुवर्गणाभिः॥ तथा च मयः॥ वर्गोत्तमे स्वराशौ द्रेष्काणे स्वनवांशके द्विगुणं॥ वक्रोच्चगते त्रिगुणं कार्यं यथासंख्यं॥ तथा च सारावल्यां॥ बहुता उनसंप्राप्तो यां गरोत्ये कवर्गणां॥ वराहमिहिराचार्यः सानस्थाचिरंतनैरिति॥ एतदुक्तं॥ तत्र किं कार्यमित्याह॥ आचार्यकत्वे बहुघ्नतायामिति॥ एतदाचार्यकत्वमत्रागमः॥ बहुघ्नतायां प्राप्तायामेकत्वं तु बहुतरं गुणनं तदेव कार्यमिति॥ बहुषु गुणनाप्राप्तास्वेकैव क्रियत इति॥ बहवारं यत्र द्विगुणयितत्वं प्राप्तं तत्र सकृदेव द्विगुणमायुः कर्तव्यं॥ यत्र

द्विगुणत्वं च प्राप्तं तत्र सकृदेव त्रिगुणं कर्तव्यं॥ यत्र वारद्वयं त्रिगुणं प्राप्तं तत्र सकृदेव त्रि
गुणं कर्तव्यं॥ एकं तु तत्र भूरितदेव कार्यमिति वचनात्॥ स्वल्पजातकेप्युक्तमाचार्येण॥
वर्गोत्तमस्वराशिद्रेष्काणनवांशके स्वके सकृत् द्विगुणं॥ वक्रोच्चयोस्त्रिगुणितं द्वित्रिगु
त्वे सकृत् त्रिगुणमिति॥ चक्रपातं वर्जयित्वा बहुवर्गणान्याये नैवापहातावेतदेव कर्म्म॥
शत्रुक्षेत्रस्थो नीचस्थश्च यदा ग्रहो भवति॥ अस्तंगतो वा तदा सकृदेवार्द्धापहानिः कार्या॥
नीचतोर्द्धं न्हसतीत्यत्रापि अनुवर्तनीयं॥ उक्तं च स्वल्पजातके॥ शत्रुक्षेत्रे अंशनीचेर्द्धं सूर्य
लुप्तकिरणाश्च॥ क्षययेति स्वादाया न्नास्तं यातौ रविजशुक्राविति॥ एवं कृतस्य सत्याचार्यमत
स्य स्पष्टता भवतीत्याचार्यस्य मतं॥ यत्रापहानिप्राप्ता गुणनाच प्राप्ता तत्र सकृत्सदेवापहानि
कृत्वा सकृदपि गुणना कार्या॥ किंत्वपहानौ कर्तव्यायां चक्रपातापहानिं कृत्वा ततः शत्रुक्षे

त्रस्थस्यापहानिंसकृदेवकर्तव्या॥ ततःसकृदेवगुणनाकार्या॥अत्रचभगवान्गार्गिः॥
राशितुल्यांशसंख्यानिग्रहोवर्षाणिप्रयच्छति॥लग्नश्चसबलोयानिभुक्तराशिसमानितु॥
मासाद्यानयनंकार्यमनुपातादतःपरं॥सर्वार्द्धत्रिचतुर्थांशान्वामेपंचतुसंमितं॥ह
रंतिपापाःसाद्यायातदर्द्धमितरेग्रहः॥व्ययाद्यक्षापहानिस्तुकथितेयं॥तथाचध्रु
वं॥एकस्थेकक्षंगेष्वेवकरोतिबलवान्ग्रहः॥शत्रुक्षेत्रगतः अंशंनीचर्द्धंसूर्यगस्त
था॥ध्रुवापहानिःकर्तव्याततोन्यसुबहुष्वपि॥त्र्याद्यास्वेकैवकर्तव्यायास्यातासुमह
तरा॥ततोपिगुणनाकार्याप्येकैवमहतीसकृत्॥द्वाभ्यांवर्गोत्तमेस्वांशेद्रेष्काणेस्व
केग्रहे॥त्रिभिर्वक्रगतस्याथस्वोच्चराशिगतस्यच॥ग्रहदायोभवत्येवंत्रोध्यक्षेपद्रु
तक्रियः॥अत्रयद्यप्याचार्येणांशायुःप्रमाणीकृतंतथापिलग्नोयदिसम्यग्बलीभव

ति तद्दशायुः कर्त्तव्यं॥ अथार्को बलवांस्तदा पिंडायुः॥ तथा च मणित्थः॥ विलग्नमेव बलोपेते शुभदृष्टे दशासंभवः॥ रवौ पिंडाभवं कुर्यादिति ब्रुमंश्चिरंतनाः॥ तथा च सारावल्यां॥ अंशोद्भवं विलग्नात्पैंडं भानोर्निसर्गजं चंद्रादिति॥ अन्येप्येवमायुः यथांशायुः पिंडायुषो द्वे अपि कार्ये द्वाभ्यामपि दशांतर्दशाविभागपरिकल्पना कार्या॥ तत्र यदल्पं तस्यांतिमां तर्दशासैव यद्यपि मित्रादिकस्य तत्कालेवर्त्तते तदाधिकमायुर्भवति॥ शत्रुदशा चेत्तदा तत्रैव मरणं मित्रदशा चेत्तथापि जीवति॥ मध्यदशा चेत्तदा पीडा भवति ततोपि जीवति॥ अस्माकं सत्याचार्यमभिमतमपि॥ अथ यस्मिन् योगे जातस्यायुः प्रमाणं न ज्ञायते तद्योगज्ञानं पुष्पिताग्रयाह॥ गुरुशशिसहिते कुलीरलग्ने शशितनये भृगुजे च केंद्रयाते॥ भवरिपुसहजोपगैश्च शेषैरमितमिहायुरनुक्रमाद्विना स्यात्॥१४॥

कुलीरलग्ने कर्कटोदये गुरुशितसहिते जीवचंद्रसंयुक्ते तथा शशितनये बुधे भृगुजे
च शुक्रे केंद्रयाते केंद्रगते शेषैः परिशिष्टैः रविभौमसौरैर्भवरिपुसहजोपगतैः भव
स्थानमेकादशं रिपुस्थानं षष्ठं॥ सहजस्थानं तृतीयं॥ एतेषु भवरिपुसहजेषु उप
गतैः स्थितैः इहास्मिन्योगे जातस्यानुक्रमादिनागणितगर्भांतरेणापि विनामि
तं अपरिमितायुः स्याद्भवेत्॥ तदुक्तं भवति॥ यदा कर्कटलग्नं भवति तत्रैव चंद्रजी
वौ व्यवस्थितौ भवतः बुधशुक्रौ सहितौ पृथग्वस्थौ वा लग्नचतुर्थसप्तमदशमस्था
नामन्यतमे यथासंभवं भवतः परिशेषाः आदित्यांगारकशनैश्चराः पृथक्स
हिता वा यथासंभवमेकादशतृतीयषष्ठगा भवंति तदा ईदृग्योगे यो जातः तस्यामि
तप्रमाणमायुर्भवति॥ अनुक्रमाद्गणिनानीतं विनैव अयमर्थः॥ एवंविधे योगे

दृष्टेआयुर्दायोगणनानकर्तव्या॥यस्मातस्यनसंबंधमिति॥अतोन्यथाजातस्यय
थागतेनायुषःवत्स्यमेवभवितव्यमिति॥यस्मिन्योगेजातस्याविचारमेवनायुषो
ह्रासोभवतीतिस्मृतिसूक्तं॥नहीदृशमनायुष्यंयथान्यस्त्रीनिमेषवतां॥इत्येवमादि
कैर्दोषैर्नजीवितस्मतिरिति॥ततयोगेजातस्यायुर्वेदोक्तैर्विधिसेवितैसायनैत्रयोग
गेर्यथाभिहितैर्दीर्घमायुरप्नोवीति॥इतिश्रीभट्टोत्पलविरचितायांबृहज्जात
कविवृत्तायामायुर्दायाध्यायस्समाप्तः॥७॥८॥अथातोदशांतर्दशाध्यायोव्याख्यायते॥
परिज्ञातःसमस्तायुषःपुरुषस्यजीविताभ्यंतरेस्थितयोःसुखदुःखयोःपरिच्छेदः
क्रियते॥तत्रयत्रोध्यक्षेपविशुद्धमायुर्यावल्लमाणयेनग्रहेणदत्तंतावल्लमाणेवत
स्यसंबंधिनीदशाभवति॥तत्रदशाक्रमोनज्ञायतेततज्ञानेमालिन्यात्॥उदयरवि

र०

१२७

जा०

विशशांकप्राणिकेंद्रादिसंस्थाः प्रथममवयसि मध्येंत्ये च दद्युः फलानि ॥ न हि न फलवि-
पाकः केंद्रसंस्थाः यभावे भवति हि फलपंक्तिः पूर्वमापोक्लिमपि ॥ १ ॥ उदयो लग्नं तनुः
रविरादित्य आत्मा ॥ शशांकश्चंद्रो मनः एषामुदयरविशशांकानां मध्याद्यः प्राणी बलवा-
न् तद्बलवशात्तस्य संबंधिनी प्रथमा दशा भवति ॥ प्राणिनां देहवतां ॥ तथा च यवनेश्व-
रः ॥ निशाकरादित्यविलग्नभावात् त्कालयोगादधिके बले यः ॥ बिभर्ति तस्यादिदशो-
ष्यते सा शेषास्ततः शेषबलक्रमेणेति ॥ उदयश्च रविशशांकश्चोदयरविशशांकानां
प्राणी उदयरविशशांकप्राणिकेंद्रादिसंस्थाः ॥ एवमेषां मध्याद्यन प्रथमा दशा दत्ता त-
स्यै केंद्रादिसंस्थाः केंद्रपणफरआपोक्लिमेषु स्थिता ग्रहा विपर्योपचयक्रमेणा दशां द-
द्युः ॥ एवं लग्नार्कशशांकानां मध्यादेकस्य बलवतो दशामादौ परिकल्प्य ततस्तस्य

१२७

274

ये केंद्रस्था तेषां दशाः परिकल्प्याः तैः केंद्रस्थैः प्रथमे वयसि फलं दत्तं भवति॥ ततः प्रथमदशाप
तेरेव ये पणफरस्था तेषां दशाः परिकल्प्याः तैर्मध्ये वयसि फलं दत्तं भवति॥ ततः प्रथम
दशापतेरेवापोक्लिमस्थानां दशाः परिकल्प्याः तैरंत्ये वयसि फलं दत्तं भवति॥ यत उक्तं॥
प्रथम वयसि मध्ये से च दद्युः फलानि तथा च यवनेश्वरः॥ पूर्वं केंद्रोपगताः फ
लंति मध्ये वयः पणफरं निविष्टाः॥ आपोक्लिमस्थाः फलदाव पांते यथाबलं स्वं समुपे
ति पूर्वं॥ अथ यदि केंद्रस्थाग्रहाः भवंति॥ तदा कः प्रथमे वयसि फलं प्रयच्छतीत्याह॥
न हि न फलविपाकं इत्यादि॥ केंद्रसंस्थाः अभावे केंद्रस्थानां ग्रहाणामभावे असंभवे स
ति प्रथमे वयसि यः फलविपाकः स न हि न ये द्वौ नेत्रौ प्रकल्पयर्थं गमयतः॥ पणफर
स्थानामप्यभावे मध्ये वयसि फलविपाको न हि न॥ एतदुक्तं भवति॥ यदा केंद्रस्थाग्र

हा न भवंति॥ तदा पणफरस्थाः पूर्वं फलं प्रयच्छंति॥ ततआपोक्लिमस्थाः॥ अथ केंद्रस्था
न भवंति॥ तदा सर्वस्मिन्नैवं वयसि आपोक्लिमस्थाः॥ फलं प्रयच्छंति॥ यत उक्तं॥ भव
ति हि फलपक्तिः पूर्वमापोक्लिमेभ्य इति॥ एवमापोक्लिमस्थानामभावे प्रथमं केंद्रस्थाः फलं
प्रयच्छंति॥ ततः पणफरस्था आपोक्लिमस्था न भवंति न च पणफरस्थास्तदा सर्वदा सर्व
स्मिन्नेव वयसि केंद्रस्थाः फलं प्रयच्छंति॥ ततद्बुत्ते भवंति॥ लग्नार्केन्द्राशोकानां मयो
बलवांस्तस्य प्रथमादशा कल्पमित्वा ततस्तत्केंद्रगानां पूर्वेषां कल्पनीयः॥ तेषे परिक
ल्प पणफरस्थानां ततः परिकल्पनीयास्ततः परमापोक्लिमस्थानां केंद्रस्थानामभा
वे प्रथमं दशापतेरनंतरं पणफरस्थानां कल्पनीयास्ततआपोक्लिमस्थानामभावे
पणफरस्थानामप्यभावे आपोक्लिमस्थानामेव कल्पनीया॥ अथ केंद्रस्थाः पणफ

रस्थाः श्च भवति॥ अपोक्लिमस्थाश्च भवंति॥ तत्र केंद्रस्थानां कल्पयित्वा यो क्लिमस्थानामेव
कल्पनीयः॥ अथ पणफरस्था भवंति तदा पणफरस्था एव कल्पनीयाः॥ अथापोक्लिमस्था
भवंति तदा तेषामेव कल्पनीया॥ तथा च स्वल्पजातके उक्तं॥ लग्नार्कशशांकानां यो बल
वांस्तद्दशा प्रथमाः॥ तत्केंद्रपणफरापोक्लिमोपगानां बलाच्छेषाः॥ अथादशाकालप्रमा
णे केंद्रस्थानामपि दशाक्रमज्ञानमिंद्रवज्रयाह॥ आयुःकृतं येन हि यत्तदेव कल्प्या द
शासां प्रबलस्य पूर्वे॥ साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य॥२॥ ग्रो
ध्वस्तेय विशुद्धमायुर्यावद्वर्षप्रमाणं येन ग्रहेण दत्तं तस्य ग्रहस्य संबंधिनी दशा कल्प्या
परिकल्पनीया॥ तत्र लग्नार्कशशांकानां यो बलवांस्तद्दशा भवेत्प्रथमेति न्यायेन द
शा प्रथमं कल्पयित्वा ततस्तत्केंद्रगानां परिकल्पनीया यत्रैषां च केंद्रगानां मध्यात्सा

त

चरदशाप्रबलस्य पूर्वं प्रथमं स्यात्॥ अनंतरं तस्मादूनबलस्य॥ एवं क्रमेण यथा यथाउ
नबला भवंति तथा तथा पश्चात्तदीयदशा कल्पनीया॥ एवं केंद्रस्थानां दशापरिकल्प ततः
पणफरस्थानामनेनैव क्रमेण परिकल्प्या॥ ततआपोक्लिमस्थानामनेनैव क्रमेणेति॥
साम्ये बहूनामिति॥ केंद्रस्थानां बहूनां ग्रहाणां बलसाम्ये सति बहुवर्षदस्य बहूनिव
र्षाणि ये न दत्तानि तस्य प्रथमं दशापरिकल्प्या॥ नन्वत्र कथं ग्रहाणां बलसाम्यं भवंति॥
यदि द्वावपि स्वसुहृत्त्रिकोणोच्चं गतौ भवस्तदा नैसर्गिकेन योधिकः स एव बलीआ
स्यात्॥ किंतु स्थानदिक्चेष्टाकालबलग्रहदर्शनादिबलानि यावद्गणितविधिनैव क्री
क्रियंते॥ तावद्बलसाम्यं भवति ग्रहाणां॥ यथा सामान्येनोदाहरणं॥ यदि ज्ञानैश्चरौ ब
लत्रयेण संयुक्तौ भवति भौमो बलवद्द्येन तदा तत्र भौमस्य निसर्गबलत्वाद्बलसा

म्यभवत्येवं सर्वेषामपि ज्ञेयं॥ तेषां च साम्ये प्रथमोदितस्येति॥ तेषां वर्षाणां साम्येपि वर्षतु
लेपि प्रथमोदितस्य दशापरिकल्प्या॥ प्रथममासादवर्के मंडलाय उदित उक्त स्तस्य यदाव
ल साम्यं न भवति॥ तदा बहुवर्षदेपि ग्रहे स्थिते प्रथमोदितेपि स्थिते बलाधिकस्यैव
पूर्वं परिकल्प्येति॥ तेषां च बलसाम्ये प्रथमोदितस्य स्त्रद्धिविधउदयः॥ प्रत्यहं चक्रभ्र
मवशादेकः आदित्यविप्रकर्णणापरः॥ अत्र च भगवान् गार्गिः वः॥ बलिलग्नेंदुसूर्या
णां दशामाद्यां प्रयच्छति॥ तस्मात ततः प्रयच्छेति केंद्रादिस्थाः क्रमेण तः॥ तत्रापि बलिनः
पूर्वं तत्साम्ये बहुदायदः॥ तत्साम्येति प्रयच्छेति पूर्वं रविविच्युतः॥ एवं दशाव्यवस्था
योजितायामं तर्दशायां पाचकग्रहतो नवसंततिलकेनाह॥ एकर्क्ष गोद्दे मपहत्यदश
तितु स्वमेराशित्रिकोणग्रहगः स्मरागः स्वराशौ॥ पादफलस्य चतुरस्रगतः सहोरास्त्वेवं

परस्परगताः परिपाचयंति॥ आदशापतिना सहैकर्क्षगे ग्रहः एकस्मिन् राशौ व्यवस्थि
तः दशापतिरंतांतर्दशाकालस्य परदशमपदस्य स्वैरात्मीयैर्दशागुणैः परिपाचयंति॥
अंशत्रिकोणगृहगः दशापतेस्त्रिकोणगृहगो नवपंचमस्थाने स्थितो दशापतिरंतांत
र्दशाकालांतं अंशे तृतीयभागमपदस्य स्वैरात्मीयैर्दशागुणैः परिपाचयति॥ स्मरगः
स्वरांशमिति॥ दशापतेः॥ स्मरगः सप्तमस्थानस्थः दशापतिरंतांतर्दशाकालास्व
रांशे सप्तमभागमपदस्य स्वैर्दशागुणैः परिपाचयति॥ पादं फलस्य चतुरस्रगतः द
शापतेश्चतुरस्रगोष्टमचतुर्थस्थानस्थो दशापतिरंतांतर्दशाकालांत्स्वराशसप्तमभा
गमपदस्य स्वैर्दशागुणैः परिपाचयति॥ सहोराः होरालग्नं तया सहिता परस्परम
न्योन्यमनेन प्रकारेण व्यवस्थिराः स्वैः स्वैर्गुणैः परिपाचयंति॥ एतदुक्तं भवति॥ य

थारम्भापतेः सकाशादेकर्क्षादिस्थो ग्रहो यथास्वपठितमंत्रं परिपाचयंति॥ तथा लग्नम
पि पाचयति॥ अपरस्थापतेः प्रथममंत्रपरिकल्पनां कृत्वा पश्चादेकर्क्षादिस्थितानां क
र्तव्याः यस्माद्दशापते यो भाग आगच्छति॥ तदनुसारेणार्द्धादयो भागाः परिज्ञाणाम्भ
वति॥ अथैकस्मिन्स्थाने यदा बहवो ग्रहा भवंति तदा तेषां मध्याद्यो बलवान्स एवैकः
परिपाचयति वान्ये॥ कथमेतद्गम्यते॥ उच्यते॥ एकवचननिर्देशात्॥ एकर्क्षगो मपह
स्य ददाति तुल्यमित्यादिकवचनात्॥ न केवलमिहाचार्येणैकवचननिर्देशः कृतो यव
न्यस्मिन् जातकेपि॥ तथा चोक्तं॥ एकर्क्षेर्द्धं अंशं त्रिकोणयोः सप्तमे तु सप्तांशं॥ चतुरस्र
योस्तु पादं पाचयति यतो ग्रहः स्वगुणैरिति॥ न केवलं यवद्भगवान् गार्गिर्दीनामप्ये
कवचननिर्देशोस्ति॥ तथा च भगवान् गार्गिः॥ एकर्क्षसंस्थितश्चार्द्धं त्रिभागं तु त्रि

कोणगः॥ ससमस्थः स्वरांशे तु पादं तु चतुरस्रगः॥ लग्नेन सहिताः सर्वे त्यन्योन्यफल
दायकाः॥ यवनेश्वरश्चाप्येवं॥ कालोर्द्धे भागैकगृहाश्रितस्य तदर्द्धभागं लभते चतु
र्थे॥ त्रिभाग भागी च त्रिकोणसंस्थः तदर्द्धभाक् स्यात् द्यूनगृहं यः त्रिकोणे॥ स्यात् सप्तमे सप्तम
भाग भागी स्थितो ग्रहश्चार्खदां सहस्य॥ एवं सकवचेन निर्देशः॥ तस्मादेवं ज्ञायते॥ य
थैकएवांशहारी भवति न सर्व इति॥ तथा च सत्यः॥ अर्द्धं तृतीयमर्द्धं तथार्द्धं स्यो च्च स
समे भागं॥ एकर्क्षे नवपंचमचतुर्थनिधानास्तसंस्थानं॥ द्युगृहाग्रहाणां स्वदशांसां
तर्दशाब्दख्याना॥ फलकालान्मित्रविधिक्रमेण भेदाश्च्यतेप्येवं॥ एकर्क्षेषु बलवान्
भागहारो मित्रतोऽरिपोर्वापी॥ मित्रं चतुष्कलफलं तस्मिन् काले रिपुर्नैवं॥ तथा च म
यः॥ एकर्क्षोपगतानां यो भवति बलाधिको विशेषण॥ एकः स एव हर्त्ता नान्ये तत्रास्थि

ताविहगाइति लग्नेपियंत्राज्ञापहारीत्वंप्रासस्तत्रचलग्नेग्रहःस्थितोभवतितदा
लग्नग्रहयोर्बलवान्सएवैकःपठितमंशमपहरतितेनरइति॥अन्येसर्वेषामेका
दिराशिगानामंतर्दंशाभागमिच्छंति॥अथदशांशपरिकल्पनाज्ञानमिंद्रवज्रयाह॥स्था
नान्यथैतानिसवर्णइत्वासर्वाण्यथस्छेदविवर्जितानि॥दशाब्दपिंडेगुणकायेथा
शंछेदस्तदैक्येनदशाप्रभेदः॥४॥अर्द्धादिकाभागाःस्थानशब्देनोच्यंते॥तेषांचअर्द्धा
दिकानांभागानांसवर्णनाकार्या॥सवर्णनासदृशछेदता॥ततःसवर्णयित्वाछेद
सादृश्यमुत्पाद्यततस्तानिसर्वाणिस्थानानि॥अथस्वैःछेदैर्विवर्जितानिकार्याणि
छेद।आपा[illegible]स्याइत्यर्थः॥उपरिस्थितारांशयोयथांशंप्रत्यंशंगुणकाराभवति॥
छेदः तदैक्येनतेषांराशिनामैक्येनसंस्रणेछेदोभागहारोभवति॥कस्थिनगुणका

राभागकाराः स्यात्॥ दशाब्दपिंडे दशावर्षसमूहे॥ तेनेतदुक्तं भवति॥ दशाब्दानृथक्पृथक्
पृथक् गुणकारैः संगुण्य छेदेन विभाज्याप्तवर्षाद्येतद्दशा भवति॥ तत्रोदाहरणं॥
दशापतिर्नवमं केवलं कश्चिद्गृहः स्थितः अन्यस्थानेषु न काश्चित्स्थितस्तदा स एवा
र्द्धापहारात्तत्र दशापतेरूपस्यैकस्यैवाधोरूपमेकं न्यसेत्॥ एवमर्द्धहारस्य रूपस्या
धो रूपद्वयं न्यासः॥ १।२। अत्र परस्परछेदगुणावेतौ राशी कर्तव्यौ कृतौ च जातौ २।२
एतौ समछेदौ भूतौ छेदहीनौ २ एतौ गुणकारौ अनयोर्योगः ३ एष भागापहारः एत
द्दशानिदृत्ताशुद्धायु ३।०।०।० जातं तद्द्वाभ्यां संगुण्य ६ त्रिभिर्विभज्याप्तं फलं २।०।०।०
इयं मूलदशापतेरंतर्दशा पुनरपि मूलदशापतिः॥ वर्षाणि ३ एकेन संगुण्य त्रि
भिर्भज्याप्तं १।०।०।० इयं दशापतिना सहैकराशिव्यवस्थितस्यांतर्दशा॥ एवंम्

लदशापतिरंतर्दशाकालादेकराशिगेन ग्रहेणाईपाचितो भवति॥ अस्यां तर्दशाकाल
द्वयस्य योगः ३।०।०।० जातासैव मूलदशाति॥ अथ दशापतेर्नवमपंचमस्थानेयोरेकस्मि
न्स्थानेरकश्चिद्ग्रहः। ९ स्थितो भवति॥ द्वितीयेन वदशापतिनासह न चतुरस्रयो न च
सप्तमेन दत्यासः ३।२ एतौ परस्परछेदहतौ ३।२ छेदहतौ ३ एतौ गुणकारौ एकीकृतौ॥ ५
एषन्नागहारः मूलदशापतेर्दायः अस्य त्रिगुणस्य चतुर्भिर्भागमपहृत्य वासः ३ एवं
मूलदशापतेरं तर्दशाकालः॥ अथ मूलदशापतिर्दायस्यास्य॥ ४।०।०।० एकगुणस्य च
तुर्भिर्भागमपहृत्यासं १।०।०।० एषा त्रिकोणस्यांतर्दशेति॥ एवं मूलदशापिरंतोतरद
शाकालस्त्रिकोणस्थेन त्रिभागमपहृत्य भवति॥ अस्यांतर्दशाकालद्वयस्य योगः॥ ४।०।०।०
जाता सैव मूलदशेति॥ अथ दशापतेश्चतुर्थाष्टमयोरेकस्मिन्स्थाने कश्चिद्ग्रहो भवति॥

नद्वितीयेन च दशापतिना सह कोणयोर्न समे तदा न्यासः २ ६ परस्परछेदनौ ३ ६ छेदहीनौ २ एतौ गुणकारौ एकीकृतौ ६ एष भागहारः मूलदशापतेर्द्वयः ५।०।०।० अस्य चतुर्गुणस्य पंचभिर्भागमपहृत्यावाप्तं मूलदशापतेरंतर्दशाकालः॥ अथ मूलदशापतेर्द्वितीयस्यास्य॥ ५।०।०।० एकगुणस्य पंचभिर्भागमपहृत्यावाप्तं १।०।०।० एषा चतुरस्रस्थस्य अंतर्दशेति॥ एवं मूलदशापतिदत्तान्तर्दशाकालाच्चतुरस्रस्थेन पारमपहृतं भवति॥ अस्यांतर्दशाकालद्वयस्य योगः ५।०।०।० जातास्सैव मूलदशेति॥ अथ दशापतेः सप्तमेस्थाने कश्चिद्ग्रहो भवति॥ ५ न दशापतिना सह न त्रिकोणयोर्न चतुरस्रयोस्तदा न्यासः २।७ परस्परछेदहतावेतौ ७।२ छेदहीनौ एतौ गुणकारौ एकीकृतौ ८ एष भागहारः मूलदशापतिर्द्वयः ८।०।०।० अस्य सप्त गुणस्याष्टभिर्भागमपहृत्यावाप्तं ३ यं मूलदशापते

रं तर्दशा। पुनरपि मूलदशापतेर्दायः ८।०।०।० अस्यैकगुणस्याष्टभि ८।०।०।० र्भागमपह
त्यावाप्तं १।०।०।० इयं मूलदशापतेः सप्तस्थानस्थान्तर्दशा॥ एवं मूलदशापस्यान्तर्दशा
कालात्सप्तमो भागः सप्तमस्थानग्रहेण पाचितो भवति॥ अस्यान्तर्दशाकालद्वयस्य योगः
८।०।०।० जातास्सैव मूलदशेति॥ एवमेकस्मिन्नंतर्दशा पाचके कल्प्या॥ अत्रादौ मूलदशा
पतेरंतर्दशा भवति॥ तदनंतरमंशाहरस्य॥ अथ दशापतिना सह एकस्मिन्राशौ कश्चि
द्ग्रहो भवत्सपरश्च नवपंचमयोर्मध्याद् एकस्मिन्भवति न द्वितीये नान्येषु स्थानेषु नच
तुरस्रयोर्न सप्तमे तदान्यासः २।१।२ एते राशयः परस्परछेदहता जाताः ६।६।३ एकी
कृताः १५ एष भागहारः॥ अथ दशापतिर्दायः ११।०।०।० अस्य षड्गुणस्यैकादशभि
र्भागमपहत्यावाप्तं ६।० ।०।० एवं मूलदशान्तरंतर्दशा॥ पुनरपि मूलत्रिगुणस्यैकाद

१४४
६०

शाभिर्भागमपहत्यपासं ३।०।०।०। इयमर्द्धपाचकस्यांतर्दशा॥ पुनरपि मूलदशापति
दायस्यास्य॥ ११।०।०।० द्विगुणस्यैकादशभिर्भागमपहत्याप्तासं २।०।०।०। इयंत्रिकोणाव
स्थितस्यांतर्दशा॥ अत्र दशापतेर्यद्दर्दै तद्दैकग्रहावस्थितस्यपाचयति॥ त्रिभागंत्रि
कोणगः॥ अंतर्दशा॥ अत्र पस्यास्ययोगः॥ ११।०।०।०। जातासैव मूलदशाति॥ अथ दशा
पतिनासहैकस्मिन्राशौ कस्मिंश्चित्परश्चतुरस्रयोर्मध्यादेकस्मिन्न द्वितीयेन चा
न्येषु स्थानेषु न त्रिकोणयोर्न समे तद्न्यासः॥ ३॥ २॥ ५ एते परस्परछेदहता जाताः
६।२ छेदहीनाः ८।५।२। एते गुणकाराः॥ एकीकृताः १५ एष भागहारः॥ अथ दशाप
तिदायस्यास्य १५।०।०।०। अष्टगुणस्य चतुर्दशभिर्भागमपहत्याप्तासं ८ इयं मूल
दशापतेरंतर्दशा॥ पुनरपि मूलदशापतिदायस्य च १५।०।०।०। चतुर्गुणस्य चतुर्दश

भिर्भागमपहृत्या वासं ८।०।०।० इयमर्द्दपाकस्यां तद्दशा॥ पुनरपि मूलदशापतिदाय
स्यस्य द्विद्वि १४।०।०।०।०। गुणस्य चतुर्द्दशभिर्भागमपहृत्या वासं २।०।०।०ई यं चतुर्थभाग
पाकस्यां तद्दशा॥ अत्र दशापतेर्यद्दद्दं तदेकग्रहावस्थितः पाचपति॥ चतुर्भागं चतुर
स्रगताअंतद्दशा त्रयस्यास्य योगाः १४।०।०।० जाता सैव मूलदशाति॥ अथ पत्रदशापति

स नौहैकस्मिन्राशौ कश्चिभवत्यपरश्चसप्तमेनान्येषु तदान्यासः २ २ ७ एतेपरस्पर छेद
हता ताः २४ २४ २४ द हीनाः १४।७२ एते गुणराः एकीकृताः २३ एष भागहारः॥ अथ दशा
पतिदायस्यास्य २३।०।०।०। चतुर्द्दशगुणस्य त्रयोविंशत्या भागमपहृत्या वासं १४।०।०।०।इ
यं मूलदशापतेरंतद्दशा॥ पुनरपि दशापतिदायस्याय २३।०।०।० द्विगुणस्य त्रयोविंश
त्या भागमपहृत्या वासं २।०।७।० इयं सप्तमभागपाकस्यां तद्दशा॥ अस्यां तद्दशा त्रयस्य

योगः २३।०।०।० जातास्सैव मूलं दशेति॥ अथ दशापतेस्त्रिकोणयोरपि ग्रहो व्यवस्थित
नान्येषु स्थानेषु तदा न्यासः २।३।१ एते राशयः परस्परछेदहता जाता २।२।१ छेदहीनाः
१।३।२ एते गुणकाराः एकीकृताः १५ एष भागहारः दशापतिः॥ यस्यास्य॥ ५।०।०।० नवगु
ण पंचदशाभिर्भागमपहृत्या वा संज्ञ्यं मूलदशापतेरंतर्दशा॥ पुनरपि दशापतिदाय
स्यास्य त्रिगुणस्य ३०।०।० पंचदशाभिर्भागमपहृत्या वा संज्ञ्यं त्रिकोणस्थस्यांतर्दशा॥
द्वितीय ५।०।०।० यस्यैव १।०।०।० अस्यांतर्दशा त्रयस्य योगः १।०।०।० ५।०।०।० जाता
सैव मूलदशेति॥ अथ दशापतेस्त्रिकोणयोर्मध्यादेकस्मिन् कश्चिद्ग्रहो व्यवस्थितश्च
तुरस्त्रयोर्मध्यादेकस्मिन्नपि नान्येषु स्थानेषु तदा न्यासः २।३।४ एते परस्परछेद
हता जाता २।२।३ छेदहीनाः १२।८।३ एते गुणकाराः॥ एकीकृता २३ एष भागतारः अ

थदशापतिदायस्यास्य १९।०।०।० द्वादशगुणस्यैकोनविंशत्या भागमपहृत्यावासं १२।०।४।० इयं मूलदशापतिरंतर्दशा॥ पुनरपि दशापतिदायस्यास्य १९।०।०।० चतुर्गुणस्यैकोनविंशत्या भागमपहृत्यावासं ४।०।०।० इयं त्रिकोणभागे पाकस्यांतर्दशा॥ पुनरपि दशापतिदायस्यास्य १९।०।०।० त्रिकोणस्यैकोनविंशत्या भागमपहृत्यावासं ३।०।०।० इयं चतुर्भागपाकस्यांतर्दशा॥ अस्यां तर्दशात्रयस्य योगः १९।०।०।० जाता सैव मूलदशेति॥ अथ यत्र दशापतेस्त्रिकोणयोर्मध्यादेकस्मिन् स्थाने कश्चिन्न हो(?)ऽन्यः स लभेत तदान्यासः २।३।६ एते राशयः परस्परच्छेदहताः जाताश्छेदहीनाः २।७।३ एते गुणकाराः एकीकृताः ३१ एष भागहारः $\frac{२}{३१}$ $\frac{७}{३१}$ $\frac{३}{३१}$ दशापतिदायस्यास्य ३१।०।०।०। एकविंशत्या संगुण्य सैकत्रिंशत्या भागमपहृत्यावासं २।०।०।० इयं मूलदशापतेरंतर्दशा॥ पुनरपि दशावर्षाणि

३।१।०।०।०।सप्तभिः संगुण्यैकत्रिंशता भागमपहृत्या वाप्तं ७।०।०।०।इयं त्रिभागपाचक
स्यांतर्दशा॥पुनरपि वर्षाणि ३।०।०।०।संगुण्यैकत्रिंशता भागमपहृत्या वाप्तं ३।०।०।०।इयं
सप्तमभागपाचकस्यांतर्दशा॥अस्यांतर्दशात्रयस्य योगः॥३।०।०।०।जाता मूलदशा इति॥
यत्र दशापतिचतुरस्रयोर्द्वयोरपि ग्रहो स्थितौ नान्यन्न तदान्यासः २।२।२।१ एतारा न्नायः
परस्परछेदहता जाताः छेदाः [illegible] हीनाः १५।२।४ एते गुणकाराः एकीकृताः २४ ए
ष भागापहारः मूलदशावर्षाण्येतानि षोडशभिः संगुण्य चतुर्विंशत्या भागमपहृत्या वा
प्तं ८।०।०।इयं मूलदशापतेरंतर्दशा॥पुनरपि॥६।०।०।०।दशा २४ १ति द्वायस्यास्यास्य ६।०।०
।०।चतुर्गुण्यस्य चतुर्विंशत्या भागमपहृत्या वाप्तं १।०।०।०।इयं चतुर्थभागपाचकस्यां
तर्दशा॥द्वितीयस्याप्येवं १।०।०।०।अस्यांतर्दशात्रयस्य योगः ६।०।०।०।जाता सैव मूल

दन्नोति॥ अथ यत्रान्तर्दशापतेश्चतुरस्त्रयोर्मध्यादेकस्मिन् कश्चित्ग्रहो भवति स सप्तमेन्य
स्तदान्यासः २ २ ७ एते राशयः परस्परछेदहता जाता ३६/१६ २४/१६ छेदहीनाः २४।७।२
एते गुणकाराः एकीकृताः ३९ एष भागाहारः॥ अथ मूलदशावर्षाणि ३९ एतान्यष्टाविं
शत्यासंगुण्यैकोणचत्वारिंशता भागमपहृत्या वासं २५।०।०।० इयं मूलदशापतेरंत
र्दशा॥ पुनरपि दशावर्षाणि ३९ सप्तभिः संगुण्यैकोनचत्वारिंशता भागमपहृत्या वा
सं ६।५।१५।१ इयं चतुर्भागपाचकस्यांतर्दशा॥ पुनरपि दशावर्षाणि ३९ चतुर्भिः संगु

५ ण्यैकोनचत्वारिंशता भागमंहृत्या वासं ३।८।१।२५ इयं सप्तभागपाचकस्यांतर्दशा॥
अस्यांतर्दशात्रयस्य योगः ३९।०।०।० जातासैव मूलदशाति॥ एवं त्रिविकल्पाः॥ अत्र
पंचमात्प्रभृति असैव॥ अथ यत्रान्तर्दशापतिना सहैकराशौ कश्चिद्ग्रहः स्थितो द्वयो

र पित्रिकोणयोस्तदा न्यासः १।२।२।२ एते राशयः परस्परच्छेदहता जाताश्छेद
हीनाः १८।१८।१८।१८ एते गुणकाराः १।५।५।५।९ एकीकृताः २१ एषा भागापहारः॥
अथ मूलदशापतिवर्षाणि १३ अतः प्राग्वच्चतस्रोन्तर्दशा न्यास १।२।२।२ अस्यां त
र्दशा चतुष्टयस्य योगः १३ जातास्सैव मूलदशेति॥ अथ यत्र दशापतिना सहैकरा
शौ केचिद्व्यवस्थितस्त्रिकोणयोर्मध्यादेकस्मिन् व्यवस्थित चतुरस्रयोरप्येकस्मि
न्नान्यत्र तदा न्यासः १।२।३।४ एते राशयः परस्परच्छेदहता जाताः छेदहीनाः २४।१२।
८।६ एते गुणकाराः एकीकृता ५० एषा भागापहारः [illegible] मूलदशा
३६।०।०।० अतः प्राग्वच्चतस्रोन्तर्दशाः [illegible] अस्यां तर्दशा चतुष्टयस्य योगः
३।६।०।०।० जातास्सैव मूलदशा॥ अथ दशापतिना सहैकस्मिन् राशौ व्यवस्थित

स्त्रिकोणयोर्मध्यादेकस्मिन्नान्यः सप्तमे २८।२०।३।२५ चव्यवस्थितस्तन्न्यासः ।०।२
३।७ एते राशयः परस्परच्छेदहता जाताः छेदहीनाः २२।२।२।१।२।६।२।२।२।६ एते गु
णकाराः एकीकृताः ८३ एष भागापहारः मूलदशावर्षाणि १६।०।०।०। अतः प्राग्वच्च
तस्त्रों तद्दशा अनन्तरयाः आनीताः ८।०।०।०।२।०।०।०।२।०।०।०।२।०।०।०।२।०।०।०।
अस्यां तद्दशाचतुष्टयस्य योगः १६।०।०।०। जाता सैव मूलदशेति॥ अथ दशापतिनास
हैकस्मिन् राशौ कश्चिद्व्यवस्थितौ अन्यौ द्वयोश्च तस्त्रयोस्तत्र न्यासः ।०।२।२। एते प
रस्परच्छेदहता जाताः ३२।१६।८।८ छेदहीनाः ३२।१६।८।८ एते गुणकाराः एकीकृताः
६४ एषा भागहारः मूलदशाः ३६।०।०।०। अतः प्राग्वच्च तस्त्रों तद्दशाः ।०।०।०।०। अस्यां
तद्दशात्रयस्य योगः ३६।०।०।०। जाता सैव मूलदशेति॥ अथ पुत्रदशापतिनौ लक स

स्मिन राशौ कश्चिच्च स्थितौ न्यश्चतुरस्रयोः ५५/५८।३९/५१।५८/५८।८/५५।।१९७ मध्यादेकस्मिन्ना
न्यः सप्तमे तदा न्यासः २।३।५।७ एते परस्परं छेदहता जाताः छेदहीनाः ५६।२८।१७।८
एते गुणकाराः एकीकृताः १०९ एष भागापहारः मूलदृश्या ३६।०।०।०। अतः प्राग्वच्चत
स्रो तद्दृश्याः [illegible] अस्यां तद्दृश्याचतुष्टययोगः ३६।०।०।० जातास्सैव मूलदृश्या ति॥
अथ यत्र त्रिकोणयोर्द्वयोः कश्चिद्ग्रहः स्थितश्चतुरस्रयोर्मध्यादेकस्मिंस्तत्र न्यासः ६।८
१३।[illegible]। एते परस्परछेदहता जाताः [illegible] छेदहीनाः ३६।१२।१२।१
एते गुणकाराः एकीकृताः ६१ एष भागापहारः मूलदृश्या २३।०।०।० अतः प्राग्वच्चत
स्रो तद्दृश्याः [illegible] अस्यां तद्दृश्याचतुष्टयस्य योगः २३।०।०।०। जातास्सैव मूलदृश्ये
ति॥ अथ यत्र दृश्यापतेस्त्रिकोणयोर्मध्यादेकस्मिंस्थितः कश्चिद्द्वयोश्चतुरस्रयोश्च

तदान्यासः १/२ १/२ ५/२ ५/२ एते परस्परहता जाता ५८/५८ १९/५८ १२/५८ १२/५८ छेदहीनाः ५८।१९।१२।१२ एते गु
णकाराः एकीकृताः ८८ एष भागापहारः॥ मूलदशाः २३।०।०।० अतः प्राग्वच्चतस्रोत
द्दशाः १२/२ ... ३/२ अस्यां तद्दशाचतुष्टयस्य योगः जाता सैव मूलदशेति॥ अथ यत्र दशापते
स्त्रिकोणयोर्मध्यादेकस्मिन् २२।०।०।० कश्चित्स्थितश्चतुरस्रयोरप्येकस्मिन् सप्तमे च
कश्चित्स्थितस्तत्र न्यासः २/१ ३/१ ४/१ ३/१ एते परस्परछेदहता जाताः ८५/८५ २८/८५ ।२१/८५ ।१२/८५ छेदहीनाः
८५।२८।२१।१२। एते गुणकाराः एकीकृताः १४६ एष भागः पहारः॥ मूलदशा अतः प्राग्व
च्चतस्रो तद्दशाः २०/... ९/... ५/... ३/... अस्यां तद्दशाचतुष्टयस्य योगः २६।०।०।० जाता सैव २६।०।०
।० मूलदशेति॥ अथ यत्र दशापतेश्चतुरस्रयोर्द्वयोरपि ग्रहौ स्थितौ सप्तमे चान्यत्र न्या
सः २/१ ३/१ ३/२ ... एते परस्परछेदहता जाताः छेदहीनाः ११२/११२ ।२८/११२ ।२८/११२ ।१९/११२ ।११२।२८

297

२८।१९ एते गुणकाराः एकीकृताः १८४ एष भागापहारः मूलदृग्ज्याः ३९।०।०।० अतः
प्राग्वच्चतस्रोंतर्दृग्ज्याः अस्यांतर्दृग्ज्याः चतुष्टयस्य योगः ३९।०।०।० जाता सैव मूलदृग्ज्ये
ति॥ एवं चतुर्विकल्पाः॥ अथ पंचविकल्पेषु न्यासादेव ग्रहवत् स्थानं बोद्धव्यं न्यासेः॥ [illegible]
[illegible] छेदनानेन २५६ हता जाताः गुणकाराः २५।१२।८।८।६। भागापहारः ५८ न्यासः [illegible]
[illegible] छेदनानेन ५२ गुणकाराः ४२।२३।१५।१४।६। भागहारः ९७ न्यासः [illegible]
छेदनानेन २८ गुणकारः २४।१२।८।६।६। भागापहारः ५६ न्यासः [illegible] छेदनानेन ५९
गुणकाराः ५६।२८।१५।१५।८। भागापहारः १२१ न्यासः [illegible] छेदनानेन ८५ गुण
काराः ८५।४२।२८।२१।१२। भागापहाराः १८७ न्यासः [illegible] छेदनानेन १४८ गुण
काराः १५५।५८।३९।३९। भागापहाराः ३१२ न्यासः [illegible] छेदनानेन ८४ गुणका

राः ८४।२८।२२।१।१२ भागहारः १६६ एवं पंचविकल्पाः॥ अथ षड्विकल्पाः॥ न्यासः [illegible]
छेदे नानेन २५२ गुणकाराः २५२।१२६।८४।८४।१२६।३६ भागहारः ९४५ न्यासः [illegible] छेदे
नानेन १९८।८४।५५।४२।२४। भागहारः ४३०। न्यासः [illegible] छेदे नानेन १९८ गुणका
राः १९८।८४।५६।४२।२४ भागहारः ४ २६ न्यासः [illegible] छेदे नानेन ८४ गुणकाराः
१८४।२८।२८।२१।२१।१२ भागहारः १८४ इति जाताः षड्विकल्पाः॥ अथ सप्तविकल्पाः न्यासः
[illegible] छेदे नानेन १९८ गुणकाराः १९८।८४।५६।५६।४२।४२।२४ भागहारः ४७२ ए
वं यावंतो दायहारा भवंति॥ तावदेव तत्कर्म्मोपपद्यते॥ यावंतो न भवंति तावत्कर्म्म नो
पपद्यत इति॥ एकविकल्पो नास्ति॥ द्विविकल्पश्चत्वारः ४ त्रिविकल्पः सप्त ७ चतुर्विक
कल्प एकः १ एवं द्वात्रिंशद्विकल्पाः ३२ यत्र बहवः पाचका भवंति॥ तत्र प्रथमं मूलद

शापतिरेवांतर्दशापाचकोभवति॥ततःपरमेवदशाविभागःक्रमःसएवांतर्दशा
विभागक्रमःयस्यादौदशापाचकत्वंतस्यैवांतर्दशापाचकत्वंयस्यपश्चात्तस्यपश्चा
दिति॥दशाक्रमपाचिनोयस्यांतर्दशापाचकत्वंनप्राप्तंतस्यनवक्तव्यं॥तदनंतरंय
स्यप्राप्तंतस्यैववक्तव्यं॥अत्रान्येमूलदशापतेरंतर्दशांदत्वातपरंएकर्क्षगस्यददतित
तस्त्रिकोणगतस्यततश्चतुरस्रगतेस्यततःसप्तमगस्यत्रिकोणचतुरस्रयोर्यद्यनेको
तदातयोर्बलाधिकस्तस्यादौतश्चाप्युक्तं॥यस्माद्भगवान्गार्गिः॥आदावंतर्दशापाको
भवत्येवदशापतेः॥ततःपरंतुवक्तव्यंदशापाकक्रमेणतु॥एवंदशांतर्दशाविभागे
ज्ञातेकस्यसंबंधिनीदशांतर्दशावाशुभफलाभवति॥कस्याशुभेफलेस्येतन्नज्ञाय
ते॥तदर्थंदशासुफलानुरूपाः॥संज्ञावैतालियेनाह॥सम्यबलिनःस्वतुंगभागेसं

पूर्णा बलवर्जितस्य रिक्ता॥ नीचांशगतस्य शत्रुभागे ज्ञेया निष्फला दशा प्रसूतौ॥५॥
प्रसूतौ पुरुषस्य जन्मकाले यो ग्रहः सम्यग्बलवान् भवति पूर्वोक्तैर्बलैः सर्वैर्युक्तो भव
ति तस्य संबंधिनी संपूर्णा नाम्नी दशा भवति न केवलं यावत्स्वतुंगभागेऽवस्थितस्य पर
मोच्चभागगतस्यैव संपूर्णा नाम्नी दशा भवति सम्यग्बलिनः इत्युक्त्वा पुनः स्वतुंगभागइ
त्यनेनैतत् ज्ञापयति॥ यथा परमोच्चगतो ग्रहो न्यैर्बलकारणैर्युक्तो न भवति तथापि त
स्य संबंधिनी संपूर्णैव संपूर्णायां दशायामंतर्दशायां च काले शरीरारोग्यधनवृद्धिभिः
पुरुषोऽभिवर्द्धते॥ अथ समस्तबलैर्युक्तो न भवति किंचिदूनबलस्तदा तस्य संपूर्णा ना
म्नी दशा भवति॥ अथ परमोच्चगतो भवति॥ केवलं परमोच्चराशिगतो भवति॥ तदा
तस्य दशा पूर्णैव॥ पूर्णायां दशायामंतर्दशायां च काले धनलाभं मवाप्नोति न तारो

301

ग्यं॥ बलवर्ज्जितस्य रिक्ता सर्वैर्वर्ज्जितस्य ग्रहस्य रिक्ता नाम्नी दशा भवति॥ यश्च नीच
राशौ स्थितस्य रिक्तैव रिक्तग्रहस्य रिक्ता नाम्नी दशा भवति॥ यश्च नीचराशौ स्थितस्य
रिक्तैव रिक्तदशां तद्दशाकाले धनहानिमवाप्नोति॥ नीचांशगतस्येति॥ नीचांशो नीच
राशिनवभागे यो ग्रहो गतः स्थितो भवति॥ यश्च शत्रुभागे शत्रुनवांशे च स्थितस्य
दशा निष्टफला ज्ञेया तव्या॥ अनिष्टफलदशां तद्दशाकाले धनहानिमनारोग्यं च प्रा
प्नोति॥ अत्र च भगवान् गार्गिः॥ सर्वैर्बलरूपेतस्य परमोच्चगतस्य च॥ रिक्ता नाम द
शा ज्ञेया धनारोग्यविनाशनी॥ स्वोच्चराशिगतस्याथ किंचिद्बलगतस्य च॥ पूर्णा नाम
दशा ज्ञेया धनवृद्धिकरी शुभा॥ यस्या सरमनीचस्थस्तथा चारिनवांशके॥ तस्यानि
ष्टफला नाम तदनंतरं यस्य प्राप्तं तस्यैव वक्तव्यं॥ अत्रान्ये मूलदशापतेरंतर्दशां दत्वा

तपरं एककर्क्षगस्य दद्दति न तु त्रिकोणगतस्य ततश्चतुरस्रगतस्य ततः सप्तमगस्य
त्रिकोणचतुरस्रयोर्यदा ग्रहौ तदा तयोर्बलाधिकस्तस्यादौ तच्चायुक्तं॥ यस्माद्भगवा
न् गार्गिः॥ आद्यायेत् दशापाको भवत्येव दशापतेः॥ ततः परं तु वक्तव्यं दशापाकक्रमे
ण तु॥ एवं दशांतर्दशाविभागे ज्ञाते कस्य संबंधिनी दशांतर्दशा वा शुभफला भवति॥
कस्याशुभफलैत्येतन्न ज्ञायते॥ तदर्थं दशा सुफलानुरूपाः॥ संज्ञा वैतालिये नाह॥
सम्यबलिनः स्वतुंगभागे संपूर्णा बलवर्जितस्य रिक्ता॥ नीचांशगतस्य शत्रुभागे
ज्ञेया निष्फला दशा प्रसूतौ॥५॥ च्युतस्य ग्रहस्यारोहिणी नाम्नी दशा भवति॥ परम
नीचांतभागादारभ्य यावत्सरमोच्चभागादित्यंतरे यद्राशिषट्कं तच्चालस्थितेन ग्र
हेण यावद्भुक्तं॥ दशांतर्दशा वा सारोहिणी नाम्नी भवति॥ यस्मात्सरमनीचाद्भ्रष्टः प्र

स्थरे तावदारोहनीति ग्रहः परिकल्प्यते॥ यावत्स्वमोच्चमिति आरोहिणी चेष्टफला भ
वति॥ नीचारिभांशा इति॥ सैवारोहि यत्र तत्र राशौ स्वनीचराश्यंशोपगते नरदत्ताधमाना
म्नी दशा भवति॥ एवं यत्र तत्र राशावरिभांशकस्थेन शत्रुनवांशकस्थेन नरदत्ताधमैव द
शा भवति॥ पूर्वं शत्रुनवांशकस्थेन नरदत्तानिष्टफले युक्तमधुना सैवाधमेति॥ तत्किमे
तदिस्यत्रोच्यते॥ अवरोहिणी शत्रुनवांशकस्थेन नरदत्तापि अनिष्टफला ज्ञेया॥ आरो
हिण्यधमा॥ अनयोः कः फलभेदः॥ अत्रोच्यते॥ अनिष्टफला फलमशुभं प्रयच्छति॥
अधमाशुभमेवाल्पमिति॥ एवमवरोहिणीसंज्ञा यदा मध्यसंज्ञा भवति॥ तदा सैवानि
ष्टफलसंज्ञां लभते॥ आरोहिणी यदा मध्यसंज्ञा भवति तदा सैव पूर्णेति संज्ञा ज्ञेया॥ अ
त्र च भगवान् गार्गिः॥ उच्चनीचांतरस्थस्य दशा स्यादवरोहिणी॥ तस्यामल्पमवाप्नो

तिफलं कुर्याद्दशुभं नरः॥ मित्रोच्चस्वांशकस्थस्य मध्यामध्यफला तु सा॥ नीचोच्चमध्य
गस्योक्ता श्रेष्ठा चारोहिणी दशा॥ सैव धमाख्या भवति नीचराश्यंशगस्य तु॥ अवरोहिणी
चेदधमा भवेत्कष्टफलतदा॥ आरोहिणी मध्यफला संपूर्णा परिकीर्तितेति॥ अथदशां

या तर्दशासंज्ञा तु नरस्युपजातिर्केह॥ नीचारिभांशसमवस्थितस्य शस्ते गृहे मिश्रफला
प्रदिष्टा॥ संज्ञानुरूपाणि फलान्यथैषां दशासु वक्ष्यामि फलोपयोगं॥ ७॥ शस्तानि गृहा
णि स्वोच्चमूलत्रिकोणात्मक्षेत्रमित्रक्षेत्राणि तेषु वस्थितेन नीचराश्यंशकेरितांशेश
त्रुनवांशकेसमास्थितेन वा ग्रहेण या दत्ता दशांतर्दशा वा सा मिश्रफला नाम्नेव मिश्र
फला शुभमशुभं च फलं प्रयच्छति॥ व्याधिसमेतमर्थागममेवमादि॥ अर्थादेवशस्त
राशिगेन अशस्ता शत्रुनीचराशायः॥ तस्थेन स्वोच्चमित्रमूलत्रिकोणास्वर्गोत्तम

नवांशकस्थेनापि दत्ता मिश्रफलैव भवति॥ संज्ञानुरूपाणि नामसदृशानामानि फला
नि दशास्वंतर्दशासु च ज्ञेयानि॥ तद्यथा॥ संपूर्णाख्यं तन्श्रेष्टफलप्रदा पूर्णा श्रेष्टफलदा मअ
धमा शुभः फलदा रिक्तार्थोपहारिणी॥ अनिष्टफलदाख्यं तमशुभफलंकरी॥ मिश्रफला
शुभमशुभं च फलं प्रयच्छति॥ अथैषां दशास्थिति॥ अथशब्दः॥ आनंतर्ये॥ एषामादि
त्यपूर्वाणां ग्रहाणां दशासु यथोपयोगं उत्तरत्र वक्ष्यामि॥ यथा येन प्रकारेणैव युज्य
ते तथा तत्कथयिष्यामि॥ कस्यामंतर्दशायां किं फलमप्रयुज्यत इति॥ अथ लग्नदशा
यां शुभाशुभफलज्ञानं वैतालीये नाह॥ उभयेधममध्यपूजिता द्रेष्काणैश्चरभेषु चो
त्क्रमात्॥ अशुभेष्टसमाः स्थिरे क्रमाद्धो राज्ञाः परिकल्पिता दशा॥८॥ उभये द्विस्वभावे
राशौ लग्नगते द्रेष्काणक्रमेणाधममध्यमपूजिता दशा ज्ञेया॥ प्रथमद्रेष्काणे जा

तस्याऽधमाशोभनानिष्टफलानि॥ द्वितीये मध्यमानिष्टफला॥ तृतीये पूजिताश्रेष्टफ-
ला॥ चरमे चरराशौ उत्क्रमेण॥ वैपरित्येन॥ तेन प्रथमद्रेष्काणे नानस्य पूजिता॥ द्वि-
तीये ध्यमा॥ तृतीयेऽधमा निष्फलाः अशुभेष्टसमाः स्थिरे क्रमादिति॥ स्थिरे स्थिर-
राशौ प्रथमद्रेष्काणेऽशुभा॥ द्वितीये इष्टा श्रेष्टा॥ तृतीये समा मध्यफला॥ एवं होरायाः
लग्नस्य दशाः परिकल्पिता उक्ता इति॥ अथ नैसर्गिकदशा कालं ग्रहाणां शार्दूलविक्री-
डितेनाह॥ एकं १ द्वौ २ नव ९ विंशति २० धृति १८ कृती २० पंचाशत् ५० देषां क्रमाच्चंद्रारेंदु-
जशुक्रजीवदिनकृद्दिवाकरीणां समाः॥ स्वैः स्वैः पुष्टफलानि सर्गजनितैः पंक्तिर्दशायाः
क्रमात् अंते लग्नदशा शुभेति यवना नेच्छंति केचित्तथा॥१॥ एकाद्याः समाः एकादीनि व-
र्षाणि चंद्रादीनां यथाभिहितानि नैसर्गिकानि॥ तद्यथा॥ जन्मसमाया आरभ्यैवं समाः

ना०

२०
१५८

संवत्सराएकश्चेंदस्य॥ ततः परं द्वावारस्योगारकस्य॥ एवंत्रयः॥ ततः परं नवेंद्रजस्य
बुधस्य॥ एवद्वादश॥ ततः परं विंशतिः शुक्रस्य॥ एवं द्वात्रिंशत॥ ततः परं ष्टतयोष्टा
दशजीवस्य गुरोः॥ एवं पंचशत॥ ततः परं कृतिसंख्य विंशतिदिनकृत्सूर्यस्य॥ एवं स
सतिः॥ ततपचाशत दैवाकरः सौरस्य॥ एवं विंशत्यधिकवर्षशते॥ एतेषु निसर्गदशा
दशाधिपे तुंगगृहेषु बलवत्सूपचयस्थितेषु च दशासु शोभनानि दशाफलानि भवंति॥
हीनबलेष्वनुपचयस्थेष्वशोभनानि॥ एतच्च सर्वथा चिंत्यं यतो निसर्गदशास्थितिसं
वाद इति॥ तथा च यवनेश्वरः॥ स्तनोपभोगः शशिनो वयः स्वं भौमस्य विद्याद्दशना
नुजन्म॥ बौधास्तु शिक्षापरकालमाहुर मैथुनेच्छाललितमश्चति॥ शौक्रं सुवत्सं विधु
पूर्वंदष्टमा मध्यमा देवगुरोर्वदंति॥ रवेर्वयोद्धासरमन्यमस्मात् सौरे जराहुर्भगको

१५८

308

याज्यं॥ न तु विंशत्यधिकं वर्षशतं परमायुरन्तु दृष्टं जिविताभावात्को लग्नस्य नैसर्गिकाद
शाकालः॥ उच्यते॥ पूर्वमेव व्याख्यातं॥ यथा विंशत्यधिकं वर्षशतं परमायुस्तेन राशिकाम
ध्यादीनामाज्ञानार्थं प्रदर्शितं॥ यतस्तावत्प्रमाणमायुषः परं संभवतीति॥ तथा च॥ य
दा मीनलग्ने बलवत मीनकांते च कश्चिज्जातो भवत्सर्वे च ग्रहा यत्र तत्र नवांशे मीनांशका
वस्थिता भवति॥ केचिदुच्चगताः केचिद्वक्रितास्तदा मीनलग्नो द्वादशवर्षाणि ददाति॥
स एव लग्नस्तदान्यानि द्वादशवर्षाणि ग्रहश्चैको मीनांशके तस्थ द्वादश वर्षाणि
ददाति॥ तानि च वक्रोस्थत्रिगुणानि षट्त्रिंशद्भवंति॥ आदित्यवर्ज्जं आदित्यस्य मेषे
धन्वेनांशके स्थितस्य सप्तविंशति वर्षाणि भवंति॥ एवं चंद्रादीनां षण्णां शतं षोडशा
धिकं भवति॥ आदित्यस्य सप्तविंशति लग्नस्य चतुर्विंशतिः एवमेकीकृतं शतद्वयं स

सषष्ठ्यादिकं भवति॥ तीं लग्नदशायं ते केचिदाचार्याः श्रुतिकीर्तिप्रभृतयः॥ तथा ते नैव
प्रकारेण शुभमिति न छै ति नो वांछै ती सर्थः॥ यस्माद्बलत्वे लग्नस्य वर्यो तद्दशा भवति सा
शुभा आर्ये लग्नदशायां शुभाशुबलत्वं बलवशान्नोक्तं द्रेष्काणवशादुक्तं॥ उभयथमनमध्यम
पूजिता इति॥ यस्माद्बलहीनस्यापि लग्नस्य वर्यांते दशा द्रेष्काणवशाच्छुभा भवति॥ तस्मा
द्ये आचार्या अंते लग्नदशां ने छंति ते निष्कारणमेव ने छंति॥ ननु किमागमंथानां कार
णे न॥ उच्यते॥ य एवाचार्या अंते लग्नदशां ने छंति॥ तै तएवागमानुत्सकायपादर्शित
कारणमुपन्यस्यने छंति॥ तेन कारणेन दोषः उक्तः॥ तथा च श्रुतिकीर्तिः॥ अंते लग्नदशा शु
भेति यव वर्नीने तद्ध हूनो मतं तस्मिन्हीनबले यतो ऽसमये सा स्यादतो नष्यते॥ एतं छु
कीर्तिना कारणमुपन्यस्तं तच्च दुष्टमते नैस गिकेलग्नदशाकाले ते दशा शुभे स्येवगंत

ले माहुरिति॥ नैसर्गिकस्य दशाकालस्य प्रयोजनमाह॥ स्वैः स्वैरिति॥ तत्र यस्य ग्रहस्य
संबंधिनी पूर्वविधिना कृता दशा तदंतर्दशा वा सा यदि नैसर्गिकसमाभिर्निकथितवर्षैः
स्वैः स्वैः सप्तमी यैर्युज्यते स्वदशाकालेन समं काले भवति॥ तदा यावत्काले तस्य दशाद्वय
स्यैक्यं भवति॥ तावत्काले तस्य दशांतर्दशा वा यदा भवति॥ तस्याः पुष्टा परिपूर्णा फल
पंक्तिः पाको भवति॥ क्रमात्सपरिपाट्या यावद्वर्त्तते तावच्छुभफलेत्यर्थः॥ अत्र केचिद्वदंति॥
यथापूर्वविधिना ज्ञाता शुभा तदा शुभफलमेतत्प्पं॥ प्रयच्छत यथाशुभा तदाशुभमस्व
र्थमिति॥ एतच्चायुक्तं॥ यस्माद्यवनेश्वरः॥ स्वेष्टा दशा स्वेव यसि ग्रहस्येति॥ तथा च स
त्वं॥ एकाब्दिकः शशी अब्दिकः कुजाद्दादशाब्दिकः सौम्यः॥ द्वात्रिंशाब्देगुपुत्रो गुरुस्तु
ल्यकथितः शा तस्यार्द्ध ५० समस्तव्दः सूर्यो विंशत्यधिकः शानैश्चरो व्दशातः॥ वयसो

तराणि चैषां प्वदशा नैसर्गिकः कालः॥ स्वंस्वं वयसः सदृशं ग्रहाः समासाद्यदेहिनां काले॥
भक्षणपोषणचेष्टास्वभावदाः सुर्यथासंख्यं॥ अथ लग्नदशा नैसर्गिककालं पुराणयवन
मतेनाह॥ अंते लग्नदशा इति॥ द्विविंशत्यधिकावर्षशतात् ऊर्ध्वं यदि कस्य चिरायुषः का
लो भवति॥ तदा स कालः॥ सर्व एव लग्नस्य नैसर्गिकादशाकालो भवति॥ तस्मिन् काले पु
राणयवनानां मते लग्नदशाख्यो भनाभवति॥ विंशत्यधिकाद्वर्षशतादूर्द्ध्वमित्येतत्कुतोव
गम्यते॥ उच्यते॥ तदर्वाक्कालस्यान्यग्रहपरिगृहीतत्वात्॥ लग्नस्यानवकाशादेव॥ अथा
न्यः कश्चिदाह॥ यथानानुविंशत्यधिकाद्वर्षशतादधिकं यस्यायुर्नास्ति॥ उच्यते॥ नास्त्येन
केवलं यावद्वर्षसप्ततेरप्यधिकं यस्यायुर्नास्ति तस्य शनैश्चरसंबंधिनि नैसर्गिकोदशा
कालो नास्ति॥ यस्य॥ पंचाशतोधिकनास्ति तस्यादित्यसत्कयपि नास्ति॥ एवमन्येषामपि

व्यं॥ अथ दशांतर्दशाशुभाशुभज्ञानं शार्दूलविक्रीडितेनाह॥ पाकस्मिन्निलग्नगे सुहृद्दिवा-
वर्गेस्य सौम्येपि वा प्रारब्धाशुभदा दशा त्रिदशपर्भेषु वा पाकपे॥ मित्रोच्चोपचयत्रिकोण
मदने पाकेश्वरस्य स्थितश्चंद्रः सत्फलबोधनानि कुरुते पापानि चातोन्यथा॥१०॥ सौर
सावन चांद्र नाक्षत्राणि चत्वारि मानानि॥ तत्र सौरमाने रविभगणभोगः यावता का[illegible]ले
नार्को भायके भुंक्ते तत् सौरं दिनं॥ यावता कालेन राशिद्वादशकं भुंक्ते तत् सौरं वर्षं॥ तच्च पंच
ष्ट्यधिकैस्त्रिभिः शतैर्दिनानां घटिकापंचदशकेन सार्द्धेन भवति॥ सावनमुदयादुद-
यः॥ अर्कोदयात्पुनरेवार्कोदयः सावनमहोरात्रं॥ तच्च षष्टिघटिकामहोरात्रं॥ अहोरात्र
त्रिंशन्मासः॥ सावनमासद्वादशवर्षं॥ एवं षष्ट्यधिकैस्त्रिभिः शतैर्दिनानां सावनं वर्षं॥
चांद्रं तिथिभोगः॥ तच्च स्वमानेन षष्ट्यधिकं शतत्रयं भवति सावनेनोयं मानं शतत्रयं॥

चतुःपंचाशदधिकं दिनानां तच्चवर्षं भवति॥ एवं सौरसावनचांद्राणि त्रीणिमानानि त्रये
कं स्वमानेन षष्ट्यधिकं शतत्रयं भवति॥ नाक्षत्रं चंद्रनक्षत्रं भागेः॥ तच्च दिनानां सप्तविंश
सा मासो भवति॥ तत्र शतत्रयेण चतुर्विंशत्यधिकेन दिनानां सप्तविंशत्या मासो भवति॥
तत्र शतत्रयेण चतुर्विंशत्यधिकेन दिनानां वर्षं॥ उक्तं च॥ रव्यंशभोगो ऽहोरात्रः सौरश्चां
द्रमसस्तिथिः॥ चंद्रनक्षत्रभोगस्तु नाक्षत्रः परिकीर्तितः॥ स्वसावनो ग्रहर्क्षाणामुदया
दुदयावधिः॥ नक्षत्रमाने मासः स्यात्सप्तविंशतिवासरः॥ शेषमानेषु निर्दिष्टो मासस्त्रिं
शद्दिनात्मक इति॥ तस्मात्सावनमानेनायुर्दायगणना कार्या॥ यस्माच्छोध्यक्षेपति शुद्ध
मायुः कर्तव्यं॥ तच्च सावनमानं सौरमानेन संक्रांत्यवधि मो मास्यः॥ सावनस्त्रिंशद्रात्रः॥ ५५
चांद्रो मावास्यांतिकः॥ नाक्षत्रो रेवत्यंतिकः॥ नाक्षत्रो रेवत्यंतिकः॥ सौरमधिमासकयु

ते चांद्रं भवति॥ चांद्रमवरात्रभौनं सावनं भवति॥ चांद्रशाब्देनात्र॥ उक्तं च॥ युगवर्ष
मासपिंडरविमानसाधिमासकं चांद्रं॥ अवमविहीनं सावनं मेदनमब्दाचितवर्षमिति॥
एवंत्रोध्यक्षेपविशुद्धं सावनमानेनायुर्दायविधिः॥ अथाच मधुरचित्रके भगवान् गार्गिः॥
आयुमप्युपासनं॥ नत्वर्कोदयात्सरभ्यार्कोदयावधिं यावदहोरात्रं तसुलिप्तातंत्रे सौरम
होरात्रं प्रच्यते॥ अष्टाक्षिवसुसप्तमरूपनवमुनिनगतिथयः शातगुणाश्च सौरेणेति॥ ए
तंचैषुलिप्ताएव जानाति॥ यस्मसुलिप्तातंत्रं वर्जइति॥ सर्वसिद्धांतेषु तंत्रेषु सौरमाने
नरविभगणभोगः सौरमानमधिमासयुक्तं चांद्रं भवति चांद्रमवमरात्रोनं सावति॥ भ
एवंत्रोध्यक्षेपविशुद्धसावनमानं सर्वसंहितासु चार्कोदयादारभ्यार्कोदयं यावद्यदहो
रात्रं तत्सावनमहोरात्रमितिसंज्ञा॥ तथाच भगवान् पराशरः॥ सावनमहोरात्रं॥ गा

र्गिम्य॥ सावनेन स्मृतो मासस्त्रिंशद्दुम्नकरोदयः॥ तथा च श्रीभट्टब्रह्मगुप्तः॥ साव
नमुदयाद्दुदयं इति॥ एवं पुरुषस्य जन्मसमये सावनमहर्गणं कृत्वा तस्मात्तिथिनक्षत्रप
रिच्छेदस्तात्कालिकाग्रहाः सलग्नयथाकृतास्तथान्तर्दशावसाने कर्तव्याः॥ ततआगामिद
शाफलं वक्तव्यं॥ कथमुच्यते॥ अथ जन्मनि अहर्गणतात्कालिकं कृत्वा ततस्तत्रान्तर्दशीका
